

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥श्रीगुरुभ्योनमः॥
॥श्रीजगदंबायैनमः॥छ॥हरिः ॐ॥ मू॥ ॥इषेत्वोर्जेत्वा
वायवस्था॥देवोवःसविताप्रार्पयतु श्रेष्ठतमायकर्मणे
॥१॥आप्यायध्वमघ्न्याऽइंद्रायभागंप्रजावतीरनमीवा
अयक्ष्माः॥मावस्तेनऽईशतमाघशंसः॥२॥ध्रुवाअ
अस्मिन्गोपतौस्यातबह्वीः॥यजमानस्यपशून्पाहिवसोः
पवित्रमसि॥३॥प्रथमोनुवाकः॥द्यौरसिपृथिव्यसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे पायीदाजी पूराही तोची होय

॥१३२॥

॥१३२॥

न

ग ॥श्री॥ जा

न

॥१३२॥

॥१३२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible]तरिश्वनो घर्मोसि ॥ विश्वधाः परमेण धाम्ना ॥२॥ दृं
हस्व मा ह्वा मा ते यज्ञपतिर्ह्वार्षीत् ॥३॥ वसोः पवित्रमसि शतधा
रं वसोः पवित्रमसि सहस्रधारं ॥४॥ देवस्त्वा सविता पुनातु व
सोः पवित्रेण शतधारेण ॥ सुप्वा कामधुक्षः ॥५॥ सा विश्वायुः
सा विश्वकर्मा सा विश्वधायाः ॥६॥ इन्द्रस्य त्वा भागं सोमेनात
नच्मि विष्णो हव्यं रक्षस्व ॥७॥ ॥ अग्ने व्रतपते व्रतं च
रिष्यामि तच्छकेयं तन्मे राध्यताम् ॥ इदमहमनृतात्सत्य
मुपैमि ॥८॥ कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२॥

क्ति तस्मै त्वा युनक्ति ॥ कर्म्मणे वां वेषाय वाम् ॥९॥ प्रत्युष्टं
रक्षः प्रत्युष्टा ऽअरातयो निष्टप्तं रक्षो निष्टप्ता ऽअरात
यः ॥ उर्वन्तरिक्षमन्वेमि ॥१०॥ धूरसि धूर्व्व धूर्व्वन्तन्धू
र्व्वतं योस्मान्धूर्व्वति तं धूर्व्वतं यं वयं धूर्व्वामः ॥११॥ देवानां
मसि सस्नितमं वह्नितमं पप्रितमं जुष्टतमं देवहूतम
म् ॥ अह्रुतमसि हविर्द्धानं दृꣳहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षी
त् ॥१२॥ विष्णुस्त्वा क्रमतामुरु वातायापहतꣳ रक्षो यच्छन्तां

॥२॥

पंच ॥ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां ॥१३॥
अग्नये जुष्टं गृह्णाम्यग्नीषोमाभ्यां जुष्टं गृह्णामि ॥ भूताय त्वा
नारातये स्वरभिविख्येषं ॥१४॥ दृꣳहन्तां दुर्याः पृथिव्यामुर्वन्तरि
क्षमन्वेमि ॥ पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थे ॥ अग्ने हव्य
ꣳ रक्षस्व ॥१५॥ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्य
च्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥१६॥ देवीरापो अग्रेगुवो अग्रेपु
वः ॥ अग्र इममद्य यज्ञं नयताग्रे यज्ञपतिꣳ सुधातुं यज्ञपतिं देवयुवं ॥१७॥ युष्मा इन्द्रो
वृणीत वृत्रतूर्य्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्य्ये प्रोक्षिता स्थ ॥ अग्नये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वा जुष्टं प्रोक्षाम्यग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि ॥१८॥ दैव्याय कर्मणे शुं
न्धध्वं देवयज्यायै ॥ यद्वोऽशुद्धाः पराजघ्नुरिदं वस्तच्छुंधामि ॥१९॥ शर्मास्यव
धूतꣳ रक्षोऽवधूता अरातयः ॥ अदित्यास्त्वगसि प्रति त्वादितिर्वेत्तु ॥२०॥
अद्रिरसि वानस्पत्यो ग्रावासि पृथुबुध्नः ॥ प्रति त्वादित्यास्त्वग्वेत्तु ॥२१॥
अग्नेस्तनूरसि वाचो विसर्जनं ॥ देववीतये त्वा गृह्णामि ॥२२॥ बृहद्ग्रावा
सि वानस्पत्यः स इदं देवेभ्यः ॥ हव्यꣳ शमीष्व सुशमि शमीष्व हविष्कृदे
हि ॥२३॥ कुक्कुटोसि । मधुजिह्व इषमूर्जमावद ॥ वयꣳ संघातं संघातं जे
ष्म ॥२४॥ वर्षवृद्धमसि प्रति त्वा वर्षवृद्धं वेत्तु ॥ परापूतꣳ रक्षः प्रतिपूता अ

रातयः ॥२५॥ अपहतꣳ रक्षो वायुर्वो विविनक्तु ॥ देवो वः सविता प्रति गृ
भ्णातु हिरण्यपाणिरच्छिद्रेण पाणिना ॥२६॥ धृष्टिरस्यपाग्ने अग्निमा
मादं जहि ॥ निष्क्रव्यादꣳ सेधा देवयजं वह ॥२७॥ ध्रुवमसि पृथिवीं दृ
ꣳह ॥ ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि द्विषतो वधाय ॥२८॥
अग्ने ब्रह्म गृभ्णीष्व धरुणमस्यन्तरिक्षं दृꣳह ॥ ब्रह्मवनि त्वा क्षत्रवनि
सजातवन्युपदधामि द्विषतो वधाय ॥३०॥ धर्त्रमसि दिवं दृꣳह ॥ ब्रह्म
वनि त्वा क्षत्रवनि सजातवन्युपदधामि द्विषतो वधाय ॥२९॥ विश्वाभ्य
स्त्वाशाभ्य उपदधामि द्विषतो वधाय ॥ चितः स्थोर्ध्वचितो भृगूणा

श्री

मंगिरसां तपसा तप्यध्वं ॥[illegible]॥ शर्मास्यवधूतं रक्षोऽवधूता अरात
यः ॥ अदित्यास्त्वगसि प्रति त्वादितिर्वेत्तु ॥[illegible]॥ धिषणासि पर्वती प्र
ति त्वादित्यास्त्वग्वेत्तु ॥ दिवः स्कंभन्यसि धिषणासि पार्वतेयी प्रति
त्वा पर्वती वेत्तु ॥[illegible]॥ धान्यमसि धिनुहि देवां धिनुहि यज्ञं धिनु
हि यज्ञपतिं ॥ धिनुहि मां यज्ञन्यं ॥[illegible]॥ प्राणाय त्वोदानाय त्वा व्या
नाय त्वा ॥ दीर्घामनु प्रसितिमायुषे धां ॥ देवो वः सविता प्रति गृ
भ्णातु हिरण्यपाणिरच्छिद्रेण पाणिना ॥ चक्षुषे त्वा महीनां
पयोऽसि ॥[illegible]॥ वेदोऽसि वेदयेन त्वं देव वेद देवेभ्यो वेदोऽभवः ॥ तेन

मह्यं वेदो भव ॥[illegible]॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो
हस्ताभ्यां ॥ संवपामि समाप ओषधीभिः समोषधयो रसेन ॥ सं
रेवतीर्जगतीभिः सं मधुमतीर्मधुमतीभिः पृच्यंतां ॥ जनयत्यै त्वा
संयौमि ॥[illegible]॥ इदमग्नेरिदमग्नीषोमयोरिषे त्वा ॥ घर्मोऽसि वि
श्वायुरुरुप्रथा उरु प्रथस्वोरु ते यज्ञपतिः प्रथतां ॥[illegible]॥ अग्निष्टे
त्वचं मा हिंसीद्देवस्त्वा सविता श्रपयतु वर्षिष्ठेऽधि नाके ॥[illegible]॥ माभेर्मा संविक्था अतमेरु
र्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयात् ॥ त्रिताय त्वा द्विताय
त्वैकताय त्वा ॥[illegible]॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्णोहस्ताभ्यां ॥ आददे ध्वरकृतं देवेभ्यः ॥ इंद्रस्य बाहुरसि दक्षिणः
सहस्रभृष्टिः शततेजाः ॥ वायुरसि तिग्मतेजा द्विषतो वधः ॥२४॥
पृथिव्यै वर्मासि पृथिवि देवयजनि ॥ ओषध्यास्ते मूलं माहिंसि
षं ॥२५॥ व्रजं गछ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां
पृथिव्यां शतेन पाशैः ॥ योस्मां द्वेष्टि यंच वयं द्विष्मस्तमतो मा
मौक् ॥२६॥ अपारस्तं वध्यासं पृथिव्यै देवयजनात् ॥ व्रजं गछगो
ष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्यां शते
न पाशैः ॥ योस्मां द्वेष्टि यंच वयं द्विष्मस्तमतो मा मौक् ॥ अररो
दिवं मापप्तो द्रप्सस्ते द्यां मा स्कन् ॥ व्रजं गछ गोष्ठानं वर्षतु ते द्यौर्ब

धान देव सवितः परमस्यां पृथिव्यां शतेन पाशैः ॥ योस्मां द्वे
ष्टि यंच वयं द्विष्मस्तमतो मा मौक् ॥२७॥ गायत्रेण त्वा छंदसा
परिगृह्णामि त्रैष्टुभेन त्वा छंदसा परिगृह्णामि जागतेन त्वा छंदसा
परिगृह्णामि ॥ सुक्ष्मा चासि शिवा चासि स्योना चासि सुषदा चा
सि ॥ ऊर्जस्वती चासि पयस्वती च ॥२८॥ पुरा क्रूरस्य विसृपो वि
रप्शिन्नुदादाय पृथिवीं जीवदानुं ॥ यामेरयंश्चंद्रमसि स्वधा
भिस्तां धीरासो अनुदिश्य यजंते ॥ द्विषतो वधोसि ॥२९॥ प्रत्युष्ट
रक्षः प्रत्युष्टा अरातयो निष्टप्तं रक्षो निष्टप्ता अरातयः ॥ अनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६॥

श्रितोसि सपत्नक्षिद्वाजिनं त्वा वाजेध्यायै सम्मार्ज्मि॥ प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो निष्टप्तं रक्षो निष्टप्ता अरातयः॥ अनिशितोसि सपत्नक्षिद्वाजिनीं त्वा वाजेध्यायै सम्मार्ज्मि॥२९॥ अदित्यै रास्नासीन्द्राण्यै सन्नहनं॥ विष्णोर्वेष्पोस्यूर्जे त्वादब्धेन त्वा चक्षुषावपश्यामि॥३०॥ अग्नेर्जिह्वासि सुभूर्देवेभ्यः॥ धाम्ने धाम्ने भव यजुषे यजुषे॥३१॥ सवितुस्त्वा प्रसव उत्पुनाम्यछिद्रेण पवित्रेण सूर्यस्य रश्मिभिः॥ सवितुर्वः प्रसव उत्पुनाम्यछिद्रेण पवित्रेण सूर्यस्य रश्मिभिः॥३२॥ तेजोसि शुक्रमस्यमृतमसि धाम नामासि॥ प्रियं देवानामनाधृष्टं देवयजनं॥३१॥ वसन्ते प्राणः पशुषु प्रविष्टो देवानां विष्ठामनु यो वितस्थे॥

॥६॥

आसं न्वान्सो मद्घृतवान्हि भूत्वाग्निं गच्छ स्वर्यजमानाय विंद॥५॥३१॥ इषे त्वा २ द्यौरसि ४॥ अग्ने व्रतपते ८ पवित्रेस्थः ४ शर्मासि ७ धृष्टिरसि ४ शर्मोसि ५ देवस्य त्वा ४ देवस्य त्वा ६॥ प्रत्युष्टं ५ दृंहन्तु वा ? पंचाशत्॥ इति यजुर्वेदे एवं शाखायां प्रथमोध्यायः॥१॥ ॥१॥ ॥ हरिः ॐ॥

म॥ कृष्णोस्याखरेष्ठोग्नये त्वा जुष्टं प्रोक्षामि वेदिरसि बर्हिषे त्वा जुष्टं प्रोक्षामि बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि॥१॥ अदित्यै व्युन्दनमसि विष्णो स्तुपोसि ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थां देवेभ्यः॥२॥ भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहा॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२०॥

गंधर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै ॥३॥ यजमानस्य प
रिधिरस्यग्निरिड ईडितः ॥ इंद्रस्य बाहुरसि दक्षिणो विश्व
स्यारिष्ट्यै ॥ यजमानस्य परिधिरस्यग्निरिड ईडितः ॥ मित्राव
रुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्म्मणा विश्वस्यारिष्ट्यै ॥ यजमान
स्य परिधिरस्यग्निरिड ईडितः ॥४॥ वीतिहोत्रं त्वा कवे द्युमंत
ꣳ समिधीमहि । अग्ने बृहंतमध्वरे ॥५॥ समिदसि सूर्यस्त्वा पुरस्ता स्त्वा
त्पातु कस्याश्चिदभिशस्त्यै ॥ सवितुर्बाहू स्थः ॥६॥ ऊर्णम्रदसं त्वा
स्तृणामि स्वासस्थं देवेभ्यः ॥ आ त्वा वसवो रुद्रा आदित्याः सदंतु
॥७॥ घृताच्यसि जुहूर्नाम सेदं प्रियेण धाम्ना प्रिये सदस्सि सीद ॥

णं

घृताच्यस्युपभृन्नाम सेदं प्रियेण धाम्ना प्रिये सदस्सि सीद ॥ घृता
च्यसि ध्रुवा नाम सेदं प्रियेण धाम्ना प्रिये सदस्सि सीद ॥ प्रियेण धा
म्ना प्रिये सदस्सि सीद ॥८॥ ध्रुवा असदन्नृतस्य योनौ ता विष्णो
पाहि । पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञन्यं ॥९॥ अग्ने वाजजिद्वा
जं त्वा सरिष्यंतं वाजजितꣳ संमार्ज्मि ॥ नमो देवेभ्यः स्वधा पितृभ्यः
सुयमे मे भूयास्तं ॥१०॥ अस्कन्नमद्याज्यं देवेभ्यः संभ्रियासं ॥ अंघ्रि
णा विष्णो मा त्वावक्रमिषं ॥११॥ वसुमतीमग्ने ते छायामुपस्थेषं वि
ष्णोस्थानमसि ॥ इत इंद्रो वीर्यमकृणोदूर्ध्वोध्वर आस्थात् ॥१२॥ अ
ग्ने वेर्होत्रं वेर्दूत्यं ॥ अवतां त्वा द्यावापृथिवी अव त्वं द्यावापृथिवी ॥१३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्विष्टकृद्देवेभ्य इन्द्र आज्येन हविषा भूत्स्वाहा ॥ सं ज्योतिषा ज्यो
तिः ॥१४॥ अत्र पितरो मादयध्वं यथाभागमावृषायध्वं ॥ अमीमदन्त
पितरो यथाभागमावृषायिषत ॥१५॥ उपहूता पृथिवी मातोप मां पृ
थिवी माता ह्वयतां ॥ अग्निराग्नीध्रात्स्वाहा ॥१६॥ उपहूतो द्यौष्पितो
प मां द्यौष्पिता ह्वयतां ॥ अग्निराग्नीध्रात्स्वाहा ॥१७॥ मयीदमिन्द्र इं
द्रियं दधात्वस्मान्रायो मघवानः सचंतां ॥ अस्माकꣳ संत्वाशिषः स
त्या नः संत्वाशिषः ॥ अग्ने वाजजिद्वाजं त्वा ससृꣳसं वाजजितꣳ सं
मार्ज्मि ॥१८॥ देव सवितरेतं त्वा वृणते बृहस्पतिं ब्रह्माणं ॥ तदहं
मनसे प्रब्रवीमि ॥१९॥ मनो गायत्र्यै गायत्री त्रिष्टुभे त्रिष्टुब्जगत्यै ज

गत्यनुष्टुभे ॥ अनुष्टुप्प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यः ॥२०॥
बृहस्पतिर्देवानां ब्रह्माहं मनुष्याणां ॥ भूर्भुवः स्वर्निरस्तः पाप्मेद
महं बृहस्पते सदसि सीदामि ॥२१॥ मित्रस्य त्वा चक्षुषा प्रतीक्षे ॥
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां ॥ प्रतिगृह्णा
मि पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थे ॥ देवस्य त्वा सवि
तुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां ॥२२॥ आददे ॥ अग्नेष्ट्वास्ये
न प्राश्नामि बृहस्पतेर्मुखेन ॥ याअस्यां तद्देवतास्ताद्रदꣳ हमयं
तु ॥२३॥ स्वाहा ॥ घृतं जठरमिन्द्रस्य गच्छ ॥ ह्रासि नाम मा मा संपृक्था
पुर्धमेनाभेः सिद ॥२४॥ इन्द्रस्य त्वा ॥ जठरे सादयामि ॥ प्रजापते

॥१२॥

र्गोस्यूर्ज्जस्वान् पयस्वान् ॥२५॥ प्राणापानौ मे पाहि समानव्या
नौ मे पाहि उदानव्यानौ मे पाहि। ऊर्गस्यूर्ज्जं मयि धेह्यक्षितिरसि मा
मे क्षेष्ठा अमुत्रामुष्मिंल्लोके इह च ॥२६॥ एषा ते अग्ने समित्तया वर्द्ध
स्व चा च प्यायस्व। वर्द्धिषीमहि च वयमा च प्यासिषीमहि ॥२७॥ ए
तं ते [illegible] देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे। तेन यज्ञमव तेन य
ज्ञपतिं तेन मामव ॥२८॥ मनो ज्योतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञ
मिमं तनोतु। अरिष्टं यज्ञꣳ समिमं दधातु विश्वे देवास इह मादयन्ता
मों प्रतिष्ठ ॥२९॥ अग्नीषोमयोरुज्जितिमनूज्जेषं वाजस्य मा प्रसवे
न प्रोहामि। अग्नीषोमौ तमपनुदतां योस्मान् द्वेष्टि यं च वयं द्विष्मो वा

॥१२॥

जस्यैनं प्रसवेनापोहामि। इन्द्राग्न्योरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन
प्रोहामि। इन्द्राग्नी तमपनुदतां योस्मान् द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रस
वेनापोहामि ॥३०॥ वसुभ्यस्त्वा रुद्रेभ्यस्त्वादित्येभ्यस्त्वा। संजानाथां द्यावापृथि
वी मित्रावरुणौ त्वा वृष्ट्यावतां ॥३१॥ व्यन्तु वयोक्तꣳ रिहाणा मरुतां पृष
तीर्गच्छ। वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावह ॥३२॥ चक्षुष्पा
अग्नेसि चक्षुर्मे पाहि। यं परिधिं पर्यधत्था अग्ने देव पणिभिर्गुह्यमानः ॥३३॥
तं त एतमनु जोषं भराम्येष नेत्त्वदपचेतयातै। अग्नेः प्रियं पाथोपीतं ॥३४॥
संस्रवभागा स्थेषा बृहन्तः प्रस्तरेष्ठाः परिधेयाश्च देवाः। इमां वाचम
भि विश्वे गृणन्त आसद्यास्मिन् [illegible] बर्हिषि मादयध्वꣳ स्वाहा वाट् ॥ घृता

प

चीस्छाधु यौं पात श् सुम्नस्य: सुम्ने मा धत्तं ॥२४॥ अग्ने दब्धायो शीतम
पाहि मा दिद्योः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्यै ॥ अविषं नः
पितुं कृणु सुषदा योनौ स्वाहा वाट् ॥२६॥ अग्नये संवेशपतये स्वाहा स
रस्वत्यै यशोभगिन्यै स्वाहा ॥ उलूखले मुसले यच्च शूर्पे आशिश्लेष
दृषदि यत्कपाले ॥२७॥ उमुषोवि प्रुषः ॥ संजुहोमि सस्याः संतु यजमान
स्य कामा मानस्य कामाः स्वाहा ॥ आप्यायतां ध्रुवा हविषाघृतेन यज्ञं य
ज्ञं प्रतिदेवयद्भ्यः ॥ सूर्या या उधो अदित्या उपस्थ उरुधारा पृथिवी यज्ञे अ
स्मिन् ॥२८॥ देवा गातुविदो गातुं वित्वा गातुमित ॥ मनसस्पत इमं देव
यज्ञं स्वाहा वाते धाः ॥२९॥ सं बर्हिः ॥ रंक्तां हविषा घृतेन समादित्यै

र्वसुभिः सं मरुद्भिः ॥ समिंद्रो विश्वदेवेभिरङ्क्तां दिव्यं नभो गच्छतु यत्स्वा
हा ॥२०॥ कस्त्वा विमुंचति स त्वा विमुंचति कस्मै त्वा विमुंचति तस्मै त्वा वि
मुंचति ॥ पोषाय रक्षसां भागोसि ॥२१॥ वेषोस्युपवेषादिषतां गृहीकाउ
पवेविद्धि ॥ वेच्तां अग्ने सुभगाधारये ह ॥२२॥ अरुध्रः वः स्र्णया ॥ अनेपा
क्नो यथा सन् ॥ जुहोमि त्वा सुभगा सौभगाय पुरूजमं पुरुहूतं श्रवस्य
न् ॥२३॥ संवर्च्चसा पयसा सं तनूभिरगन्महि मनसा सं शिवेन ॥
त्वष्टा सुदत्रो विदधातु रायोनुमार्ष्टु तन्वो यद्विलिष्टं ॥२४॥ यज्ञं राच
तउपच ॥ शिवे मे संतिष्ठ स्वारिष्टे मे संतिष्ठस्व स्विष्टे मे संतिष्ठस्व ॥
॥२५॥ दिवि विष्णुर्व्यक्रंश्त जागतेन छंदसा ततो निर्भक्तः ॥ योस्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१९१

द्वेष्टि यंच वयंद्विष्मः॥अंतरिक्षेविष्णुर्व्यक्रंस्तत्रैष्टुभेनछंदसाततो
निर्भक्तः॥योस्मांद्वेष्टि यंच वयंद्विष्मः॥पृथिव्यांविष्णुर्व्यक्रंस्तगा
यत्रेणछंदसाततोनिर्भक्तः॥योस्मांद्वेष्टि यंचवयंद्विष्मः॥२६॥अस्मा
दन्नादस्यैप्रतिष्ठाया अगान्मस्वः॥संज्योतिषाभूम॥२७॥स्वयंभूर
सिश्रेष्ठोरश्मिर्वर्च्चोदाअसिवर्च्चोमेदेहि॥सूर्यस्यावृतमन्वावर्त्ते॥
२८॥अग्नेगृहपतेसुगृहपतिरहंत्वयागृहपत्याभूयासं॥सुगृहप
तिस्त्वंमयागृहपत्याभूयाः॥२९॥अस्थूरिणौगार्हपत्यानिसंतुशतं
हिमाः॥तिग्मेननसेतजसासंशिशाधिसूर्यस्यावृत्तेमन्वावर्त्ते॥३०॥
ऊरुविष्णोविक्रमस्वोरुक्षयायनस्कृधि॥घृतंघृतयोनेपिबप्रप्रय

भूर्भुवःस्वर्द्यौरिवभूम्नाभूमिरिववरिम्णा॥तस्यास्तेपृथिविदेवयज
निपृष्ठेग्निमन्नादमन्नाद्यायादधे॥३॥आयंगौःपृश्निरक्रमीदसद
न्मातरंपुरः॥पितरंचप्रयन्त्स्वः॥४॥अंतश्चरतिरोचनास्यप्राणाद
पानती॥व्यख्यन्महिषोदिवं॥५॥त्रिंशद्धामविराजतिवाक्पतंगायधी
यते॥प्रतिवस्तोरहद्युभिः॥६॥अग्निंज्योतिषंत्वावायुमतीप्राणवतीं॥स्व
र्ग्यायस्वर्गायोपदधामिभास्वतीं॥अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहा॥९॥
सूर्यंज्योतिषंत्वावायुमतीप्राणवतीं॥स्वर्ग्यायस्वर्गायोपदधामिभास्व
तीं॥सूर्योज्योतिर्ज्योतिःसूर्यःस्वाहा॥१०॥ सजूर्देवेनसवित्रासजू
रात्र्येंद्रवत्या॥जुषाणोअग्निर्वेतुस्वाहा॥११॥सजूर्देवेनसवित्रासजू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१३॥

रुषसेंद्रवत्या॥ जुषाणः सूर्यो वेतु स्वाहा॥१२॥ इह पुष्टिं पुष्टिपतिर्दधात्वि
ह प्रजाश्च रमयतु प्रजापतिः॥ अग्नये गृहपतये रयिमते पुष्टिपतये स्वा
हा॥ अग्नयेन्नादायान्नपतये स्वाहा॥१३॥ अग्न मित्रं मे अघरागानमि
त्रमुदवृधि॥ इन्द्रानमित्रं पश्चान्मे नमित्रं पुरस्कृधि॥ इन्द्रः पश्चादिंद्रः
पुरस्तादिंद्रो अस्माँ अभिपातु विश्वतः॥ इन्द्रा जिघांश्च सतां मनांश्च सि
विषूचीनाव्यस्य तात॥१४॥ समिदसि समिद्धो मे अग्ने दीदिहि॥ स
मेद्धा ते अग्ने दीद्यासं॥१५॥ उप प्रयंतो अध्वरं मंत्रं वोचेमाग्नये॥ आ
रे अस्मे च शृण्वते॥१६॥ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयं॥
अपां रेतांसि जिन्वति॥१७॥ उभा वामिंद्राग्नी॥ आहुवध्या उभा

॥१३॥

राधसः सह मादयध्यै॥ उभा दाताराविषां रयीणामुभा वाजस्य सातये हु
वे वां॥१८॥ अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः॥ तं जानन्नग्न आरो
हाथा नो वर्द्धया रयिं॥१९॥ अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो
अध्वरेष्वीड्यः॥ यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशे वि
शे॥२०॥ अस्य प्रत्नामनु द्युतं शुक्रं दुदुह्रे अह्रयः॥ पयः सहस्रसामृषिं॥
॥२१॥ तनूपा अग्नेसि तन्वं मे पाह्यायुर्दा अग्ने स्यायुर्मे देहि॥ वर्चो
दा अग्नेसि वर्चो मे देहि॥२२॥ अग्ने यन्मे तन्वा ऊनं तन्म आपृण॥ इंधा
नास्त्वा शतं हिमा द्युमंतं समिधीमहि॥२३॥ वयस्वंतो वयस्कृतं स
हस्वंतः सहस्कृतं॥ अग्ने सपत्नदंभनमदब्धासो अदाभ्यं॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चित्रावसोस्वस्तितेपारमशीय॥ संत्वमग्नेसूर्यस्यवर्च्चसागथाः समृषी
णाᳪंस्तुतेन॥२५॥ संप्रियेणधाम्नासमहमायुषासंवर्च्चसासंप्रजयासᳪं
रायस्पोषेणग्मिषीय॥ अंधस्थान्धोवोभक्षीयमहः स्थमहोवोभक्षीय
॥२६॥ ऊर्ज्जःस्थोर्ज्जंवोभक्षीयरायस्पोषस्थरायस्पोषंवोभक्षीय॥ रेव
तीरमध्वमस्मिन्योनावस्मिन्गोष्ठेस्मिन्क्षयेस्मिंल्लोके॥२७॥ इहैवस्ततो
मापगात॥ सᳪंहितासिविश्वरूप्यूर्ज्जामाविशगौपत्येन॥२८॥ उपत्वाग्ने
दिवेदिवेदोषावस्तर्द्धियावयं॥ नमोभरंतएमसि॥२९॥ राजंतमध्वराणां
गोपामृतस्यदीदिविं॥ वर्द्धमानᳪंस्वेदमे॥३०॥ सनःपितेवसूनवेग्नेसू
पायनोभव॥ सचस्वानःस्वस्तये॥३१॥ अग्नेत्वन्नोअंतमउतत्राताशि

वोभवावरूथ्यः॥ वसुरग्निर्वसुश्रवाअच्छानक्षिद्युमत्तमᳪंरयिंदाः॥३२॥
तंत्वाशोचिष्ठदीदिवः सुम्नायनूनमीमहेसखिभ्यः॥ सनोबोधिश्रुधी
हवमुरुष्याणोअघायतः समस्मात्॥३३॥ इडएह्यदितएहिकाम्याएहि॥
मयिवःकामधरणंभूयात्॥३४॥ सोमानᳪंस्वरणंकृणुहिब्रह्मणस्प
ते॥ कक्षीवंतंयऔशिजः॥३५॥ योरेवान्योअमीवहावसुवित्पुष्टिव
र्द्धनः॥ सनःसिषक्तुयस्तुरः॥३६॥ मानःशᳪंसोअररुषोधूर्त्तिःप्र
णङ्मर्त्यस्य॥ रक्षाणोब्रह्मणस्पते॥३७॥ महित्रीणामवोस्तुद्युक्षंमि
त्रस्यार्यम्णः॥ दुराधर्षंवरुणस्य॥३८॥ नहितेषाममाचननाध्वसु
वारणेषु॥ ईशेरिपुरघशᳪंसः॥३९॥ तेहिपुत्रासोअदितेःप्रजीव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सम्रायाय ॥ ज्योतिर्यच्छतायजस्त्रं ॥३४॥ वृ सा च न स्मरी रसि नेंद्रस्य श्वसि
दाशुषे ॥ कुपोपेन्द्रमघवन्भूयङ्गुते दानं देवस्य पच्यते ॥३४॥ तत्स
वितुर्वरेण्यं भर्गो देवस्य धीमहि ॥ धियो यो नः प्रचोदयात् ॥३५॥
परि ते दूडभो रथोस्माँ अश्नोतु विश्वतः ॥ येन रक्षसि दाशुषः ॥ सम्रि
प्रोमा समर्द्धय प्रजया च धनेन च ॥३७॥ भूर्भुवः स्वः सुप्रजाः प्रजयाभू
यासं ॥ सुवीरो वीरैः सुपोषः पोषैः ॥३८॥ नर्य्य प्रजां मे पाहि शंस्य पशू
न्मे पाहि ॥ आगन्म विश्ववेदसमस्मभ्यं वसुवित्तमं ॥३९॥ अग्ने सम्राड
भि द्युम्नमभि सह आयच्छस्व ॥ अयमग्निर्गृहपतिर्गार्हपत्यः प्रजा
या वसुवित्तमः ॥४०॥ अग्ने गृहपते भि द्युम्नमभि सह आयच्छस्व ॥

गृहा मा बिभीत मा वेपध्वमूर्ज्जं बिभ्रत एमसि ॥४१॥ ऊर्ज्जं बिभ्रद्वः सु
मनाः सुमेधा गृहानैमि मनसा मोदमानः ॥ येषामध्येति प्रवसन्येषु सौ
मनसो बहुः ॥४२॥ गृहानुपह्वयामहे ते नो जानन्तु जानतः ॥ उपहूता इह गा
व उपहूता अजावयः ॥४३॥ अथो अन्नस्य कीलाल उपहूतो गृहेषु नः ॥
क्षेमाय वः शान्त्यै प्रपद्ये ॥ शिवं शग्मं शंयोः शंयोः ॥४४॥ प्रघासिनो
हवामहे मरुतश्च रिशादसः ॥ करम्भेण सजोषसः ॥४५॥ यद्ग्रामे यदरं
ण्ये यत्सभायां यदिन्द्रिये ॥ यदेनश्चकृमा वयमिदं तदवयजामहे स्वाहा ॥
॥४५॥ मो षू ण इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः ॥ महश्चि
दस्य मीढुषो यव्या हविष्मतो मरुतो वन्दते गीः ॥४६॥ अक्रन्कर्म कर्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१६॥

घृतैः सह्यवा चामयोभुवा॥ देवेभ्यः कर्मकृत्वास्तं प्रेत सचाभुवः॥
॥४७॥ अवभृथ निचुंपुण निचेरुरसि निचुंपुणः॥ अव देवैर्देवकृ
तमेनो यासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि॥४८॥ पू
र्णा दर्वि परापत सुपूर्णा पुनरापत॥ वस्नेव विक्रीणावहा इषमूर्जं श
तक्रतो॥४९॥ देहि मे ददामि ते नि मे धेहि नि ते दधे॥ निहारं निहरा
मि ते निहारं निहराणि मे स्वाहा॥५०॥ अक्षन्नमीमदंत ह्यव प्रिया अधू
षत॥ अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजान्विंद्र ते हरी॥
॥५१॥ सुसंदृशं त्वा वयं मघवन्वंदिषीमहि॥ प्र नूनं पूर्णबंधुर स्तुतो
यासि वशाँ अनु योजान्विंद्र ते हरी॥५२॥ मनो न्वाहुवामहे नाराशं

॥१६॥

सेन स्तोमेन [illegible]॥ पितॄणां च मं[illegible]न्मभिः॥५३॥ आ न एतु मनः पुनः
क्रत्वे दक्षाय जीवसे॥ ज्योक् च सूर्यं दृशे॥५४॥ पुनर्नः पितरो मनो ददा
तु दैव्यो जनः॥ जीवं व्रातं सचेमहि॥५५॥ वयं सोम व्रते तव
मनस्तनूषु बिभ्रतः॥ प्रजावंतः सचेमहि॥५६॥ एष ते रुद्र भागः स
ह स्वस्राम्बिकया तं जुषस्व स्वाहा॥ एष ते रुद्र भाग आखुस्ते पशुः॥
॥५७॥ अव रुद्रमदीमह्यव देवं त्र्यं[illegible]बकं॥ यथा नो वस्यसस्करद्य
था नः श्रेयसस्करद्यथा नो व्यवसाययात्॥५८॥ भेषजमसि भेष
जं गवेऽश्वाय पुरुषाय भेषजं॥ सुगं मेषाय मेष्यै॥५९॥ त्र्यंबकं [illegible]
यजामहे सुगंधिं पुष्टिवर्द्धनं॥ उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥९७॥

मा म ता॑लू॥६७॥ त्र्यंबकं यजामहे सुगंधिं पतिवेदनं॥ उर्वारुकमिव बंध
नादितो मुक्षीय मामुतः॥६८॥ एतेन रुद्रावसेन परो मूजवतोतीहि॥ अवतत
धन्वा पिनाकावसः कृत्तिवासा अहिंसन्नः शिवोतीहि॥६९॥ वा
जिनां वाजो व तु भक्षो अस्मान्नेतः श्रितस्मस्ते बलाया॥ विश्वेदेवा अभि
पत्संबभूवुस्त न्माधिनोतु प्रजया धनेन॥७०॥ वाज्यहं॥ वाजिनस्या
पहूतरुपहूतस्य भक्षयामि॥ वाजे वाजी भूयासं॥७१॥ सवित्रा प्रसूता
दैव्या आप उदंतु ते तनूं॥ दीर्घायुत्वाय वर्चसे॥७२॥ कश्यपस्य त्र्यायु
षं जमदग्ने स्त्र्यायुषं॥ यद्देवानां त्र्यायुषं तन्नो अस्तु त्र्यायुषं॥७३॥ येन
धाता बृहस्पतेरिंद्रस्य चायुषे वपत्॥ तेन ते वपामि ब्रह्मणा जीवातवे

॥१९७॥

जीवनाय॥७४॥ दीर्घायुत्वाय बलाय वर्चसे॥ सुप्रजास्त्वाय चासा अथो
जीव शरदः शतं॥७५॥ छ॥ समिधाग्निं ८ अग्निर्ज्योतिषं त्वा २ उप प्रयंतः २८
भूर्भुवः स्वः ७ प्रघासिनो ५ पूर्णा दर्वि ३ अक्षन्नमीमदंत ३१ वाजिनां वाजो सप्ताध
नुवाकः ८ वयं ४ सोम ७॥७५॥ छ॥ ॥ हरिः ॐ॥ मू॥१॥ दम॥ तन्मदेवय
जनं पृथिव्या यत्र देवासो अजु षंत विश्वे॥ अस्या माभ्यां ४ सं
तरं तो यजुर्भी रायस्पोषेण समिषा मदेम॥१॥ इमा आपः शमु मे संतु दे
वीरोषधे त्रायस्व स्वधिते मैनं ४ हिंसीः॥ आपो अस्मान्मातरः शुंधयं
तु घृतेन नो घृतप्वः पुनंतु॥२॥ विश्वं ४ हि रिप्रं प्रवहंति देवीरुदिदाभ्यः शु
चिरापूत एमि॥ दीक्षातपसोस्तनूरसि तां त्वा शिवां ४ शग्मां परिदधे भद्रं व

श

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१८॥

र्णपुष्यन॥३॥महीनांपयोसिवर्चोदाअसिवर्चोमेदेहि॥वृत्रस्यकनीनका
सिचक्षुर्दाअसिचक्षुर्मेदेहि॥चित्पतिर्मा पुनातुवाक्पतिर्मा पुनातुदेवोमा
सविता पुनात्वच्छिद्रेणपवित्रेणसूर्यस्यरश्मिभिः॥तस्यतेपवित्रपतेपवि
त्रपूतस्ययत्कामःपुनेतच्छकेयं॥४॥आवोदेवासईमहेवामंप्रयत्यध्वरे॥
आवोदेवासआशिषोयज्ञियासोहवामहे॥५॥स्वाहायज्ञंमनसःस्वा
होरोरंतरिक्षात्॥स्वाहाद्यावापृथिवीभ्यांस्वाहावातादारभे॥६॥आकू
त्यैप्रयुजेग्नयेस्वाहामेधायैमनसेग्नयेस्वाहादीक्षायैतपसेग्नयेस्वाहा
सरस्वत्यैपूष्णेग्नयेस्वाहा॥आपोदेवीर्बृहतीर्विश्वशंभुवोद्यावापृथिवी
उर्वंतरिक्ष॥बृहस्पतयेहविषाविधेमस्वाहा॥८॥विश्वोदेवस्यनेतुर्म

ति

॥१८॥

र्तोवुरीतसख्यं॥विश्वोरायइषुध्यतिद्युम्नंवृणीतपुष्यसेस्वाहा॥९॥ऋक्सा
मयोःशिल्पेस्थस्तेवामारभेतेमापातं॥आस्ययज्ञस्योदृचः॥१०॥शर्मा
सि॥शर्ममेयच्छनमस्तेअस्तुमामाहिंसीः॥ऊर्गस्यांगिरस्यूर्णम्रदाऊ
र्जंमेयच्छ॥११॥सोमस्यनीविरसिविष्णोःशर्मासिशर्मयजमानस्य॥
इंद्रस्ययोनिरसिसुसस्याःकृषीस्कृधि॥१२॥उच्छ्रयस्ववनस्पतऊर्ध्वोमा
पाह्यंहसः॥आस्ययज्ञस्योदृचः॥१३॥व्रतंकृणुत॥व्रतंकृणुत॥अग्नि
र्ब्रह्माग्निर्यज्ञोवनस्पतिर्यज्ञियः॥१४॥दैवींधियंमनामहेसुमृडीकाम
भिष्टये॥वर्चोधांयज्ञवाहसंसुतीर्थानोअसद्वशे॥१५॥येदेवामनोजा
तामनोयुजोदक्षक्रतवः॥तेनोवंतुतेनःपांतुतेभ्यःस्वाहा॥१६॥श्वात्राःपीता

व्रतंकृणुत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१२॥

भवत यूयमापो अस्माकमन्तरुदरे सुशेवाः ॥ ता अस्मभ्यमयक्ष्मा अनमी
वा अनागसः स्वदन्तु देवीरमृता ऋतावृधः ॥१२॥ इयं ते यज्ञिया तनूर
पो मुंचामि न प्रजां ॥ अंहोमुचः स्वाहाकृताः पृथिवीमाविशत पृथिव्या सं
भव ॥१३॥ अग्ने त्वꣳ सु जागृहि वयꣳ सु मंदिषीमहि ॥ रक्षा णो अप्रयुच्छन्प्रबुधे
नः पुनस्कृधि ॥१४॥ पुनर्मनः पुनरायुर्म आगात्पुनश्चक्षुः पुनः श्रोत्रं म
आगात् ॥ पुनः प्राणः पुनरात्मा म आगात् ॥ वैश्वानरो अदब्धस्तनूपा
अग्निर्नः पातु दुरितादवद्यात् ॥१५॥ त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा ॥
त्वं यज्ञेष्वीड्यः ॥१६॥ रास्वेयत्सोमा भूयो भर ॥ देवो नः सविता वसो
र्दाता वस्वदात् ॥१७॥ एषा ते शुक्र तनूरेतद्वर्चस्तया सम्भव भ्राजं गच्छ ॥

॥१२॥

२

नि

जूरसि धृता मनसा जुष्टा विष्णवे ॥१८॥ तस्यास्ते सत्यसवसः प्र
सवे तनुवो यंत्रमशीय स्वाहा ॥ चन्द्रमसि शुक्रमस्यमृतमसि वैश्व
देवमसि ॥१९॥ चिदसि मनासि धीरसि दक्षिणासि क्षत्रियासि
यज्ञियास्यदितिरस्युभयतःशीर्ष्णी ॥ सा नः सुप्राची सुप्रतीची
भव ॥२०॥ मित्रस्त्वा पदि बध्नीतां पूषाध्वनस्पात्विंद्रायाध्यक्षा
य ॥ अनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योनु सखा स
यूथ्यः ॥२१॥ सा देवि देवमच्छेहीन्द्राय सोमꣳ रुद्रस्त्वा वर्त्तयतु
स्वस्ति सोमसखा पुनरेहि ॥२२॥ छ ॥ ॥ वस्व्यस्यदितिरस्या
दित्यासि रुद्रासि चन्द्रासि ॥ बृहस्पतिष्ट्वा सुम्ने रम्णातु रुद्रो व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२०॥

वसुभिरा चक्रे ॥२२॥ अदित्यास्त्वा मूर्द्धन्नाजिघर्मि देवयजने पृ
थिव्याः ॥ इडायास्पदमसि घृतवत्स्वाहा ॥२३॥ अस्मे रमस्वास्मे
ते बन्धुः ॥ त्वे रायो अस्मे रायः ॥२४॥ मा वयꣳ रायस्पोषेण वि
यौष्म तोतो रायः ॥ समख्ये देव्या धिया सन्दक्षिणयोरुचक्षसा ॥ मा
म आयुः प्रमोषीर्मो अहं तव वीरं विदेय तव देवि सन्दृशि ॥२५॥
एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भाग इति
मे सोमाय ब्रूतात् ॥ एष ते जागतो भाग इति मे सोमाय ब्रूताच्छं
दोमानानाꣳ साम्राज्यङ्गच्छतादिति मे सोमाय ब्रूतात् ॥२६॥ अ
स्माकोसि शुक्रस्ते ग्रह्यः ॥ विचितस्त्वा विचिन्वन्तु ॥२७॥ अ

८

भि त्यं देवꣳ सवितारमोण्योः कविक्रतुमर्चामि सत्यसवꣳ र
त्नधामभि प्रियं मतिं कविम् ॥ ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्स वी
मनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः ॥३०॥ प्रजाभ्यस्त्वा ॥
प्रजास्त्वानुप्राणन्तु ॥ प्रजास्त्वमनुप्राणिहि ॥३१॥ चन्द्रं त्वा चैन्द्रे
ण क्रीणामि शुक्रꣳ शुक्रेणामृतममृतेन ॥ सग्मे ते गोरस्मे ते च
न्द्राणि ॥३२॥ तपसस्तनूरसि प्रजापतेर्वर्णः ॥ परमैप शुनाक्रीय
से सहस्रपोषम्पुषेयम् ॥३३॥ मित्रो न एहि सुमित्रध इन्द्रस्योरु
मा विश दक्षिणम् ॥ उशन्नुशन्तꣳ स्योनः स्योनम् ॥३४॥ स्वान भ्राजा
ङ्घारे बम्भारे हस्त सुहस्त कृशानो ॥ एते वः सोमक्रयणास्तान्रक्ष

ण ६

॥२४॥

च्छमन्याचोदमन्न॥३१॥ परिमाग्नेदुश्चरिताद्बाधस्वामासुचरितेभ
ज॥ उदायुषास्वायुषोदस्थाममृताँ२अनु॥३२॥ प्रतिपन्थामपद्महि
स्वस्तिगामनेहसम्॥ येन विश्वाः परिद्विषोवृणक्तिविन्दतेवसु॥
॥३३॥ अदित्यास्त्वा॥ स्यदि॥ त्वैसदआसीद॥ अस्तभ्नाद्यामृष
भो अन्तरिक्षममिमीतवरिमाणम्पृथिव्याः॥ आसीदद्विश्वा
भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानि॥३४॥ वनेषुव्यन्त
रिक्षन्ततान वाजमर्व्वत्सु पयउस्रियासु॥ हृत्सुक्रतुं वरुणो विक्ष्व
ग्निन्दिवि सूर्य्यमदधात्सोममद्रौ॥३५॥ सूर्यस्य चक्षुरारोहाग्नेर
क्ष्णः कनीनकम्॥ यत्रैतशेभिरीयसे भ्राजमानो विपश्चिता॥३६॥

॥२४॥

उस्याएतां च्छ धूर्व्वाहौ युज्येथामनश्रू अवीरहणौ ब्रह्मचोदनौ॥ स्वस्ति
यजमानस्य गृहान्गच्छतम्॥३७॥ भद्रो मेऽसि प्रच्यवस्व भुवस्पते
विश्वान्यभिधामानि॥ मात्वा परिपरिणो विदन्मात्वा परिपन्थिनो
विदन्मात्वा वृका अघायवो विदन्॥ श्येनो भूत्वा परापत यजमानस्य
गृहान्गच्छ तन्नौ संस्कृतम्॥३८॥ नमो मित्रस्य। वरुणस्य
चक्षसे महो देवाय तदृतं सपर्य्यत॥ दूरेदृशे देवजाताय केत
वे दिवस्पुत्राय सूर्य्याय शंसत॥३९॥ वरुणस्योत्तम्भनमसि
वरुणस्य स्कम्भसर्ज्जनीस्थः॥ वरुणस्यऋतसदन्यसि वरुण
णस्यऋतसदनमसि वरुणस्यऋतसदनमासीद॥४०॥ याते

१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम्॥ गयस्फानः प्रतरणस्सुवीरोवीरहा प्रचरा सोम दुर्य्यान्॥३७॥१०॥ दशानुवाकेषु नवचत्वारिंशत्कण्डिकाः॥ इति शुक्लयजुः माध्यन्दिनसंहितायां चतुर्थोध्यायः॥४॥

॥छ॥ ॥हरिः ॐ॥ अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि विष्णवे त्वा॥ अतिथेरातिथ्यमसि विष्णवे त्वा श्येनाय त्वा सोमभृते विष्णवे त्वाग्नये त्वा रायस्पोषदे विष्णवे त्वा॥१॥ अग्नेर्ज्जनित्रमसि वृषणौ स्थः॥ उर्वश्यस्यायुरसि पुरूरवा असि॥ गायत्रेण त्वा छन्दसा मन्थामि त्रैष्टुभेन त्वा छन्दसा मन्थामि जागतेन त्वा छन्दसा मन्थामि॥२॥ भवतन्नः॥ समनसौ सचेतसावरेपसौ॥ मा यज्ञꣳ हिꣳसिष्टम्मा यज्ञपतिञ्जातवेदसौ शिवौ भवतमद्य नः॥३॥ अग्नावग्निश्चरति प्रविष्ट ऋषीणाम्पुत्रो अभिशस्तिपावा॥ स नः स्योनस्सुयजा यजेह देवेभ्यो हव्यꣳ सदमप्रयुच्छन्त्स्वाहा॥४॥ आपतये त्वा गृह्णामि परिपतये त्वा गृह्णामि॥ तनूनप्त्रे शाक्वराय शक्मन्न ओजिष्ठाय॥५॥ अनाधृष्टमस्यनाधृष्यन्देवानामोजः॥ अनभिशस्त्यभिशस्तिपा अनभिशस्तेन्यम्॥६॥ अञ्जसा सत्यमुपगेषꣳ स्विते मा धाः॥ अग्ने व्रतपास्त्वे व्रतपाः॥७॥ या तव तनूरियꣳ सा मयि या मम तनूरेषा सा त्वयि॥ सह नौ व्रतपते व्रतान्यनु मे दीक्षान्दीक्षापतिर्म्मन्यतामनु तपस्तपस्पतिः॥८॥ अꣳशुरꣳशुष्टे देव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोमाप्यायताम्मिन्द्रायैकधनविदे॥ आतुभ्यमिन्द्रः प्यायतामात्वमिन्द्रायप्यायस्व॥ आप्याययास्मान्त्सखीन्त्सन्यामेधया॥ स्वस्तितेदेवसोमसुत्यामुदृचमशीय॥७॥ एष्टारायः प्रेषेभगाय॥ ऋतमृतवादिभ्योनमोदिवेनमः पृथिव्यै॥७॥ यातेअग्नेयःशयातनूर्वर्षिष्ठागह्वरेष्ठा॥ उग्रंवचोअपावधीत्त्वेषंवचोअपावधीत्स्वाहा॥ यातेअग्नेरजःशयातनूर्वर्षिष्ठागह्वरेष्ठा॥ उग्रंवचोअपावधीत्त्वेषंवचोअपावधीत्स्वाहा॥ यातेअग्नेहरिशयातनूर्वर्षिष्ठागह्वरेष्ठा॥ उग्रंवचोअपावधीत्त्वेषंवचोअपावधीत्स्वाहा॥८॥ तप्तायनीमेसिवित्तायनीमेसि॥ अवतान्माव्यथितमवतान्मानाथितम्॥९॥

विदेरग्निर्नभोनामाग्नेअङ्गिरआयुनानाम्नेहि॥ योस्यांपृथिव्यामसियत्तेनाधृष्टन्नामयज्ञियन्तेनत्वादधे॥ विदेरग्निर्नभोनामाग्नेअङ्गिरआयुनानाम्नेहि॥ योद्वितीयस्यांपृथिव्यामसियत्तेनाधृष्टन्नामयज्ञियन्तेनत्वादधे॥ विदेरग्निर्नभोनामाग्नेअङ्गिरआयुनानाम्नेहि॥ यस्तृतीयस्यांपृथिव्यामसियत्तेनाधृष्टन्नामयज्ञियन्तेनत्वादधे॥ अनुत्वादेववीतये॥ सिंह्यसिसपत्नसाहीदेवेभ्यःकल्पस्वसिंह्यसिसपत्नसाहीदेवेभ्यःशुन्धस्वसिंह्यसिसपत्नसाहीदेवेभ्यःशुम्भस्व॥१०॥ इन्द्रघोषस्त्वावसुभिःपुरस्तात्पातुप्रचेतास्त्वारुद्रैःपश्चात्पातु॥ मनोजवो

व्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२४॥ त

स्त्वां पितृभिर्दक्षिणतः पातु विश्वकर्मा त्वादित्यैरुत्तरतः पातु ॥
॥११॥ इदमहं तप्तं वार्बहिर्द्धा यज्ञान्निःसृजामि ॥ सिंहास्यसि
स्वाहा सिंहास्यादित्यवनि स्वाहा ॥१२॥ सिंहास्यसि ब्रह्मवनिः
क्षत्रवनिः स्वाहा सिंहास्यसि सुप्रजावनी रायस्पोषवनिः स्वा
हा ॥ सिंहास्यावह देवान्यजमानाय स्वाहा भूतेभ्यस्त्वा ॥१३॥
ध्रुवोसि पृथिवीं दृंह ध्रुवक्षिदस्यन्तरिक्षं दृंह ॥ अ
च्युतक्षिदसि दिवं दृंह ॥ अग्नेः पुरीषमसि ॥१४॥
युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ॥

॥२४॥

वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥१५॥
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्य पांसुरे
स्वाहा ॥१६॥ इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दश
स्या ॥ व्यस्कभ्नाद्रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयू
खैः स्वाहा ॥१७॥ देवश्रुतौ देवेष्वा घोषतम् ॥ प्राची प्रेतमध्वरं
कल्पयन्ती ऊर्ध्वं यज्ञं नयतं मा जिह्वरतम् ॥१८॥ स्वं गोष्ठमा
वदतं देवी दुर्य्ये आयुर्मा निर्वादिष्टं प्रजां मा निर्वादिष्टम् ॥
अत्र रमेथां वर्ष्मन्पृथिव्याः ॥१९॥ विष्णोर्नुकं वीर्याणि प्रवोचं
यः पार्थिवानि विममे रजांसि ॥ यो अस्कभायदुत्तरꣳ स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२५॥

यस्यंविचक्रमाणस्त्रेधोरुगायोविष्णवेत्वा॥१८॥ दिवोवावि
ष्णउतवापृथिव्यामहोवाविष्णउरोरन्तरिक्षात्॥ उभाहिहस्ता
वसुनापृणस्वाप्रयच्छदक्षिणादोतसव्याद्विष्णवेत्वा॥१९॥ प्र
तत्॥ विष्णुस्तवतेवीर्य्येणमृगोनभीमःकुचरोगिरिष्ठाः॥
यस्योरुषुत्रिषुविक्रमणेष्वधिक्षियन्तिभुवनानिविश्वा
॥२०॥ विष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसि
विष्णोर्ध्रुवोसि॥ वैष्णवमसिविष्णवेत्वा॥२१॥ देवस्य
त्वासवितुःप्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम्॥ आददे
नार्यसीदमहꣳरक्षसोग्रीवाअपिकृन्तामि॥ बृहन्नसिबृहद्र

॥२५॥

वाबृहतीमिन्द्रायवाचंवद॥ रक्षोहणंवलगहनंवैष्णवीम्॥२२॥
इदमहन्तंवलगमुद्वपामियन्नोनिष्ट्योयममात्योनिचखान॥ इदम
हन्तंवलगमुद्वपामियन्नस्समानोयमसमानोनिचखान॥ इदम
हन्तंवलगमुद्वपामियन्नःसबन्धुर्य्यमसबन्धुर्न्निचखान॥ इदमहन्तं
वलगमुद्वपामियन्नःसजातोयमसजातोनिचखानोत्कृत्याङ्किरामि
॥२३॥ स्वराडसि॥ सपत्नहासत्रराडस्यभिमातिहा॥ जनराडसि
रक्षोहासर्वराडस्यमित्रहा॥२४॥ रक्षोहणोवलगहनः॥ प्रोक्षामि
वैष्णवान्रक्षोहणोवलगहनोवनयामिवैष्णवान्॥ रक्षोहणोव
लगहनोवस्तृणामिवैष्णवान्॥ रक्षोहणोवलगहना॥ उप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२६॥

दधामि वैष्णवी रक्षोहणौ वलगहनौ पर्य्यूहामि वैष्णवी। वैष्णव
मसि वैष्णवाः स्थ॥२५॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्ब्बाहुभ्यां
म्पूष्णो हस्ताभ्याम्॥ आददे नार्य्यसीदमहꣳ रक्षसो ग्रीवा अपि कृ
न्तामि॥ यवोसि यवयास्मद्द्वेषो यवयारातीः॥ दिवे त्वान्तरिक्षाय
त्वा पृथिव्यै त्वा॥२६॥ शुन्धन्तां लोकाः पितृषदनाः पितृषदनमसि॥
उद्दिवꣳ स्तभानान्तरिक्षम्पृण दृꣳहस्व पृथिव्याम्॥२७॥ द्युता
नस्त्वा मारुतो मिनोतु मित्रावरुणौ ध्रुवेण धर्म्मणा॥ ब्रह्मवनि
त्वा क्षत्रवनि रायस्पोषवनि पर्य्यूहामि॥२८॥ ब्रह्म दृꣳह। क्ष
त्रन्दृꣳहायुर्दृꣳह प्रजान्दृꣳह॥ ध्रुवासि ध्रुवोऽयं यजमा

न आयतने भूयासम्॥ घृतेन द्यावापृथिवी पूर्य्येथामिन्द्रस्य छदिर
सि विश्वजनस्य छाया॥२९॥ परि त्वा गिर्व्वणो गिर इमा भवन्तु विश्व
तः॥ वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः॥३०॥ इन्द्रस्य स्यूरसी
न्द्रस्य ध्रुवोसि॥ ऐन्द्रमसि वैश्वदेवमसि॥३१॥ विभूरसि प्रवा
हणो वह्निरसि हव्यवाहनः॥ श्वात्रोसि प्रचेतास्तुथोसि विश्ववेदाः
॥३२॥ उशिगसि कविरङ्घारिरसि बम्भारिः॥ अवस्यूरसि
दुवस्वाञ्छुन्ध्यूरसि मार्ज्जालीयः॥३३॥ ऋतधामासि स्वर्ज्ज्योति
स्समुद्रोसि विश्वव्यचाः॥ अजोस्येकपादहिरसि बुध्न्यः॥३४॥
सम्राडसि कृशानुः परिषद्योसि पवमानः॥ नभोसि प्रतक्वामृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२

।।२७।।

ष्ठोसिहव्यसूदनः ।।३३।। समूह्योसि विश्ववेदाऋतस्यप्रति
ष्ठा ।। अग्नयेः सगरास्सगस्स्थ सगरेण नाम्नारोद्रेणानीकेना ।।
पालमाग्नयः पिपृतमाग्नयोनमोवोस्तुमामाहिंसिष्ट ।।३४।।
ज्योतिरसि विश्वरूपं विश्वेषान्देवानां समित् ।। त्वंसोमत
नूकृद्भ्योद्वेषोभ्योन्यकृतेभ्यः ।। उरुयन्तासि वरूथंस्वाहा ।।
जुषाणोअप्तुराज्यस्यवेतुस्वाहा ।।३५।। अग्नेनयासुपथाराये
अस्मान्विश्वानिदेववयुनानिविद्वान् ।। युयोध्यस्मज्जुहुराणमे
नोभूयिष्ठान्तेनमउक्तिं विधेम ।।३६।। अयन्नो अग्निर्वरिवस्कृणो
त्वयम्मृधः पुरएतुप्रभिन्दन् ।। अयंवाजाञ्जयतुवाजसातावय

।।२७।।

ञ्छत्रूञ्जयतुजर्हृषाणः स्वाहा ।।३७।। उरुविष्णोविक्रमस्वो
रुक्षयायनस्कृधि ।। घृतङ्घृतयोनेपिबप्रप्रयज्ञपतिन्तिरस्वाहा ।।
।।३८।। देवसवितरेषतेसोमस्तꣳरक्षस्वमात्वादभन् ।। एतत्त्वन्देव
सोमदेवोदेवाँ२ उपागाः ।।३९।। इदमहम्मनुष्यान्सहरायस्पोषेणस्वा
हा निर्वरुणस्यपाशान्मुच्ये ।। अग्नेव्रतपास्त्वेव्रतपाः ।।४०।। यातव
तनूर्मय्यभूदेषासात्वयियोममतनूस्त्वय्यभूदियꣳसामयि ।।
यथायथन्नौव्रतपतेव्रतान्यनुमेदीक्षान्दीक्षापतिरमꣳस्तानुतप
स्तपस्पतिः ।।४०।।१।। उरुविष्णो ।। विक्रमस्वोरुक्षयायनस्कृधि ।। घृतं
घृतयोनेपिबप्रप्रयज्ञपतिन्तिरस्वाहा ।।४१।। अत्यन्याँ२ अगान्ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२८॥

त्वा

न्यां २ उपोगामम्॥ अर्वाक्त्वा परेभ्यः परोवरेभ्यः॥५२॥ तं त्वा जुषामहे देव वनस्पते देवयज्यायै। देवास्त्वा देवयज्यायै जुषन्तां विष्णवे त्वा॥५३॥ ओषधे त्रायस्व। स्वधिते मैनꣳ हिꣳसीः॥ दिवमग्रेण मा लेखीरन्तरिक्षम्मा हिꣳसीः पृथिव्या सम्भव॥५४॥ अयꣳ हि त्वा स्वधितिस्तेतिजानः प्रणिनाय महते सौभगाय॥ अतस्त्वन्देव वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयꣳ रुहेम॥५५॥१०॥ ॥दशानुवाकेषु पंचपंचाशदृचः॥ ॥इति शुक्लयजुःकाण्वसंहितायां पंचमोध्यायः॥५॥ ॥हरिः॥ ओम्॥ देवस्य त्वा सवितुः

॥२८॥

सु

प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्॥ आददे नार्यसीदमहꣳ रक्षसो ग्रीवा अपिकृन्तामि॥ यवोसि यवयास्मद्द्वेषो यवयारातीः॥ दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा॥ शुन्धन्तां लोकाः पितृषदनाः पितृषदनमसि॥१॥ अग्रेणीरसि स्वावेश उन्नेतॄणामेतस्य वित्तादधि त्वा स्थास्यति॥ देवस्त्वा सविता मध्वानक्तु सुपिप्पलाभ्यस्त्वौषधीभ्यः॥ दिवमग्रेणास्पृक्ष आन्तरिक्षम्मध्येनाप्राः पृथिवीमुपरेणादृꣳहीः॥२॥ या ते धामान्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः॥ अत्राह तदुरुगायस्य विष्णोः परमम्पदमव भारि भूरि॥३॥ ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्यूहामि॥

वी॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२१॥

ब्रह्मदृꣳह क्षत्रन्दृꣳहायुर्दृꣳह प्रजान्दृꣳह ॥३॥ विष्णोः कर्मा
णि ॥ पश्यत यतो व्रतानि पस्पशे ॥ इन्द्रस्य युज्यस्सखा ॥४॥ तद्विष्णोः
परमम्पदꣳ सदा पश्यन्ति सूरयः ॥ दिवीव चक्षुराततम् ॥५॥ प
रिवीरसि ॥ परि त्वा दैवीर्विशो व्ययन्ताम् ॥ परीमं यजमानꣳ रा
यो मनुष्याणाम् ॥ दिवः स्सूनुरस्येष ते पृथिव्यां लोक आरण्यस्ते प
शुः ॥७॥१॥ उपावीरस्युप देवान्दैवीर्विशः प्रागुरुशिजो वह्नितमा
न् ॥ देव त्वष्टर्वसु रम हव्या ते स्वदन्ताम् ॥८॥ रेवती रमध्वं बृहस्प
ते धारया वसूनि ॥ ऋतस्य त्वा देवहविः पाशेन प्रतिमुञ्चामि ध
र्षा मानुषः ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ता

॥२१॥

णा ५

भ्याम् ॥९॥ अग्नीषोमाभ्यां जुष्टन्नियुनज्मि ॥ अद्भ्यस्त्वौषधीभ्यः
प्रोक्षाम्यनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा स
यूथ्यः ॥ अग्नीषोमाभ्यान्त्वा जुष्टम्प्रोक्षामि ॥१०॥ अपाम्पेरुरस्यापो
देवीस्स्वदन्तु ॥ स्वात्तं चित्सद्देवहविः ॥११॥ सन्ते प्राणो वातेन गच्छ
ताꣳ समङ्गानि यजत्रैः ॥ सं यज्ञमान आशिषा ॥१२॥ घृतेनाक्तौ
पशुꣳ त्रायेथाꣳ रेवती यजमाने ॥ प्रियन्धा आविश ॥१३॥ उरोरन्त
रिक्षात्सजूर्देवेन वातेन ॥ अस्य हविषस्त्मना यज समस्य तन्वा भ
व ॥१४॥ वर्षो वर्षीयसि यज्ञे यज्ञपतिन्धाः ॥ स्वाहा देवेभ्यो देवेभ्य
स्स्वाहा ॥ माहिर्भूर्मा पृदाकुः ॥१५॥२॥ नमस्त आतानानर्वा प्रे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३०॥

हि॥ घृतस्य कुल्या उप ऋतस्य पथ्या अनु ॥१६॥ देवीरापः शुद्धा वो
ढ्वं सुपरिविष्टा देवेषु॥ सुपरिविष्टा वयं परिवेष्टारो भूयास्म॥
॥१७॥ वाचं ते शुन्धामि प्राणन्ते शुन्धामि चक्षुस्ते शुन्धामि श्रोत्रन्ते
शुन्धामि॥ नाभिन्ते शुन्धामि मेढ्रन्ते शुन्धामि पायुन्ते शुन्धामि
चरित्रांस्ते शुन्धामि॥१८॥ मनस्त ऽआप्यायतां वाक्त ऽआप्याय
तां प्राणस्त ऽआप्यायतां चक्षुस्त ऽआप्यायतां श्रोत्रन्त ऽआप्या
यताम्॥ यत्ते क्रूरं यदास्थितन्तत्त ऽआप्यायतान्तत्ते निष्ट्याय
तान्तत्ते शुध्यतु शमहोभ्यः॥१९॥ ओषधे त्रायस्व स्वधिते मैनं
हिंसीः॥ रक्षसां भागोऽसि निरस्तं रक्षः॥२०॥ इदमहं

॥३०॥

रक्षोऽभितिष्ठामीदमहं रक्षोऽवबाधे। इदमहं रक्षोऽधमन्त
मो नयामि॥२०॥ घृतेन द्यावापृथिवी प्रोर्णुवाथां वायो वे स्तोका
नाम्॥ अग्निराज्यस्य वेतु स्वाहा॥ स्वाहाकृते ऊर्ध्वनभ
सम्मारुतं गच्छतम्॥२१॥ सन्ते मनो मनसा सम्प्राणः प्राणेन ग
च्छताम्॥ रेडस्यग्निष्ट्वा श्रीणात्वाप[illegible] स्त्वा समरिणन्॥ वा
तस्य त्वा ध्राज्यै पूष्णो रंह्या ऽऊष्मणो व्यथिषत्ः प्रयुतन्द्वे
षः॥२२॥ घृतं घृतपावानः॥ पिबत वसां [illegible] सापावानः पिब
त॥ अन्तरिक्षस्य हविरसि स्वाहा॥२३॥ दिशः प्रदिश ऽआ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिशो प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा॥ ऐन्द्रः प्राणो अङ्गे अङ्गे निदीध्यदैन्द्र उदानो अङ्गे अङ्गे निदीधः॥२०॥ देव त्वष्टर्भूरि ते सꣳसमेतु सलक्ष्मा यद्विषुरूपं भवाति। देवत्रा यन्तमवसे सखायोऽनु त्वा माता पितरो मदन्तु॥२०॥४॥ समुद्रं गच्छ स्वाहा। देवꣳ सवितारं गच्छ स्वाहा॥ अन्तरिक्षं गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहा॥ अहोरात्रे गच्छ स्वाहा छन्दाꣳसि गच्छ स्वाहा॥ द्यावापृथिवी गच्छ स्वाहा सोमं गच्छ स्वाहा॥ यज्ञं गच्छ स्वाहा नभो दिव्यं गच्छ स्वाहा॥ अग्निं वैश्वानरं गच्छ स्वाहा मनो मे हार्दि यच्छ॥२१॥ दिवं ते धूमो गच्छत्वन्तरिक्षं ज्योतिः॥ पृथिवीं भस्मनापृण स्वाहा॥२१॥ मापो मौषधीर्हिꣳसी धाम्नो धाम्नो राजꣳस्ततो वरुण

हा

नो मुञ्च॥ यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च॥२२॥ सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु॥ योऽस्मान्द्वेष्टि यं च वयं द्विष्मः॥२२॥ इदमापः प्रवहत यत्किं च दुरितं मयि॥ यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम्॥२२॥६॥ हविष्मतीरिमा आपो हविष्माꣳ आविवासति॥ हविष्मान्देवो अध्वरो हविष्माꣳ अस्तु सूर्यः॥२३॥ अग्नेर्वोऽपन्नगृहस्य सदसि सादयामि॥ इन्द्राग्न्योर्भागधेयी स्थ मित्रावरुणयोर्भागधेयी स्थ॥ विश्वेषां देवानां भागधेयी स्थ॥२४॥ अमूर्या उप सूर्ये याभिर्वा सूर्यः सह॥ ता नो हिन्वन्त्वध्वरम्॥२४॥६॥ हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा॥ ऊर्ध्वो अध्वरं

न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२२॥

न्दिवि देवेषु होत्रा यच्छ ॥२५॥ सोम राजन्विश्वास्त्वं प्रजा उपावरोह ।
विश्वास्त्वां प्रजा उपावरोहन्तु ॥२६॥ शृणोत्वग्निः ॥ समिधा हवं मे शृण्वन्
त्वापो धिषणाश्च देवीः ॥ श्रोता ग्रावाणो विदुषो न यज्ञꣳ शृणोतु देवः
सविता हवं मे स्वाहा ॥२७॥ देवीरापो अपान्नपाद्यो व ऊर्मिर्हविष्य ।
इन्द्रियावान्मदिन्तमः ॥२८॥ तं देवेभ्यो देवत्रा दत्त शुक्रपेभ्यः ॥ ये
षां भाग स्थ स्वाहा ॥२८॥ कार्षिरसि ॥ समुद्रस्य त्वाक्षित्या उन्न
यामि ॥ समापो अद्भिरग्मत समोषधीभिरोषधीः ॥२८॥ यमग्ने पृ
त्सु मर्त्यमवा वाजेषु यं जुनाः ॥ स यन्ता शश्वतीरिषः स्वाहा ॥२९॥
देवस्य त्वा सवितुः प्रसवे श्विनोर्बाहुभ्यां पूष्णो हस्ता॰ ॥ आ

॥२२॥

आ ददे रावासि गभीरमिममध्वरं कृधीन्द्राय सुषूतमं ॥ उत्तमेन प
विनोर्जस्वन्तं मधुमन्तं पयस्वन्तं ॥ निग्राभ्या स्थ देवश्रुतस्त
र्पयत मा ॥३०॥ मनो मे तर्पयत वाचं मे तर्पयत प्राणं मे तर्पयत
चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयत ॥ आत्मानं मे तर्पयत प्रजां मे त
र्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मा वितृषन् ॥३१॥
इन्द्राय त्वा वसुमते रुद्रवत इन्द्राय त्वादित्यवते ॥ इन्द्राय त्वाभि
मातिघ्ने श्येनाय त्वा सोमभृते ग्नये त्वा रायस्पोषदे ॥३२॥ यत्ते ।
सोम दिवि ज्योतिर्यत्पृथिव्यां यदुरावन्तरिक्षे ॥ तेनास्मै य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३३॥

ळेमानायो रूरायेघ्रध्यधि दात्रे चोच:॥३४॥ श्वात्रास्थ वृत्रतुरो राधो गूर्ता अमृतस्य पत्नीः॥ ता देवीर्देवत्रेमं यज्ञन्नयतोपहूतास्सोमस्य पिबत॥३४॥ मा भेर्मा संविक्था ऊर्जं धत्स्व धिषणे वीड्वी सती वीडयेथामूर्जं दधाथाम्॥ पाप्मा हतो न सोमः॥३५॥ प्रागपागुदगधराक् सर्वतस्त्वा दिश आधावन्तु॥ अम्ब निष्पर समरीर्विदाम्॥३६॥ त्वमंग प्रशंसिषो देवश्शविष्ठ मर्त्यम्॥ न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः॥३७॥८॥ अष्टानुवाकेषु व्योमपंचकं॥ इति शुक्लयजुः माध्यंदिन संहितायां षष्ठोध्यायः॥६॥ ॥हरिः॥ ॐ॥ वाचस्पतये पवस्व वृष्णो अं

॥३३॥

शुभ्यां गभस्तिपूतः॥ देवो देवेभ्यः पवस्व येषां भागोसि॥ मधुमतीर्न इषस्कृधि॥१॥ यत्ते सोमादाभ्यन्नाम जागृवि तस्मै ते सोम सोमाय स्वाहा॥ स्वाहोर्वन्तरिक्षमन्वेमि स्वांकृतोसि विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यः॥ मनस्त्वाष्टु स्वाहा त्वा सुभव सूर्याय देवेभ्यस्त्वा मरीचिपेभ्यो देवांशो यस्मै त्वेडे तत्सत्यमुपरिप्रुता भंगेन हतोसौ फट्॥ प्राणाय त्वा व्यानाय त्वा॥३॥ उपयामगृहीतोस्यन्तर्यच्छ मघवन्पाहि सोमम्॥ उरुष्य रायो एषो यजस्व॥४॥ अन्तस्ते द्यावापृथिवी दधाम्यन्तर्दधाम्युर्वन्तरिक्षम्॥ सजूर्देवेभिरवरैः परैश्चान्तर्यामे मघवन्मादयस्व॥ स्वाहोर्वन्तरिक्षमन्वेमि स्वांकृतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३४॥

सि विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यः ॥ मनस्त्वाष्टु स्वाहा त्वा स्व
भवः सूर्याय । देवेभ्यस्त्वा मरीचिपेभ्य उदानाय त्वा ॥ ५ ॥ २ ॥ आ वायो भू
ष शुचिपा उप नः सहस्रन्ते नियुतो विश्ववार । उपो ते अन्धो मद्यमयामि
यस्य देव दधिषे पूर्वपेयं वायवे त्वा ॥ ६ ॥ इन्द्रवायू इमे सुता उप प्रयोभि
रागतम् । इन्दवो वामुशन्ति हि । उपयामगृहीतोसि वायव इन्द्रवा
युभ्यां त्वैष ते योनिः सजोषोभ्यां त्वा ॥ ७ ॥ ३ ॥ अयं वां मित्रावरु
णा सुतस्सोम ऋतावृधा । ममेदिह श्रुतं हवम् । उपयामगृहीतो
सि मित्रावरुणाभ्यां त्वा ॥ ८ ॥ राया वयं ससवांसो मदेम हव्ये
न देवा यवसेन गावः । तान्धेनुं मित्रावरुणा युवन्नो विश्वाहा धत्त

॥३५॥

मनपस्फुरन्तीम् ॥ एष ते योनिर्ऋतायुभ्यां त्वा ॥ ९ ॥ ४ ॥ या वां कशा
मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम् । उपयामगृही
तोस्यश्विभ्यां त्वैष ते योनिर्माध्वीभ्यां त्वा ॥ १० ॥ ५ ॥ तं प्रत्नथा पूर्व
था विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम् । प्रतीचीनं वृजनन्
न्दोहसे धुनिमाशुञ्जयन्तमनु यासु वर्द्धसे । उपयामगृहीतोसि शण्
डाय त्वा ॥ ११ ॥ एष ते योनिर्वीरतां पाह्यपमृष्टः शण्डो देवास्त्वा शु
क्रपाः प्रणयन्त्वनाधृष्टासि ॥ सुवीरो वीरान्प्रजनयन्परीह्यभि
रायस्पोषेण यजमानम् । सञ्जग्मानो दिवा पृथिव्या शुक्रः शुक्र
शोचिषा निरस्तः शण्डः शुक्रस्याधिष्ठानमसि ॥ १२ ॥ अच्छिन्नस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते । देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्याम ॥ सा प्रथमा
संस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः ॥ १३ ॥ स प्रथ
मो बृहस्पतिश्चिकित्वाँस्तस्मा इन्द्राय सुतमाजुहोत स्वाहा ।
तृम्पन्तु होत्रा मध्वो याः स्विष्टा याः सुप्रीताः सुहुता यत्स्वाहा ॥ १४ ॥ अयं वेन
श्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने । इममपाᳪ संग
मे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति । उपयामगृहीतोसि मर्का
य त्वा ॥ १५ ॥ मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो द्रवन्ता ।
आ यः शर्याभिस्तुविनृम्णो अस्याश्रीणीतादिशं गभस्तौ ॥ १६ ॥
एष ते योनिः प्रजाः पाह्यपमृष्टो मर्को देवास्त्वा मन्थिपाः प्रणयन्त्व

॥३५॥

नाधृष्टासि ॥ सुप्रजाः प्रजाः प्रजनयन्परीह्यभि रायस्पोषेण यज
मानम् ॥ संजग्मानो दिवा पृथिव्या मन्थी मन्थिशोचिषा निरस्तो
मर्को मन्थिनोऽधिष्ठानमसि ॥ १७ ॥ अछिन्नस्य ते । देव सोम सुवी
र्यस्य रायस्पोषस्य ददितारः स्याम ॥ सा प्रथमा संस्कृतिर्विश्व
वारा स प्रथमो वरुणो मित्रो अग्निः ॥ १८ ॥ स प्रथमो बृहस्पतिश्चि
कित्वाँस्तस्मा इन्द्राय सुतमाजुहोत स्वाहा ॥ तृम्पन्तु होत्रा म
ध्वो याः स्विष्टा याः सुप्रीताः सुहुता यत्स्वाहा ॥ १९ ॥ ये देवासो दिव्येकादश
स्थ पृथिव्यामध्येकादश स्थ ॥ अप्सुक्षितो महिनैकादश स्थ ते
देवासो यज्ञमिमं जुषध्वम् ॥ २० ॥ उपयामगृहीतोस्याग्रयणोसि स्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रावणः ॥ पाहि यज्ञम्पाहि यज्ञपतिम् ॥२०॥ विष्णुस्त्वामिन्द्रियेण पातु
विष्णुं त्वम्पाह्यभि सवनानि पाहि ॥ सोमः पवते सोमः पवते सोमः प
वते ॥२१॥ अस्मै ब्रह्मणे पवतेऽस्मै क्षत्राय पवतेऽस्मै सुन्वते यजमानाय प
वते ॥ इष ऊर्जे पवतेऽद्भ्य ओषधीभ्यः पवते द्यावापृथिवीभ्याम्पवते सुभू
ताय पवते ब्रह्मवर्चसाय पवते ॥ विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वे
भ्यस्त्वा देवेभ्यः ॥२२॥ उपयामगृहीतोसीन्द्राय त्वा बृहद्वते वयस्वत
उक्थायुवं गृह्णामि ॥ यत्त इन्द्र बृहद्वयस्तस्मै त्वा विष्णवे त्वैष ते योनि
रुक्थेभ्यस्त्वा ॥२३॥ देवेभ्यस्त्वा देवाव्यं गृह्णामि यज्ञस्यायुषे मि
त्रावरुणाभ्यान्त्वा देवाव्यं गृह्णामि यज्ञस्यायुषे ॥ इन्द्राय त्वा देवाव्यु

वं गृह्णामि यज्ञस्यायुष इन्द्राग्निभ्यान्त्वा देवाव्यं गृह्णामि यज्ञस्या
युषे ॥ इन्द्राय त्वा देवाव्यं गृह्णामि यज्ञस्यायुष इन्द्रावरुणाभ्यान्त्वा
देवाव्यं गृह्णामि यज्ञस्यायुषे ॥ इन्द्राबृहस्पतिभ्यान्त्वा देवाव्यं गृ
ह्णामि यज्ञस्यायुष इन्द्राविष्णुभ्यां त्वा देवाव्यं गृह्णामि यज्ञस्यायु
षे ॥२४॥१॥ मूर्द्धानं दिवो अरतिम्पृथिव्या वैश्वानरमृत आ जातमग्नि
म् ॥ कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः
॥२५॥ उपयामगृहीतोसि ॥ ध्रुवोसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोच्यु
तानामच्युतक्षित्तमः ॥ एष ते योनिर्वैश्वानराय त्वा ॥२६॥ ध्रुवं ध्रु
वेण मनसा वाचा सोममवनयामि ॥ अथा न इन्द्र इद्विशोऽसपत्नाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३८॥

स्समनसस्कृरत ॥२८॥१०॥ यस्ते द्रप्स स्कन्दति यस्ते अꣳशु र्ग्रावच्यु
तो धिषणयोरुपस्थात् ॥ अध्वर्योर्वा परि वायः पवित्रात्तन्तेजु
होमि मनसा वषट्कृतꣳ स्वाहा देवानामुत्क्रमणमसि ॥२६॥११॥ उ
पयामगृहीतोसि मधवे त्वोपयामगृहीतोसि माधवाय त्वा ॥ उप
यामगृहीतोसि शुक्राय त्वोपयामगृहीतोसि शुचये त्वा ॥ उपया
मगृहीतोसि नभसे त्वोपयामगृहीतोसि नभस्याय त्वा ॥ उपया
मगृहीतोसीषे त्वोपयामगृहीतोस्यूर्ज्जे त्वा ॥ उपयामगृहीतोसि
सहसे त्वोपयामगृहीतोसि सहस्याय त्वा ॥ उपयामगृहीतोसि
तपसे त्वोपयामगृहीतोसि तपस्याय त्वा ॥ उपयामगृहीतोस्य

॥३८॥

ꣳहसस्पतये त्वा ॥३०॥१२॥ इन्द्राग्नी आगतꣳ सुतं गीर्भिर्नभो वरे
ण्यम् ॥ अस्य पातं धियेषिता ॥ उपयामगृहीतोसीन्द्राग्निभ्यां त्वै
ष ते योनिरिन्द्राग्निभ्यां त्वा ॥३१॥१३॥ आघा ये अग्निमिन्धते स्तृ
णन्ति बर्हिरानुषक् ॥ येषामिन्द्रो युवा सखा ॥ उपयामगृहीतोस्य
ग्नीन्द्राभ्यां त्वैष ते योनिरग्नीन्द्राभ्यां त्वा ॥३२॥१४॥ ओमासश्चर्ष
णीधृतो विश्वे देवास आगत ॥ दाश्वाꣳसो दाशुषः सुतम् ॥ उप
यामगृहीतोसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा दे
वेभ्यः ॥३३॥ विश्वे देवास आगत शृणुता म इमꣳ हवम् ॥ एदं ब
र्हिर्निषीदत ॥ उपयामगृहीतोसि विश्वेभ्यस्त्वा देवेभ्य एष ते यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३८॥

निर्द्धिभ्यस्त्वा देवेभ्यः ॥३४॥१६॥ इन्द्र मरुत्व इह पाहि सोमं यथा शा
र्य्याते अपिबः सुतस्य । तव प्रणीती तव शूर शर्म्मन्ना विवासन्ति क
वयः सुयज्ञाः ॥ उपयामगृहीतोसीन्द्राय त्वा मरुत्वत एष ते योनिरि
न्द्राय त्वा मरुत्वते ॥३५॥१७॥ मरुत्वन्तं वृषभं वावृधानमकवारिं दि
व्यं शासमिन्द्रम् । विश्वासाहमवसे नूतनायोग्रं सहोदामिह
तं हुवेम । उपयामगृहीतोसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्रा
य त्वा मरुत्वते ॥३६॥१८॥१९॥ उपयामगृहीतोसि मरुतामोजसे त्वा ॥
॥३७॥२०॥ सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वा
न् । जहि शत्रूँरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ॥ उप

यामगृहीतोसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥३८॥
महाँ२ इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः ॥ अस्म
द्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् ॥ उपयामगृहीतो
सि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥३९॥ महाँ२ इन्द्रो य ओजसा
पर्जन्यो वृष्टिमाँ२ इव । स्तोमैर्वत्सस्य वावृधे ॥ उपयामगृहीतोसि
महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥४०॥२२॥ द्वाविंशत्यनुवाकेषु
चत्वारिंशत्तिकं कू ॥७॥ इति शुक्लयजुःकाण्वसंहितायां सप्तमोध्या
यः ॥७॥ ॥ हरिः ॐ ॥ कदाचन । स्तरीरसि नेन्द्र स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीसिद्धा शुभं । उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यत आदि
त्येभ्यस्त्वा ॥१॥ कदा चन प्रयुछस्युभे नि पासि जन्मनी । तुरीयादित्य स
वनं त इन्द्रियमातस्थावमृतं दिव्यादित्येभ्यस्त्वा ॥२॥ यज्ञो देवा
नां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः । आ वोर्वाची सु
मतिर्ववृत्यादंहोश्चिद्या वरिवोवित्तरासदादित्येभ्यस्त्वा ॥ विव
स्वँ आदित्यैष ते सोमपीथस्तस्मिन्मत्स्व ॥३॥ श्रदस्मै नरो व
चसे दधातन यदाशीर्दा दम्पती वाममश्नुतः । पुमान्पुत्रो जायते वि
न्दते वस्वधा विश्वाहारप एधते गृहे ॥४॥ वाममद्य सवितर्वाममु
श्वो दिवे दिवे वाममस्मभ्यं सावीः । वामस्य हि क्षयस्य देव भू

रेरया धिया वामभाजः स्याम ॥५॥ उपयामगृहीतोसि सावित्रोसि
चनोधाश्चनो मयि धेहि । जिन्व यज्ञं जिन्व यज्ञपतिं भगाय
सवित्रे त्वा ॥६॥ उपयामगृहीतोसि सुशर्मासि सुप्रतिष्ठानो बृ
हदुक्षाय नमः । विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा दे
वेभ्यः ॥७॥ उपयामगृहीतोसि बृहस्पतिसुतस्य ते देव सोम ।
इन्द्र इन्द्रियावतः पत्नीवतो ग्रहाँ २ ऋध्यासम् ॥८॥ अहं परस्ता
दहमवस्ताद्यदन्तरिक्षं तदु मे पितास्या । अहं सूर्यमुभयतो द
दर्शाहं देवानां परमं गुहा यत् ॥९॥ अग्ने वाक्पत्नि [illegible] स्वजू
र्देवेन त्वष्ट्रा । सोमं पिब स्वाहा ॥१०॥ प्रजापतिर्वृषासि रेतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४०॥

धारेतो मयि धेहि। प्रजापतेस्त्रे वृष्णो रेतोधसो रेतोधामशीय॥११॥
उपयामगृहीतोसि हरिरसि हारियोजनो हरिभ्यां त्वा॥ हर्योर्धानास्थ स
हसोमा इन्द्राय॥१२॥ यस्ते देव सोमाश्वसनिर्भक्षो यो गोसनिः॥ तस्य
तइष्टयजुषस्तुतस्तोमस्य शस्तोक्थस्योपहूतउपहूतस्य भक्षयामि॥१३॥
युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा॥ अथा न इन्द्र सोमपा गिरामु
पश्रुतिं चर॥ उपयामगृहीतोसीन्द्राय त्वा षोडशिन एष ते योनिरि
रिन्द्राय त्वा षोडशिने॥१४॥७॥ आतिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा
हरी॥ अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना॥ उपयामगृहीतो
सीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने॥१५॥८॥ इ

॥४०॥

न्द्रमिद्धरी वहतोप्रतिधृष्टशवसम्॥ ऋषीणां च स्तुतीरुप यज्ञं च मा
नुषाणाम्॥ उपयामगृहीतोसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षो
डशिने॥१६॥ यस्मान्न जातः परो अन्यो अस्ति य आविवेश भुवनानि विश्वा॥ प्रजा
पतिः प्रजया संरराणस्त्रीणि ज्योतींषि सचते स षोडशी॥१७॥ इन्द्रश्च
सम्राड्वरुणश्च राजा तौ ते भक्षं चक्रतुरग्र एतम्॥ तयोरहमनु भक्षं भक्षया
मि वाग्देवी जुषाणा सोमस्य तृप्यतु सह प्राणेन स्वाहा॥१८॥१०॥ अग्न आयूं
षि पवस आ सुवोर्जमिषं च नः॥ आरे बाधस्व दुच्छुनाम्॥ उपयामगृही
तोस्यग्नये त्वा वर्चस एष ते योनिरग्नये त्वा वर्चसे॥ अग्ने वर्चस्विन्वर्चस्वांस्त्वं
देवेष्वसि॥ वर्चस्वानहं मनुष्येषु भूयासम्॥१९॥ अग्ने पवस्व स्वपा अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४२॥

स्मै वर्चस्सु वीर्यम्॥ दधद्रयिम्मयि पोषम्॥ उपयामगृहीतोस्यग्नये त्वा वर्च्च
स एष ते योनिरग्नये त्वा वर्चसे॥ अग्ने वर्च्चस्विन्वर्चस्वांस्त्वन्देवेष्वसि॥ व
र्च्चस्वानहम्मनुष्येषु भूयासम्॥२०॥१२॥ ओजिष्ठस्त्वमोजसा सह पीत्वी शि
प्रे अवेपयः॥ सोममिन्द्र चमू सुतम्॥ उपयामगृहीतोसीन्द्राय त्वौजस
एष ते योनिरिन्द्राय त्वौजसे॥ इन्द्रौजस्विन्नोजस्वांस्त्वन्देवेष्वसि॥ ओज
स्वानहम्मनुष्येषु भूयासम्॥२१॥१३॥ अदृश्रमस्य केतवो वि रश्मयो ज
नाँ अनु॥ भ्राजन्तो अग्नयो यथा॥ उपयामगृहीतोसि सूर्याय त्वा भ्राजएष ते
योनिस्सूर्याय त्वा भ्राजे॥ सूर्य भ्राजस्विन्भ्राजस्वांस्त्वन्देवेष्वसि॥ भ्रा
जस्वानहम्मनुष्येषु भूयासम्॥२२॥ उदु त्यं जातवेदसन्देवं वहन्ति के

॥४२॥

तवः॥ दृशे विश्वाय सूर्यम्॥ उपयामगृहीतोसि सूर्याय त्वा भ्राजएष ते यो
निस्सूर्याय त्वा भ्राजे॥ सूर्य भ्राजस्विन्भ्राजस्वांस्त्वन्देवेष्वसि॥ भ्राज
स्वानहम्मनुष्येषु भूयासम्॥२३॥ चित्रन्देवानामुदगादनीकञ्चक्षुर्मि
त्रस्य वरुणस्याग्नेः॥ आप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जग
तस्तस्थुषश्च॥ उपयामगृहीतोसि सूर्याय त्वा भ्राजएष ते योनिस्सूर्याय

स५

त्वा भ्राजे॥ सूर्य भ्राजस्विन्भ्राजस्वांस्त्वन्देवेष्वसि॥ भ्राजस्वानहम्म
नुष्येषु भूयासम्॥२४॥ वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः॥ यो अस्माꣳ
अभिदासत्यधरङ्गमया तमः॥ उपयामगृहीतोसीन्द्राय त्वा विमृधएष ते
योनिरिन्द्राय त्वा विमृधे॥२५॥ वाचस्पतिं विश्वकर्म्माणमूतये मनोजु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४२॥

वंशाह्ने अद्याहुवेम ॥ स नो विश्वानि हवनानि जोषद्विश्वशम्भू रवसे साधु कर्म्मा ॥ उपयामगृहीतोसीन्द्राय त्वा विश्वकर्म्मण एष ते योनिरिन्द्राय त्वा विश्वकर्म्मणे ॥२६॥ विश्वकर्म्मन्हविषा वाव्धानः स्वयं यजस्व पृथिवीमुत द्याम् ॥ मुह्यन्त्वन्ये अभितः सपत्ना इहास्माकम्मघवा सूरिरस्तु ॥ उपयामगृहीतोसीन्द्राय त्वा विश्वकर्म्मण एष ते योनिरिन्द्राय त्वा विश्वकर्म्मणे ॥२७॥ विश्वकर्म्मन्हविषा वर्द्धनेन त्रातारमिन्द्रमकृणोरवध्यम् ॥ तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् ॥ उपयामगृहीतोसीन्द्राय त्वा विश्वकर्म्मण एष ते योनिरिन्द्राय त्वा विश्वकर्म्मणे ॥२८॥ उपयामगृहीतोस्यग्नये त्वा गायत्रच्छन्दसं गृह्णामीन्द्राय त्वा त्रिष्टुप्छन्दसं गृह्णामि ॥ विश्वेभ्यस्त्वा देवेभ्यो जगच्छन्दसं गृह्णाम्यनुष्टुप्ते भिगरः ॥२९॥ व्रेशीनान्त्वा पत्मन्नाधूनोमि कुकूननानान्त्वा पत्मन्नाधूनोमि भन्दनानान्त्वा पत्मन्नाधूनोमि मधुन्तमानान्त्वा पत्मन्नाधूनोमि ॥ शुक्रन्त्वा शुक्र आधूनोम्यन्हो रूपे सूर्यस्य रश्मिषु ॥३०॥ ककुहं रूपं वृषभस्य रोचते बृहत्सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगाः ॥ यत्ते सोमादाभ्यन्नाम जागृवि तस्मै त्वा गृह्णामि तस्मै ते सोम सोमाय स्वाहा ॥३१॥ उशिक्त्वन्देव सोमाग्नेः प्रियम्पाथोपीहि वशी त्वन्देव सोमेन्द्रस्य प्रियम्पाथोपीहि ॥ अस्मत्सखा त्वन्देव सोम विश्वेषान्देवानाम्प्रियम्पाथोपीहि ॥३२॥ छ ॥ छ ॥

॥४२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४२॥

॥३८॥ द्वात्रिंशस्यनुके पु द्वात्रिंशति ऋ॥४॥ इति शुक्लयजुःकाण्वसंहितायां पाठे अष्टत्रिंशोऽध्यायः॥३८॥ ॥ हरिः ॐ॥ प्राणाय मे। वर्चोदा वर्चसे पवस्व व्यानाय मे वर्चोदा वर्चसे पवस्व॥ उदानाय मे वर्चोदा वर्चसे पवस्व वाचो मे वर्चोदा वर्चसे पवस्व॥१॥ क्रतुदक्षाभ्यां। मे वर्चोदा वर्चसे पवस्व श्रोत्राय मे वर्चोदा वर्चसे पवस्व। चक्षुर्भ्यां मे वर्चोदसौ वर्चसे पवेथाम्॥२॥ आत्मने मे वर्चोदा वर्चसे पवस्वौजसे मे वर्चोदा वर्चसे पवस्वायुषे मे वर्चोदा वर्चसे पवस्व॥ विश्वाभ्यो मे प्रजाभ्यो वर्चोदसौ वर्चसे पवेथाम्॥३॥ कोऽसि। कतमोऽसि कस्यासि को नामासि॥ यस्य ते नामामन्महि यं त्वा सोमेनातीतृपाम॥४॥ भूर्भुवः॥ स्वः सुप्रजाः

॥४२॥

प्रजयाभूयास्म॥ सुवीरो वीरैः सुपोषः पोषैः॥५॥ उदुत्यं जातवेदसं देवं वहन्ति केतवः॥ दृशे विश्वाय सूर्य्यं॥६॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः॥ आप्रा द्यावापृथिवी ऽअन्तरिक्षं सूर्य्यऽआत्मा जगतस्तस्थुषश्च॥७॥ अग्ने नय। सुपथा रायेऽअस्मान्विश्वानि देव वयुनानि विद्वान्॥ युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽउक्तिं विधेम॥८॥ अयन्नो॥ अग्निर्वरिवस्कृणोत्वयं मृधः पुरऽएतु प्रभिन्दन्॥ अयं वाजाञ्जयतु वाजसातौऽअयं शत्रूञ्जयतु जर्हृषाणः स्वाहा॥९॥ रूपेण वो रूपमभ्यागां तुथो वो विश्ववेदा विभजतु॥ ऋतस्य पथा प्रेत चंद्रदक्षि

॥४४॥

णाः॥१०॥ दिवस्वः पृथिव्यंतरिक्षं पतत्स्वसदस्यैः॥ ब्राह्मणमद्यवि
देयपितृमंतं पैतृमत्यमृषिमार्षेयं सुधातुदक्षिणं॥११॥ अस्म
द्राता देवत्रा गच्छप्रदातारमाविश॥ अग्नये त्वा मह्यं वरुणो
ददातु सोमृतत्वमस्यात्॥१२॥ आयुर्दात्रऽएधि मयो मह्यं प्रति
ग्रहीत्रे॥ रुद्राय त्वा मह्यं वरुणो ददातु सोमृतत्वमश्यात्॥ प्रा
णो दात्रऽएधि मयो मह्यं प्रतिग्रहीत्रे॥ बृहस्पतये त्वा मह्यं व
रुणो ददातु सोमृतत्वमश्यात्॥ त्वग्दात्रऽएधि मयो मह्यं प्र
तिग्रहीत्रे॥ यमाय त्वा मह्यं वरुणो ददातु सोमृतत्वमश्यात्॥
वयो दात्रऽएधि मयो मह्यं प्रतिग्रहीत्रे॥१३॥ कोदात्कस्माऽअ

॥४४॥

दात्कामोदात्कामायादात्॥ कामो दाता कामः प्रतिग्रहीता कामैत
त्ते तव कामसत्ताभुनजामहे॥१४॥ समिंद्रणो मनसा नेषि गो
भिः सं सूरिभिर्मघवं स्वस्त्या॥ सं ब्रह्मणा देवहितं यद
स्ति सं देवानां सुमतौ यज्ञियानाम्॥१५॥ संवर्चसा पयसा
संतनूभिरगन्महि मनसा संशिवेन॥ त्वष्टा सुदत्रो विदधा
तु रायोनुमार्ष्टु तन्वो यद्विलिष्टम्॥१६॥ धाता रातिः सवितेदं
जुषंतां प्रजापतिर्निधिपा देवोऽअग्निः॥ त्वष्टा विष्णुः प्रजया
संरराणो यजमानाय द्रविणं दधातु॥१७॥ सुगा वो दे
वाः सदना अकर्म यऽआजग्मेदं सवनं जुषाणाः॥ भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४५॥

रमाणा वहमाना हवीꣳषि अस्मे धत्त वसवो वसूनि ॥१८॥ यां२ आव
ह उशतो देव देवां२ स्तान्प्रेरय स्वे अग्ने सधस्थे ॥ जक्षिवा
ꣳसः पपिवाꣳसश्च विश्वे ऽसुं घर्मꣳ स्वरातिष्ठतानु ॥१९॥ वय
ꣳहि त्वा प्रयति यज्ञे ऽअस्मिन्नग्ने होतारमवृणीमहीह । ऋ
धगया ऋधगुताशमिष्ठाः प्रजानन्यज्ञमुपयाहि विद्वान् ॥
॥२०॥ देवा गातुविदो गातुं वित्वा गातुमित ॥ मनसस्पत इमं देव
यज्ञꣳ स्वाहा वाते धाः ॥२१॥ यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां
योनिं गच्छ स्वाहा ॥ एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववी
रस्तं जुषस्व स्वाहा ॥ माहिर्भूर्मा पृदाकुः ॥२२॥ उरुꣳहि राजा

॥४५॥

वरुणश्चकार सूर्याय पन्थामन्वेतवा उ ॥ अपदे पादा प्रतिधातवे
ऽकरुतापवक्ता हृदयाविधश्चित् ॥ नमो वरुणायाभिष्ठितो वरु
णस्य पाशः ॥२३॥ अग्नेरनीकमपऽआविवेशापान्नपात्प्रतिर
क्षन्नसुर्यम् ॥ दमे दमे समिधं यक्ष्यग्ने प्रति ते जिह्वा घृतमुच्चर
ण्यत्स्वाहा ॥२४॥ समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरु
ताऽपः ॥ यज्ञस्य त्वा यज्ञपते सूक्तोक्तौ नमोवाके विधेम यत्स्वा
हा ॥२५॥ देवीराप एष वो गर्भस्तꣳ सुप्रीतꣳ सुभृतं बिभृत ॥
देव सोमैष ते लोकः परि च वक्षि शं च वक्षि ॥२६॥ अवभृथ नि
चुम्पुण निचेरुरसि निचुम्पुणः ॥ अव देवैर्देवकृतमेनोऽयासि

थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४९॥

षमव [illegible]मस्यै मर्त्ये हृतं पुरुराक्णो देवरिषस्या हि॥ देवानाध्रुस मिद सि॥२७॥ एजतु दशमास्यो गर्भो जरायुणा सह॥ यथायं वायुरेजति यथा समुद्र ऽएजत्येवायं दशमास्यो ऽस्रज्जरायुणा सह॥२८॥ यस्यास्ते। यज्ञियो गर्भो यस्या योनिर्हिरण्ययी॥ अङ्गान्यहुता यस्य तं मात्रा समजीगमᳫं स्वाहा॥२९॥ पुरुदस्मो विषुरूप ऽइन्दुरन्तर्महिमानमानञ्ज धीरः॥ एकपदीं द्विपदीं त्रिपदीं चतुष्पदीमष्टापदीं भुवनानु प्रथन्तां स्वाहा॥३०॥ मरुतो यस्य हि क्षये पाथा दिवो विमहसः॥ स सुगोपातमो जनः॥३१॥ मही द्यौः पृथिवी च न ऽइमं यज्ञं मिमिक्षताम्॥ पिपृतान्नो भरीमभिः॥३२॥ आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः॥ पुनरूर्ज्जा निवर्त्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्म्माविशताद्रयिः॥३३॥ इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतेऽदिते सरस्वति महि विश्रुति॥ एता ते ऽअघ्न्ये नामानि देवेभ्यो मा सुकृतं ब्रूतात्॥३४॥ वि न ऽइन्द्र मृधो जहि नीचा यच्छ पृतन्यतः॥ यो ऽअस्माँ२ ऽअभिदासत्यधरं गमया तमः॥ (?)

॥४९॥

हरति। रिहर मध्व मिह ध्वतिरिहस्व ध्वति स्वाहा॥ उपसृजं धरुणं मात्रे धरुणो मातरं धयन्॥ रायस्पोषमस्मासु दीधरत् स्वाहा॥३५॥ अगन्म ज्योतिरमृता ऽअभूम दिवं पृथिव्या ऽअध्यारुहामा॥ अविदाम देवान्[illegible] स्वर्ज्योतिः॥३६॥ युवं तमिन्द्रापर्वता पुरोयुधा यो नः

पतन्त्यादपतन्तमिद्धुतं यज्ञेणातं तमिद्धुतम्॥ दूरे च सायच्छन्त्सप्र
हतं यदिनस्सदस्मादकृत्रा नृन्यरि शूरविश्वतोदमर्मादन्नीष्टवि
श्वतः॥३७॥ भूर्भुवः स्वः सुप्रजाः प्रजया भूयासम्॥ सुवीरो वीरैः
सुपोषः पोषैः॥३८॥ परमेष्ठ्यभिधीतः प्रजापतिर्वाचि व्याहृताया
मंधोऽच्छेतः सविता सन्याम्॥ विश्वकर्मा दीक्षायां पूषा सोमक्रय
ण्याम्॥३९॥ इन्द्रश्च मरुतश्च क्रयायोपछितः॥ असुरः पण्यमानो
मित्रः क्रीतः॥४०॥ विष्णुः शिपिविष्टऽऊराऽआसन्नो विष्णुर्नरंधि
षः प्रोह्यमाणः॥ सोमऽआगतो वरुणऽआसंद्यामासन्नः॥४१॥ अ
ग्निराग्नीध्रऽइन्द्रो हविर्द्धाने॥ अथर्वोपावह्रियमाणो विश्वेदेवाऽ

॥४७॥

अंशुषु न्युप्यमानेषु॥४२॥ विष्णुराप्रीतपाऽआप्याय्यमानो य
मः सूयमानो विष्णुः संभ्रियमाणः॥ वायुः पूयमानः शुक्रः पूतः॥४३॥
शुक्रः क्षीरश्रीर्मंथी सक्तुश्रीः॥ विश्वेदेवाश्चमसेषून्नीतो सुहो
मायोद्यतः॥४४॥ रुद्रो हूयमानो वातोऽभ्यावृत्तो नृचक्षाः प्रतिख्
ख्यातो भक्षः पीतः पितरो नाराशंसाः सादमानः॥ सिंधुरवभृ
थायोद्यतः समुद्रोऽभ्यवह्रियमाणः सलिलः प्रप्लुतः॥४५॥ ययोरो
जसास्कभिता रजांसि वीर्येभिर्वीरतमा शविष्ठा॥ या पत्येतेऽ
अप्रतीता सहोभिर्विष्णूऽअगन्वरुणा पूर्वहूतौ॥४६॥ देवांदिव
मगन्यज्ञस्ततो मा द्रविणमष्टु मनुष्यानंतरिक्षमगन्यज्ञस्ततो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४८॥

मा द्रविणमष्टु ॥ पितॄन्पृथिवीमगन्यज्ञस्ततो मा द्रविणमष्टु यं यं
च लोकमगन्यज्ञस्ततो मे भद्रमभूत् ॥६३॥ ॥छ॥ ॥छ॥ इ
ति श्री शुक्लयजुःब्राह्मणसंहितायां नवमोध्यायः ॥९॥ ॥ हरिः
ॐ म॥ देव सवितः प्रसुव यज्ञं प्रसुव मं भगाय॥ दिव्यो गंधर्वः के तपा
कं तन्नः पुनातु वाचस्पतिर्न्नोऽद्य वाजं स्वदतु ॥१॥ ध्रुवस
दं त्वा नृषदं मनःसदम॥ उपयामगृहीतोसीन्द्राय त्वा जुष्टं गृह्णाम्येष
ते योनिरिन्द्राय त्वा जुष्टतमम॥ ॥२॥ अप्सुषदं त्वा घृतसदं व्योमसद
म॥ उपयामगृहीतोसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय
त्वा जुष्टतमम॥ ॥३॥ पृथिविसदं त्वान्तरिक्षसदं दिविसदं देवसदन्ना

॥४८॥

कसदम॥ उपयामगृहीतोसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय
त्वा जुष्टतमम॥ ॥४॥ अपां रसमुद्वयसं सूर्ये संतं समाहितम॥ अ
पां रसस्य यो रसस्तं वो गृह्णाम्युत्तमम॥ उपयामगृहीतोसीन्द्राय त्वा
जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम॥ ॥५॥ ग्रहा ऊर्जाहुतयो
व्यंतो विप्राय मतिम॥ तेषां विशिप्रियाणां वो हमिषमूर्जं समग्र
भम॥ उपयामगृहीतोसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्रा
य त्वा जुष्टतमम॥ ॥६॥ संपृचस्थः सं मा भद्रेण पृक्तं॥ विपृचस्थ
वि मा पापेन पृक्तं॥ ॥७॥ इन्द्रस्य वज्रोसि वाजसास्त्वयायं वाजं
सेत॥ वाजस्य नु प्रसवे मातरं महीमदितिन्नाम वचसा कराम

हे॥ यस्यामिदं विश्वं भुवनमाविवेश तस्यान्नो देवः सविता धर्म
साविषत् ॥५॥ देवीरापो अपान्नपाद्यो व ऊर्मिः प्रतूर्तिः
ककुन्मान्वाजसास्तेनायं वाजं सेत ॥६॥ अप्स्वन्तरमृतमप्सु
भेषजमपामुत प्रशस्तिभिः॥ अश्वा भवत वाजिनः ॥७॥ वातो
वा मनो वा गन्धर्वाः सप्तविंशतिः॥ ते अग्रेऽश्वमयुञ्जंस्ते अ
स्मिञ्जवमादधुः॥७॥ वातरंहा भव वाजिन्युज्यमान इन्द्र
स्येव दक्षिणः श्रियैधि॥ युञ्जन्तु त्वा मरुतो विश्ववेदस आ ते त्वष्टा
पत्सु जवं दधातु ॥८॥ जवो यस्ते वाजिन्निहितो गुहा यः श्ये
ने परीत्तो अचरच्च वाते॥ तेन नो वाजिन्बलवान्बलेन वाज

जिच्चैधि समने च पारयिष्णुः ॥९॥ वाजिनो वाजजितो वाजं स
सरिष्यन्तः॥ बृहस्पतेर्भागमवजिघ्रत ॥१०॥ देवस्याहं सवितुः
सवे सत्यसवसः॥ बृहस्पतेरुत्तमं नाकं रुहेयमिन्द्रस्योत्तमं ना
कं रुहेयम् ॥११॥ देवस्याहं सवितुः सवे सत्यसवसः॥ बृह
स्पतेरुत्तमं नाकमरुहामेन्द्रस्योत्तमं नाकमरुहाम ॥१२॥ बृ
हस्पते वाजं जय बृहस्पतये वाचं वदत॥ बृहस्पतिं वाजं जापय
त॥ इन्द्र वाजं जयेन्द्राय वाचं वदत॥ इन्द्रं वाजं जापयत ॥१३॥
एषा वः सा सत्या संवागभूद्यया बृहस्पतिं वाजमजीजपत॥
अजीजपत बृहस्पतिं वाचं वनस्पतयो विमुच्यध्वं ॥१४॥ देव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

 ॥५०॥

स्य वयꣳ सवितुः सवे सत्यसवसः ॥ बृहस्पतेर्वाजजितो वाजं
जेष्म ॥१३॥ वाजिनो वाजजितो ऽध्वन स्कभ्नुवन्तः ॥ योजना मिमा
नाः काष्ठां गच्छत ॥१४॥ एष स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां
बद्धो ऽअपिकक्ष ऽआसनि ॥ क्रतुं दधिक्रा ऽअनु संतवीत्व
त्पथामङ्काꣳस्यन्वापनीफणत् ॥१५॥ उत स्मास्य द्रवतस्तुर
ण्यतः पर्णं न वेरनुवाति प्रगर्द्धिनः ॥ श्येनस्येव ध्रजतो ऽअङ्क
सं परि दधिक्राव्णः सहोर्जा तरित्रतः ॥१६॥ शं नो भवन्तु वा
जिनो हवेषु देवताता मितद्रवः स्वर्काः ॥ जम्भयन्तोहिं वृकꣳ रक्षा
ꣳसि सनेम्यस्मद्युयवन्नमीवाः ॥१७॥ ते नो ऽअर्वन्तो हवनश्रु

तो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः ॥ सहस्रसा मेधसाता ऽ
इव त्मना महो ये धनꣳ समिथेषु जभ्रिरे ॥१८॥ वाजे वाजे ऽवत
वाजिनो नो धनेषु विप्रा ऽअमृता ऽऋतज्ञाः ॥ अस्य मध्वः पिब
त मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥१९॥ आ मा वाजस्य
प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे ॥ आ मा गन्तां पित
रा मातरा युवमा मा सोमो ऽअमृतत्वाय गम्यात् ॥२०॥ वाजि
नो वाजजितो वाजꣳ ससृवाꣳसः ॥ बृहस्पतेर्भागमवजिघ्र
त निमृजानाः ॥२१॥ आपये स्वाहा स्वापये स्वाहापिजाय स्वा
हा क्रतवे स्वाहा ॥ वसवे स्वाहाहर्पतये स्वाहा ॥ अह्ने मुग्धा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५२॥

य स्वाहा मूर्द्धाय व्येनश्विने नाय स्वाहा विनश्विने ऽन्त्याय नाय स्वा
हान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा॥२०॥
आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन क
ल्पतां श्रोत्रं यज्ञेन कल्पतां॥ पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन क
ल्पतां॥२१॥ आय एहि स्वारोहा वा॥ प्रजापतेः प्रजा ऽअभूम स्वर्देवा ऽ
अगन्मामृता ऽ अभूम॥२२॥ अस्मे वो अस्त्विन्द्रियमस्मे नृम्णमुत क्र
तुः॥ अस्मे वर्च्चांसि सन्तु वः॥२३॥ नमो मात्रे पृथिव्या ऽ इयन्ते रा
ड्यन्ता [illegible] सि यमनः॥ ध्रुवोसि धरुणः कृष्यै क्षेमाय रय्यै पोषा
य॥२४॥ वाजस्येमं प्रसवः सुषुवेग्रे सोमं राजानमोषधीष्वप्सु॥

॥५२॥

ता ऽ अस्मभ्यम्मधुमतीर्भवन्तु वयं राष्ट्रे जागृयाम पुरोहिताः॥२५॥ वा
जस्येदं प्रसव ऽ आबभूवेमा च विश्वा भुवनानि सर्वतः॥ स नेमि राजा
परियाति विद्वान्प्रजां पुष्टिं वर्द्धमानो ऽ अस्मे॥२६॥ वाजस्येमां प्रसवः शि
श्रिये दिवमिमा च विश्वा भुवनानि सम्राट्॥ अदित्सन्तं दापयति प्रजा
नन्त्स नो रयिं सर्ववीरं नियच्छतु॥२७॥ अग्ने ऽ अच्छा वदेह नः प्रति
नः सुमना भव॥ प्र नो यच्छ सहस्रजित्त्वं हि धनदा ऽ असि॥२८॥ सो
मं राजानमवसे ऽग्निमन्वारभामहे॥ आदित्यं विष्णुं सूर्यं ब्र
ह्माणं च बृहस्पतिं॥२९॥ प्र नो यच्छत्वर्य्यमा प्र पूषा प्र सरस्वती॥
प्र वाग्देवी ददातु नः॥३०॥ अर्य्यमणं बृहस्पतिमिन्द्रं दानाय चोदय॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५२॥

वाचं विष्णुꣳ सरस्वतीꣳ सवितारं च वाजिनं॥ देवस्य त्वा सवितुः प्रसवेश्विनो र्बाहुभ्यां पूष्णो हस्ताभ्याम्॥२९॥ सरस्वत्यै वाचो यंतुर्यंतुर्यंत्रे दधामि॥ बृहस्पतेस्त्वा साम्राज्येनाभिषिंचामीन्द्रस्य त्वा साम्राज्येनाभिषिंचामि॥३०॥ अग्निरेकाक्षरेण। प्राणमुदजयत्तमुज्जेषमश्विनौ द्व्यक्षरेण द्विपदो मनुष्यानुदजयतां तानुज्जेषम्॥ विष्णुस्त्र्यक्षरेण त्रीनिमान्लोकानुदजयत्तानुज्जेषꣳ सोमश्चतुरक्षरेण चतुष्पदः पशूनुदजयत्तानुज्जेषम्॥३१॥ पूषा पंचाक्षरेण पंचः ऋतूनुदजयत्तानुज्जेषꣳ सविता षडक्षरेण षड्ऋतूनुदजयत्तानुज्जेषम्॥ मरुतः सप्ताक्षरेण सप्त ग्राम्यान्पशूनुदजयꣳस्तानु

॥५२॥

मुज्जेषं विश्वेदेवा द्वादशाक्षरेण जगतीमुदजयꣳस्तामुज्जेषं॥ (४

ज्जेषं बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत्तामुज्जेषम्॥३२॥ मित्रो नवाक्षरेण। त्रिवृतꣳ स्तोममुदजयत्तमुज्जेषं वरुणो दशाक्षरेण विराजमुदजयत्तामुज्जेषम्॥ इन्द्र एकादशाक्षरेण त्रिष्टुभमुदजयत्तामुज्जेषं॥३३॥ वसवस्त्रयोदशाक्षरेण। त्रयोदशꣳ स्तोममुदजयꣳस्तमुज्जेषꣳ रुद्राश्चतुर्दशाक्षरेण चतुर्दशꣳ स्तोममुदजयꣳस्तमुज्जेषम्॥ आदित्याः पंचदशाक्षरेण पंचदशꣳ स्तोममुदजयꣳस्तमुज्जेषमदितिः षोडशाक्षरेण षोडशꣳ स्तोममुदजयत्तमुज्जेषम्॥ प्रजापतिः सप्तदशाक्षरेण सप्तदशꣳ स्तोममुदजयत्तमुज्जेषम्॥३४॥ इति काण्वशाखायां संहितापाठे दशमोध्यायः॥१०॥

॥१०॥ ॥६७॥

॥५२॥

॥हरिः ॐ म्॥ एष ते निर्ऋते भागस्तं जुषस्व स्वाहा॥ग्निनेत्रेभ्यो देवेभ्यः
पुरःसद्भ्यः स्वाहा॥यमनेत्रेभ्यो देवेभ्यो दक्षिणसद्भ्यः स्वाहा॥वि[illegible]श्वदे
वनेत्रेभ्यो देवेभ्यः पश्चात्सद्भ्यः स्वाहा॥मित्रावरुणनेत्रेभ्यो वा मरुन्ने
त्रेभ्यो वा देवेभ्य उ[illegible]त्तरसद्भ्यः स्वाहा॥सोमनेत्रेभ्यो देवेभ्य उपरि
षद्भ्यो दुवस्वद्भ्यः स्वाहा॥१॥ये देवा अग्निनेत्राः पुरस्सदस्तेभ्यः स्वा
हा॥ये देवा यमनेत्रा दक्षिणसदस्तेभ्यः स्वाहा॥ये देवा विश्वदेवनेत्राः
पश्चात्सदस्तेभ्यः स्वाहा॥ये देवा मित्रावरुणनेत्रा वा मरुन्नेत्रा वोत्त
रसदस्तेभ्यः स्वाहा॥ये देवाः सोमनेत्रा उपरिषदो दुवस्वन्तस्तेभ्यः
स्वाहा॥२॥अग्ने सहस्व पृतना अभिमातीरपास्य॥दुष्टरस्तरन्न

॥५२॥

रातीर्वर्च्चो धा यज्ञवाहसि॥देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां
पूष्णो हस्ताभ्याम्॥३॥उपांशोर्वीर्येण जुहोमि हतꣳ रक्षः स्वाहा॥र
क्षसां त्वा वधायावधिष्म रक्षोऽमुष्य त्वा वधाया मुमवधिष्म॥जुषाणो
प्वाऽज्यस्य वेतु स्वाहा॥४॥अपो देवा मधुमतीरगृभ्णन्नूर्जस्वती रा
जस्वश्चितानाः॥याभिर्मित्रावरुणावभ्यषिंचन्याभिरिन्द्रम
नयन्नत्यरातीः॥५॥वृष्ण ऊर्म्मिरसि राष्ट्रदा राष्ट्रं मे दे हि स्वा
हा॥वृष्ण ऊर्म्मिरसि राष्ट्रदा राष्ट्रममुष्मै देहि॥वृषसेनोसि राष्ट्रदा
राष्ट्रं मे देहि स्वाहा॥वृषसेनोसि राष्ट्रदा राष्ट्रममुष्मै देहि॥६॥अर्थेतस्थ
राष्ट्रदा राष्ट्रं मे दत्त स्वाहा॥अर्थेतस्थ राष्ट्रदा राष्ट्रममुष्मै दत्त॥ओजस्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५४॥

तीस्थराष्ट्रदाराष्ट्रंमेदत्तस्वाहौजस्वतीस्थराष्ट्रदाराष्ट्रममुष्मैदत्त॥
आपःपरिवाहिणीस्थराष्ट्रदाराष्ट्रंमेदत्तस्वाहापःपरिवाहिणीस्थ
राष्ट्रदाराष्ट्रममुष्मैदत्त॥अपांपतिरसिराष्ट्रदाराष्ट्रंमेदेहिस्वा
हापांपतिरसिराष्ट्रदाराष्ट्रममुष्मैदेहि॥अपांगर्भोसिराष्ट्रदा
राष्ट्रंमेदेहिस्वाहापांगर्भोसिराष्ट्रदाराष्ट्रममुष्मैदेहि॥सूर्य्यव
र्च्चसस्थराष्ट्रदाराष्ट्रंमेदत्तस्वाहासूर्य्यवर्च्चसस्थराष्ट्रदाराष्ट्र
ममुष्मैदत्त॥सूर्य्यत्वचस्थराष्ट्रदाराष्ट्रंमेदत्तस्वाहासूर्य्यत्व
चस्थराष्ट्रदाराष्ट्रममुष्मैदत्त॥व्रजक्षितस्थराष्ट्रदाराष्ट्रंमे
दत्तस्वाहाव्रजक्षितस्थराष्ट्रदाराष्ट्रममुष्मैदत्त॥वाशास्थरा

॥५४॥

ष्ट्रदाराष्ट्रंमेदत्तस्वाहावाशास्थराष्ट्रदाराष्ट्रममुष्मैदत्त॥मांदास्थ
राष्ट्रदाराष्ट्रंमेदत्तस्वाहामांदास्थराष्ट्रदाराष्ट्रममुष्मैदत्त॥शा
क्वरीस्थराष्ट्रदाराष्ट्रंमेदत्तस्वाहाशाक्वरीस्थराष्ट्रदा
राष्ट्रममुष्मैदत्त॥जनभृतस्थराष्ट्रदाराष्ट्रंमेदत्तस्वाहा
जनभृतस्थराष्ट्रदाराष्ट्रममुष्मैदत्त॥विश्वभृतस्थराष्ट्रदा
राष्ट्रंमेदत्तस्वाहाविश्वभृतस्थराष्ट्रदाराष्ट्रममुष्मैदत्त॥
शैष्ठास्थराष्ट्रदाराष्ट्रंमेदत्तस्वाहाशैष्ठास्थराष्ट्रदाराष्ट्र
ममुष्मैदत्त॥आपःस्वाराज्ञीस्थराष्ट्रदाराष्ट्रममुष्मैदत्त॥
॥७॥मधुमतीर्म्मधुमतीभिःपृच्यंतांमहिक्षत्रंक्षत्रि

याय वन्ध्यानाः॥ अनाधृष्टाः सीदत सहौजसो महि क्षत्रं क्षत्रिया
य दधतीः॥१८॥ सविता त्वा प्रसवानां सुवताम् अग्निर्गृहपतीना
ं सोमो वनस्पतीनाम्॥ बृहस्पतिर्वाच ऽ इन्द्रो ज्यैष्ठ्याय रुद्रः पशू
नां मित्रः सत्यो वरुणो धर्मपतीनाम्॥१९॥ इमं देवा असपत्न
ं सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय॥ इममममुष्य पुत्रम
मुष्याः पुत्रमस्यै विशे॥२०॥ एष वः कुरवो राजैष वः पंचाला रा
जा॥ सोमोस्माकं ब्राह्मणानां राजा॥२१॥ सोमस्य त्विषिर
स्यग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा॥
पूष्णे स्वाहा बृहस्पतये स्वाहा॥२२॥ इन्द्राय स्वाहा॥ घ्रणाय स्वा

हा॥ श्लोकाय स्वाहा घोषाय [illegible] स्वाहा भगाय स्वाहार्यम्णे स्वाहा॥
सवितुर्वः प्रसव ऽ उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः॥
अनिभृष्टमसि वाचो बंधुस्तपोजाः सोमस्य दात्रमसि स्वाहा रा
जस्वः॥१३॥ सधमादो द्युम्निनीराप ऽ एता ऽ अनाधृष्टा ऽ अपस्यो
वसानाः॥ पस्त्यासु चक्रे वरुणः सधस्थमपां शिशुर्मातृतमा
स्वंतः॥१४॥ क्षत्रस्योल्बमसि क्षत्रस्य जराय्वसि क्षत्रस्य ना
भिरसि क्षत्रस्य योनिरसि॥ इन्द्रस्य वार्त्रघ्नमसि त्वयायं वृत्रं व
ध्यान्मित्रस्यासि वरुणस्यासि॥१५॥ रुजासि द्रवासि क्षुपा
सि॥ पातैनं प्रांचं पातैनं प्रत्यंचं पातैनं तिर्यंचं दिग्भ्यः पात॥१६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आविर्मर्य्या आवित्तो अग्निर्गृहपतिरावित्त इन्द्रो वृद्धश्रवा आ
वित्तः पूषा विश्ववेदा आवित्तौ मित्रावरुणा ऋतावृधौ। आवि
त्ते द्यावापृथिवी विश्वशंभू आवित्तादितिरुरुशर्मा॥९॥ ७॥
अवेष्टा दंदशूकाः प्राचीमारोह गायत्री त्वावतु रथंतरꣳ साम
त्रिवृत्स्तोमो वसंत ऋतुर्ब्रह्म द्रविणम्॥१०॥ दक्षिणामारोह त्रि
ष्टुप्त्वावतु बृहत्साम पंचदश स्तोमो ग्रीष्म ऋतुः क्षत्रं द्रविणम्
॥११॥ प्रतीचीमारोह जगती त्वावतु वैरूपꣳ साम सप्तदश स्तो
मो वर्षा ऋतुर्विड् द्रविणम्॥१२॥ उदीचीमारोहानुष्टुप्त्वावतु वै
राजꣳ साम एकविꣳश स्तोमः शरदृतुः फलं द्रविणम्॥१३॥ ऊर्ध्वा

मारोह पंक्तिस्त्वावतु शाक्वररैवते सामनी त्रिणवत्रयस्त्रि
ꣳशौ स्तोमौ हेमंतशिशिरावृतू वर्चो द्रविणम्। प्रत्यस्तं न
मुचेः शिरः॥१४॥ सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयात्।
मृत्योः पाह्योजोसि सहोस्यमृतमसि॥१५॥ हिरण्यरूपा उष
सो विरोक उभाविंद्रा उदितः सूर्यश्च। आरोहतं वरुण मि
त्र गर्त्तं ततश्चक्षाथामदितिं दितिं च। मित्रोसि वरुणोसि॥१६॥
सोमस्य त्वा द्युम्नेनाभिषिंचाम्यग्नेर्भ्राजसा सूर्यस्य वर्च
सा। इंद्रस्येंद्रियेण मरुतामोजसा क्षत्राणां क्षत्रपतिरे[illegible]ध्य
ति दिद्यून्पाहि॥१७॥ इमं देवा असपत्नꣳ सुवध्वं महते क्षत्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यमहते ज्यैष्ठ्याय महते जानराज्याय ॥ इममुममुष्य पुत्रममुष्याः पुत्रमस्यै विशे ॥३९॥ एष वः कुरवो राजैष वः पंचाला राजा ॥ सोमो स्माकं ब्राह्मणानां राजा ॥४०॥ प्रपर्वतस्य वृषभस्य पृष्ठान्नाव श्चरंति स्वसिच इयानाः ॥ ता आववृत्रन्नधरागुदक्ता अहिं बुध्न्यमनु रीयमाणाः ॥ विष्णोर्विक्रमणमसि विष्णोर्विक्रांतमसि विष्णोः क्रांतमसि ॥४१॥ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव ॥ यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥४२॥ रुद्र यत्ते क्रिवि परं नाम ॥ तस्मै हुतमस्यमेष्टमसि स्वाहा ॥४३॥ इन्द्रस्य वज्रोसि ॥ मित्रावरुणयोस्त्वा प्रशा

स्त्रोः प्रशिषा युन[illegible]ज्मि ॥ अव्यथायै त्वा स्वधायै त्वारिष्टः फल्गुनः ॥ मरुतां प्रसवेन जयापाम मनसा समिंद्रियेण ॥४४॥ मा त इंद्र ते वयं तुराषाळयुक्तासो अब्रह्मता विदसाम ॥ तिष्ठा रथम धि यद्वज्रहस्ता रश्मीन्देव युवसे स्वश्वान् ॥४५॥ अग्नये गृहपत ये स्वाहा सोमाय वनस्पतये स्वाहा ॥ इन्द्रस्येंद्रियाय स्वाहा मरु तामोजसे स्वाहा ॥ पृथिवि मातर्मा मा हिंसीर्मो अहं त्वाम् ॥४६॥ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ॥ नृष[illegible]द्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥४७॥ इयदस्यायुरस्यायुर्मे देहि युङ्ङसि वर्चोसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।।५८।।

वर्च्चोमेदेहि।।ऊर्गस्यूर्ज्जंमयिधेहीन्द्रस्ययांबाहूवीर्यघस्तावुपावहरामि।।२५।।स्योनासि।।सुषदासिक्षत्रस्ययोनिरसि।।स्योनामासीदसुषदामासीदक्षत्रस्ययोनिमासीद।।२६।।निषसाद।।धृतव्रतोवरुणःपस्त्यास्वा।।साम्राज्यायसुक्रतुः।।२७।।अभिभूरस्ययानामेतास्तेपंचदिशःकल्पंताम्।।ब्रह्मंस्त्वंब्रह्मासि।।२८।।सवितासिसत्यप्रसवोवरुणोसिसत्यौजाः।।इन्द्रोसिविशौजारुद्रोसिसुशेवः।।२९।।प्रियंकरश्रेयस्कर।।भूयस्कर।।इन्द्रस्यवज्रोसितेनमेरध्या।।३०।।अग्निःपृथुः।।धर्मणस्पतिर्जुषाणःअग्निःपृथुर्धर्मणस्पतिः।।आज्यस्यहविषोवेतुस्वाहा।।स्वाहा

।।५८।।

स

दत्ताःसूर्यस्यरश्मिभिर्यतध्वंसजातानांमध्यमेष्ठ्याय।।३९।।सवित्राप्रसवित्रा।।सरस्वत्यावाचा।।त्वष्ट्रारूपैःपूष्णापशुभिरिन्द्रेणास्मे।।४०।।बृहस्पतिनाब्रह्मणा।।वरुणेनौजसाग्निनातेजसासोमेनराज्ञा।।विष्णुनादेवतयादशम्येमंयज्ञंविष्णुमाप्रवानि।।४१।।अश्विभ्यांपच्यस्वसरस्वत्यैपच्यस्वेंद्रायसुत्राम्णेपच्यस्व।।वायोःपूतःपवित्रेणप्रत्यङ्सोमोऽअतिस्रुतः।।इन्द्रस्ययुज्यःसखा।।४२।।कुविदङ्ग।।यवमंतोयवंचिद्यथादांत्यनुपूर्वंवियूय।।इहेहैषांकृणुहिभोजनानियेबर्हिषोनमऽउक्तिंनजग्मुः।।उपयामगृहीतोस्यश्विभ्यांत्वासरस्वत्यैत्वेन्द्रायत्वासुत्राम्णे।।४३।।युवंसुरामम

॥५१॥

श्व्रिन्नान मुचा॑ऽमासुरे॑सचा॥ विपिपाना॑शुभस्पतीऽइन्द्रं॑ कर्म॑स्वाव
तम्॥३४॥ पुत्रमिव पितरा॑ऽ अश्विनोभेन्द्रावथुः॑ काव्यैर्द॒ꣳसनाभिः॥
यत्सुरामं॒ व्यपिबः॒ शची॑भिः॒ सर॑स्वती त्वामघवन्नभिष्णक्॥३५॥
॥छ॥ इति माध्यन्दिनीये वाजसनेयके दशमो॑ऽध्यायः॥छ॥ ॥हरिः॥
ॐ म॥ युञ्जानः प्रथमं मन॑स्तत्त्वाय सविता धि॒यः॥ अग्ने॒
र्ज्योति॒र्निचाय्य पृथि॒व्याऽ अध्याभरत्॥१॥ युक्तेन मनसा
वयं॑ देवस्य॑ सवितुः॑ सवे॑। स्वर्ग्याय॑ शक्त्या॥२॥ युक्त्वाय सविता
देवान्त्स्वर्य्यतो धि॒या दिव॑म्॥ बृहज्ज्योतिः॑ करिष्य॒तः सविता प्र
सुवाति ता॑न्॥३॥ युञ्जते मन॑ऽउत युञ्जते धियो विप्रा विप्रस्य

॥५१॥

बृहतो विपश्चितः॥ वि होत्रा दधे वयुनाविदेक॒ऽइन्मही देवस्य सवि
तुः परिष्टुतिः॥४॥ युजे वां ब्रह्म पूर्व्यन्नमोभिर्विश्लोक॑ऽएतु पथ्येव सू
रेः॥ शृण्वन्तु विश्वे॑ऽअमृत॑स्य पुत्राः॑ऽआ ये धामानि दिव्यानि तस्थुः॥
॥५॥ यस्य प्रयाणमन्वन्यऽइद्ययुर्देवा देवस्य महिमानमोजसा॥ यः
पार्थिवानि विममे स॑ऽएतशो रजाꣳसि देवः सविता महित्वना॥६॥
देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय॥ दिव्यो गन्धर्वः केतपूः
केतन्नः पुनातु वाचस्पतिर्वाचन्नः स्वदतु॥७॥ इमन्नो देव सवितर्य्य
ज्ञं प्रणय देवाव्यꣳ सखिविदꣳ सत्राजितं धनजितꣳ स्वर्जितम्॥
ऋचा स्तोमꣳ समर्द्धय गायत्रेण रथन्तरं बृहद्गायत्रवर्त्तनि स्वाहा॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवस्यत्वा॥ सवितुः प्रसवेश्चिनोर्बाहुभ्यांपूष्णोहस्ताभ्याम्॥ आददेगा
यत्रेणछंदसांगिरस्वत्॥ पृथिव्याःसधस्थादग्निंपुरीष्यमङ्गिरस्व
दाभरात्रैष्टुभेनछंदसांगिरस्वत्॥९॥ अभ्रिरसिनार्य्यसित्व
यावयमग्निंशकेमखनितुम्॥ सधस्थ आजागतेनछंदसा
ङ्गिरस्वत्॥१०॥ हस्तआधायसविताबिभ्रदभ्रिंहिरण्ययीम्॥
अग्नेर्ज्योतिर्निचाय्यपृथिव्याअध्याभरदानुष्टुभेनछंदसाङ्गि
रस्वत्॥११॥ प्रतूर्त्तंवाजिन्नाद्रववरिष्ठामनुसंवतम्॥ दिवितेज
न्मपरममंतरिक्षेतवनाभिःपृथिव्यामधियोनिरित्॥१२॥ युंजा
थांरासभंयुवमस्मिन्यामेवृषण्वसू॥ अग्निंभरंतमस्मयुम्॥१३॥

अग्निंपुरीष्यमंगिरस्वद्‌च्छेमोग्निंपुरीष्यमंगिरस्व +४८

योगेयोगेतवस्तरंवाजेवाजेहवामहे॥ सखायइन्द्रमूतये॥
॥१४॥ प्रतूर्वन्नेह्यवक्रामन्नशस्तीरुद्रस्यगाणपत्यंमयोभू
रेहि॥ उर्वन्तरिक्षंवीहिस्वस्तिगव्यूतिरभयानिकृण्वन्पूष्णा
सयुजासह॥१५॥ पृथिव्याःसधस्थादग्निंपुरीष्यमङ्गिरस्व दाभरा ५
द्भरिष्यामः॥१६॥ अन्वग्निरुषसामग्रमख्यदन्वाहानिप्रथमो
जातवेदाः॥ अनुसूर्य्यस्यपुरुत्राचरश्मीननुद्यावापृथिवी
आततंथ॥१७॥ आगत्यवाज्यध्वानंसर्वामृधोविधूनुते॥
अग्निंसधस्थेमहतिचक्षुषानिचिकीषते॥१८॥ आक्रम्य
वाजिन्पृथिवीमग्निमिच्छरुचात्वम्॥ भूम्यावृत्वायनोब्रूहियतः
ई

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६१॥

खनेमतं वयम्॥१९॥ द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षꣳ समुद्रो
योनिः। विख्याय चक्षुषा त्वमभितिष्ठ पृतन्यतः॥२०॥ उत्क्राम महते
सौभगायास्मादास्थानाद् द्रविणोदा वाजिन्। वयꣳ स्याम सुमतौ पृ
थिव्या अग्निं खनन्त उपस्थे अस्याः॥२१॥ उदक्रमीद् द्रविणोदा
वाज्यर्वाकः सुलोकꣳ सुकृतं पृथिव्याम्। ततः खनेम सुप्रतीक
मग्निꣳ स्वो रुहाणा अधि नाकमुत्तमम्॥२२॥ आ त्वा जिघर्मि
मनसा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा। पृथुं तिरश्चा वयसा
बृहन्तं व्यचिष्ठमन्नै रभसं दृशानम्॥२३॥ आ विश्वतः प्रत्यंचं जिघ
र्म्यरक्षसा मनसा तज्जुषेत। मर्यश्री स्पृहयद्वर्णो अग्निर्ना

भिमृशे तन्वा जर्भुराणः॥२४॥ परि वाजपतिः कविरग्निर्हव्यान्य
क्रमीत्। दधद्रत्नानि दाशुषे॥२५॥ परि त्वाग्ने पुरं वयं विप्रꣳ सह
स्य धीमहि॥ धृषद्वर्णं दिवे दिवे हन्तारं भङ्गुरावताम्॥२६॥ त्वमग्ने।
द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि। त्वं वनेभ्य
स्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः॥ देवस्य त्वा सवि
तुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्॥२७॥ पृथिव्याः
सधस्थादग्निं पुरीष्यमङ्गिरस्वत्खनामि॥ ज्योतिष्मन्तं त्वाग्ने
सुप्रतीकमजस्रेण भानुना दीद्यतम्। शिवं प्रजाभ्योऽहिꣳसन्तं पृ
थिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वत्खनामः॥२८॥ अपां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृष्ठमसि योनिरग्नेः समुद्रमभितः पिन्वमानम्। वर्धमानो महाँ२ आ च पुष्करे दिवो मात्रया वरिम्णा प्रथस्व॥२९॥ शर्म च स्थो वर्म च स्थो छिद्रे बहुले उभे। व्यचस्वती संवसाथां भृतमग्निं पुरीष्यम्॥३०॥ संवसाथाँ२ स्वर्विदा समीची उरसा त्मना। अग्निमन्तर्भरिष्यन्ती ज्योतिष्मन्तमजस्रमित्॥ पुरीष्योऽसि विश्वभराऽअथर्वा त्वा प्रथमो निरमन्थदग्ने॥३१॥ त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः॥३२॥ तमु त्वा दध्यङ्ङृषिः पुत्र ईधेऽअथर्वणः। वृत्रहणं पुरन्दरम्॥३३॥ तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम्। धनञ्जयँ२ रणे रणे॥३४॥ सीद होतः स्वऽउ लोके चिकित्वान्त्सादया यज्ञँ२ सुकृतस्य योनौ। देवावीर्देवान्हविषा यजास्यग्ने बृहद्यजमाने वयो धाः॥३५॥ नि होता होतृषदने विदानस्त्वेषो दीदिवाँ२ असदत्सुदक्षः। अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रम्भरः शुचिजिह्वोऽअग्निः॥३६॥ सँ२ सीदस्व महाँ२ असि शोचस्व देववीतमः। वि धूममग्नेऽअरुषं मियेध्य सृज प्रशस्त दर्शतम्॥३७॥ अपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः। तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः॥३८॥ सं ते वायुर्मातरिश्वा दधातूत्तानाया हृदयं यद्विकस्तम्। यो देवानां चरसि प्राणथेन कस्मै देव वषडस्तु तुभ्यम्॥३९॥ सुजातो ज्योतिषा सह शर्म वरूथमासदत्स्वः। वासोऽअग्ने वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥११ ६३॥

श्च रूपᳪ संव्ययस्व विभावसो॥४०॥ उदु तिष्ठ स्वध्वरावानो देव्या धिया।
दृशे च भासा बृहता सुशुक्वनिराग्ने याहि सुशस्तिभिः॥४१॥ ऊर्ध्व
ऊ षु ण ऊतये तिष्ठा देवो न सविता। ऊर्ध्वो वाजस्य सनिता यदञ्जिभि
र्वाघद्भिर्विह्वयामहे॥४२॥ स जातो गर्भो असि रोदस्योरग्ने चारु
र्विभृत ओषधीषु। चित्रः शिशुः परि तमाᳪस्यक्तून् प्र मातृभ्यो अधि
कनिक्रदद्गाः॥४३॥ स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन्। पृथुर्भ
व सुषदस्त्वमग्नेः पुरीषवाहणः॥४४॥ शिवो भव प्रजाभ्यो मानुषीभ्य
स्त्वमङ्गिरः। मा द्यावापृथिवी अभि शोचीर्मान्तरिक्षं मा वनस्पतीन्
॥४५॥ प्रैतु वाजी कनिक्रदन्नानदद्रासभः पत्वा। भरन्नग्निं पुरीष्यं

॥११ ६३॥

मा पाद्यायुषः पुरा॥४६॥ वृषाग्निं वृषणं भरन्नपां गर्भᳪ समुद्रियं
म्। अग्न आ याहि वीतये॥ ऋतᳪ सत्यमृतᳪ सत्यमग्निं पुरीष्यम
ङ्गिरस्वद्भरामः॥४७॥ ओषधयः प्रति मोदध्वमग्निमेतᳪ शिवं
मायन्तमभ्यत्र युष्माः। व्यस्यन् विश्वा अनिरा अमीवा नि
षीदन्नो अप दुर्मतिं जहि॥४८॥ ओषधयः प्रति गृभ्णीत पुष्प
वतीः सुपिप्पलाः। अयं वो गर्भ ऋत्वियः प्रत्नᳪ सधस्थमासद
त्॥४९॥ विपाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो
अमीवाः। सुशर्म्मणो बृहतः शर्म्मणि स्यामग्नेरहᳪ सुहव
स्य प्रणीतौ॥५०॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महे रणाय चक्षसे ॥५१॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः ॥
उशतीरिव मातरः ॥५२॥ तस्मा ऽअरं गमाम वो यस्य क्षयाय जिन्व
थ ॥ आपो जनयथा च नः ॥५३॥ मित्रः सꣳसृज्य पृथिवीं भूमिं च
ज्योतिषा सह ॥ सुजातं जातवेदसमयक्ष्माय त्वा सꣳसृजामि प्रजा
भ्यः ॥५४॥ रुद्राः सꣳसृज्य पृथिवीं बृहज्ज्योतिः समीधिरे ॥ तेषां भा
नुरजस्र ऽइच्छुक्रो देवेषु रोचते ॥५५॥ संसृष्टां वसुभी रुद्रैर्धीरैः
कर्म्मण्यां मृदं ॥ हस्ता[illegible]भ्यां मृद्वीं कृत्वा सिनीवाली कृणोतु तां ॥
॥५६॥ सिनीवाली सुकपर्दा सुकुरीरा स्वौपशा ॥ सा तुभ्यमदिते म
ह्योखां दधातु हस्तयोः ॥५७॥ उखां कृणोतु शक्त्या बाहुभ्यामदि

॥६४॥

तिर्द्धिया ॥ माता पुत्रं यथोपस्थे साग्निं बिभर्त्तु गर्भ ऽआ ॥५८॥ म
खस्य शिरोसि ॥ वसवस्त्वा कृण्वंतु गायत्रेण छंदसांगिरस्वद्ध्रु
वासि पृथिव्यसि ॥ धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवी
र्य्यꣳ सजातान्यजमानाय ॥ रुद्रास्त्वा कृण्वंतु त्रैष्टुभेन छंदसांगि
रस्वद्ध्रुवास्यंतरिक्षमसि ॥ धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सु
वीर्य्यꣳ सजातान्यजमानाय ॥ आदित्यास्त्वा कृण्वंतु जागतेन छंदसां
गिरस्वद्ध्रुवासि द्यौरसि ॥ धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सु
वीर्य्यꣳ सजातान्यजमानाय ॥ विश्वे त्वा देवा वैश्वानराः कृण्वंत्वानु
ष्टुभेन छंदसांगिरस्वद्ध्रुवासि दिशोसि ॥ धारया मयि प्रजाꣳ रायस्पो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षगोपत्यं सुवीर्य्यं सजातान्यजमानाय॥ अदित्यै रास्नास्यदितिष्टे
बिलं गृभ्णातु॥५९॥ कृत्वाय सा महीमुखां मृन्मयीं योनिमग्नये॥ पु
त्रेभ्यः प्रायच्छददितिः श्रपयानिति॥६०॥ वसवस्त्वा धूपयंतु गायत्रेण
छंदसांगिरस्वद्रुद्रास्त्वा धूपयंतु त्रैष्टुभेन छंदसांगिरस्वत्॥ आदि
त्यास्त्वा धूपयंतु जागतेन छंदसांगिरस्वद्विश्वे त्वा देवा वैश्वानरा धूप
यंत्वानुष्टुभेन छंदसांगिरस्वत्॥ इन्द्र[illegible] स्त्वा धूपयतु वरुणस्त्वा धू
पयतु विष्णुस्त्वा धूपयतु॥६१॥ अदितिष्ट्वा देवी विश्वदेव्यावती॥ पृ
थिव्याः सधस्थे अंगिरस्वत्खनत्ववट॥६२॥ देवानां त्वा पत्नीर्देवी
र्विश्वदेव्यावतीः॥ पृथिव्याः सधस्थे अंगिरस्वद्दधतूखे॥ धिषणा

॥६५॥

स्त्वा देवीर्विश्वदेव्यावतीः॥ पृथिव्याः सधस्थे अंगिरस्वदभींध
तामुखे॥ वरूत्रीष्ट्वा देवीर्विश्वदेव्यावतीः॥ पृथिव्याः सधस्थे अं
गिरस्वच्छ्रपयंतूखे॥ ग्नास्त्वा देवीर्विश्वदेव्यावतीः॥ पृथिव्याः सध
स्थे अंगिरस्वत्पचंतूखे॥ जनयस्त्वाच्छिन्नपत्रा देवीर्विश्वदेव्याव
तीः पृथिव्याः सधस्थे अंगिरस्वत्पचंतूखे॥६३॥ मित्रस्य चर्षणी
धृतो वो देवस्य सानसि॥ द्युम्नं चित्रश्रवस्तमम्॥६४॥ देवस्त्वा स
वितोद्वपतु सुपाणिः स्वंगुरिः सुबाहुरुत शक्त्या॥ अव्यथमाना पृथि
व्यामाशा दिश आपृण॥६५॥ उत्थाय बृहती भवोदु तिष्ठ ध्रुवा त्वम्॥
मित्रैतां त उखां परिददाम्यभित्या एषा मा भेदि॥६६॥ वसवस्त्वाछृं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दं त्वा गायत्रेण छंदसांगिरस्वद्रुद्रास्त्वा छंदंतु त्रैष्टुभेन छंदसांगि
रस्वत्॥ आदित्यास्त्वा छंदंतु जागतेन छंदसांगिरस्वद्विश्वेत्वा
देवा वैश्वानराः आ छंदंतु आनुष्टुभेन छंदसांगिरस्वत्॥६७॥ आ
कूतिमग्निं प्रयुजं स्वाहा मनो मेधामग्निं प्रयुजं स्वाहा॥ चित्तं
विज्ञातमग्निं प्रयुजं स्वाहा वाचो विधृतिमग्निं प्रयुजं स्वाहा॥
प्रजापतये मनवे स्वाहा अग्नये वैश्वानराय स्वाहा॥६८॥ विश्वो देवस्य
नेतुर्मर्तो वुरीत सख्यम्॥ विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्य
से स्वाहा॥६९॥ मा सु भित्था मा सु रिषोंब धृष्णु वीरयस्व सु॥ अ
ग्निश्चेदं करिष्यथः॥७०॥ दृंहस्व देवि पृथिवि स्वस्तय आसु

॥६६॥

स

रीमाया स्वधया कृतासि॥ जुष्टं देवेभ्य इदमस्तु हव्यमरिष्टा त्व
मुदिहि यज्ञे अस्मिन्॥७१॥ द्रून्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः॥
सहसस्पुत्रो अद्भुतः॥७२॥ परस्या अधि संवतो वराँ अभ्यातर।
यत्राहमस्मि ताँ अव॥७३॥ परमस्याः परावतो रोहिदश्व इहाग
हि॥ पुरीष्यः पुरुप्रियोग्ने त्वं तरा मृधः॥७४॥ यदग्ने कानि कानि
चिदा ते दारूणि दध्मसि॥ सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य
॥७५॥ यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति॥ सर्वं तदस्तु ते
घृतं तज्जुषस्व यविष्ठ्य॥७६॥ अहरहरप्रयावं भरंतोश्वायेव
तिष्ठते घासमस्मै॥ रायस्पोषेण समिषा मदंतोग्ने मा ते प्रतिवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६७॥

ण्णारिषाम॥७८॥नाभापृथिव्याः।समिधानेऽअग्नौरायस्पोषायबृ
हतेहवा॰॰महे।इरम्मदंबृहदुक्थंयजत्रंजेतारमग्निंपृतनासुसा
सहिम्॥७९॥याःसेनाऽअभीत्वरीराव्याधिनीरुगणाऽउत।येस्ते
नायेचतस्करास्तांस्तेऽअग्नेपिदधाम्यास्ये॥८०॥दंष्ट्राभ्याम्म
लिम्लूञ्जम्भ्यैस्तस्क॰॰राँऽउत।हनुभ्यांस्तेनान्भगवस्तांस्त्वंखा
दसुखादितान्॥८१॥येजनेषुमलिम्लवस्तेनासस्तस्करावने।
येकक्षेष्वघायवस्तांस्तेदधामिजम्भयोः॥८२॥योऽअस्मभ्यम
रातीयाद्यश्चनोद्वेषतेजनः।निंदाद्योऽअस्मांधिप्साच्चसर्वंतम्म
स्मसाकुरु॥८३॥संशितम्मे।ब्रह्मसंशितंवीर्य्यंबलम्।सं
शितंक्षत्रंजिष्णुयस्याहमस्मिपुरोहितः॥८४॥उदेषांबाहूऽअति
रमुद्वर्च्चोऽअथोबलम्।क्षिणोमिब्रह्मणामित्रानुन्नयामिस्वाँऽअ
हम्॥८५॥अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः।प्रप्रदाता
रंतारिषऽऊर्ज्जंनोधेहिद्विपदेचतुष्पदे।विश्वकर्म्मणेस्वाहा॥८६॥
पुनस्त्वादित्यारुद्रावसवःसमिंधतांपुनर्ब्रह्माणोवसुनीथयज्ञैः।
घृतेनत्वंतन्वंवर्द्धयस्वसत्याःसंतुयजमानस्यकामाःस्वाहा॥८७॥इति
माध्यंदिनीयवाजसनेयसंहितापाठेएकादशोध्यायः॥११॥ ॥हरिःॐ॥
दृशानोरुक्मऽउर्व्याव्यद्यौद्दुर्म्मर्षमायुःश्रियेरुचा नः।अग्निरमृ
तोऽअभवद्वयोभिर्य्यदेनन्द्यौरजनयत्सुरेताः॥१॥नक्तोषासासम

॥६७॥

॥

नक्तोषासा समनसा विरूपे धापयेते शिशुमेकं समीची॥ द्यावाक्षामा रुक्मो अं
तर्विभाति देवा अग्निं धारयन्द्रविणोदाः॥२॥ विश्वा रूपाणि प्रति मुं
चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे॥ विनाकमख्यत्सविता वरे
ण्योनु प्रयाणमुषसो विराजति॥३॥ सुपर्णोसि गरुत्माँस्त्रिवृत्ते शि
रः॥ गायत्रं चक्षुर्बृहद्रथंतरे पक्षौ॥४॥ स्तोम आत्मा छंदांसि अंगा
नि यजूंषि नाम॥ साम ते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः
शफाः॥५॥ सुपर्णोसि गरुत्मांदिवं गच्छ स्वः पत॥ विष्णोः क्रमोसि स
पत्नहा गायत्रं छंदः आरोह॥ पृथिवीमनु विक्रमस्व॥ विष्णोः क्रमो
स्यभिमातिहा त्रैष्टुभं छंदः आरोह॥ अंतरिक्षमनु विक्रमस्व॥ वि

१ मा

ष्णोः क्रमोस्यरातीयतो हंता जागतं छंदः आरोह॥ दिवमनु विक्रमस्व॥
विष्णोः क्रमोसि शत्रूयतो हंतानुष्टुभं छंदः आरोह॥ दिशोनु विक्रम
स्व॥६॥ अक्रंददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समंज
न्॥ सद्यो जज्ञानो विहीमिद्धो अख्यदा रोदसी भानुना भात्यंतः॥७॥ अ
ग्नेभ्यावर्तिन्नभि मा निवर्तस्वायुषा वर्चसा प्रजया धनेन॥ सन्या
मेधया रय्या पोषेण॥८॥ अग्ने अंगिरः॥ शतं ते संत्वावृतः सहस्रं त
उपावृतः॥ अधा पोषस्य पोषेण पुनर्नो नष्टमाकृधि पुनर्नो रयिमा
कृधि॥९॥ पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा॥ पुनर्नः पाह्यं
हसः॥१०॥ सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया॥ विश्वप्स्न्या विश्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६२॥

तस्परि ॥११॥ आत्वाहार्षमंतरभूर्ध्रुवस्तिष्ठाविचाचलिः ॥ विशस्त्वा
सर्वावांछंतुमात्वद्राष्ट्रमधिभ्रशत् ॥१२॥ उदुत्तमंवरुणपाशमस्म
दवाधमंविमध्यमंश्रथाय ॥ अथावयमादित्यव्रतेतवानागसोअ
दितये [illegible] स्याम ॥१३॥ अग्रेबृहन्नुषसामूर्ध्वोअस्थान्निर्जगन्वांत
मसोज्योतिषागात् ॥ अग्निर्भानुनारुशतास्वंगआजातोविश्वास
द्मान्यप्राः ॥१४॥ हंसःशुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दु
रोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋ
तंबृहत् ॥१५॥ सीदत्वंमातुरस्याउपस्थेविश्वान्यग्नेवयुनानिवि
द्वान् ॥ मैनांतपसामार्चिषाभिशोचीरंतरस्यांशुक्रज्योतिर्विभा

॥६९॥

हि ॥१६॥ अंतरग्नेरुचात्वमुखायाःसदनेस्वे ॥ तस्यास्त्वंहरसा
तपंजातवेदःशिवोभव ॥१७॥ शिवोभूत्वामह्यमग्नेअथोसीदशि
वस्त्वं ॥ शिवाःकृत्वादिशःसर्वाःस्वंयोनिमिहासदः ॥१८॥ छ ॥ दि
वस्प [illegible] रिप्रथमंजज्ञेअग्निरस्मद्द्वितीयंपरिजातवेदाः ॥ तृती
यमप्सुनृमणाअजस्रमिंधानएनंजरतेस्वाधीः ॥१९॥ विद्मातेअ
ग्नेत्रेधात्रयाणिविद्मातेधामविभृतापुरुत्रा ॥ विद्मातेनामपर
मंगुहायद्विद्मातमुत्संयतआजगंथ ॥२०॥ समुद्रेत्वानृमणाअ
प्स्वंतर्नृचक्षाईधेदिवोअग्नऊधन् ॥ तृतीयेत्वारजसितस्थि
वांसमपामुपस्थेमहिषाअवर्धन् ॥२१॥ अक्रंददग्निस्तनय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥७०॥

न्निवव्योः क्षामारेरिहद्वीरुधः समंजन्॥ सद्योजज्ञानोविहीमिद्धो
अख्यदारोदसीभानुनाभात्यंतः॥२२॥ श्रीणामुदारोधरुणोरयी
णांमनीषाणांप्रार्पणः सोमगोपाः॥ वसुःसूनुःसहसोअप्सुराजा
विभात्यग्रउषसामिधानः॥२३॥ विश्वस्यकेतुर्भुवनस्यगर्भआ
रोदसीअपृणाज्जायमानः॥ वीडुंचिदद्रिमभिनत्परायंजनाय
दग्निमयजंतपंच॥२४॥ उशिक्पावकोअरतिःसुमेधामर्तेष्व
ग्निरमृतोनिधायि॥ इयर्तिधूममरुषंभरिभ्रदुच्छुक्रेणशोचि
षाद्यामिनक्षन्॥२५॥ दृशानोरुक्मउर्व्याव्यद्यौद्दुर्मर्षमायुःश्रि
येरुचानः॥ अग्निरमृतोअभवद्वयोभिर्यदेनंद्यौरजनयत्सु

रेताः॥२६॥ यस्तेअद्यकृणवद्भद्रशोचेपूपंदेवघृतवंतमग्ने॥ प्रतं
नयप्रतरंवस्योअच्छाभिसुम्नंदेवभक्तंयविष्ठ॥२७॥ आतंभ
जसौश्रवसेष्वग्नउक्थउक्थआभजशस्यमाने॥ प्रियःसू
र्येप्रियोअग्नाभवात्युज्जातेनभिनददुज्जनित्वैः॥२८॥ त्वामग्ने
यजमानाअनुद्यून्विश्वावसुदधिरेवार्याणि॥ त्वयासहद्र
विणमिच्छमानाव्रजंगोमंतमुशिजोविवव्रुः॥२९॥ अस्ताव्यग्नि
र्नरांसुशेवोवैश्वानरऋषिभिःसोमगोपाः॥ अद्वेषेद्यावा
पृथिवीहुवेमदेवाधत्तरयिमस्मेसुवीरं॥३०॥६॥ समिधाग्निं
दुवस्यतघृतैर्बोधयतातिथिं॥ आस्मिन्हव्याजुहोतन॥१॥

॥७०॥

उदुत्या विश्वेदेवा अग्ने भरंतु चित्तिभिः॥ स नो भव शिवस्त्वꣳ सु
प्रतीको विभावसुः॥ ३३॥ प्रेदग्ने ज्योतिष्मान्याहि शिवेभिरर्चि
भिष्ट्वं॥ बृहद्भिर्भानुभिर्भासन्मा हिꣳसीस्तन्वा प्रजाः॥ ३४॥ अ
क्रंददग्निस्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समंजन्॥ सद्यो
जज्ञानो विहीमिद्धो अख्यदारोदसी भानुना भात्यंतः॥ ३५॥ प्रप्रा
यमग्निर्भरतस्य शृण्वे वि यत्सूर्यो न रोचते बृहद्भाः॥ अभि यः
पूरुं पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः॥ ३६॥ आपो
देवीः प्रतिगृभ्णीत भस्मैतत्स्योने कृणुध्वꣳ सुरभा उ लोके॥ त
स्मै नमंतां जनयः सुपत्नीर्मातेव पुत्रं बिभृता स्वेनत्॥ ३७॥ अ

प्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे॥ गर्भे संजायसे पुनः॥ ३८॥ ग
र्भो अस्योषधीनां गर्भो वनस्पतीनां॥ गर्भो विश्वस्य भूतस्याग्ने ग
र्भो अपामसि॥ ३९॥ प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने॥ सꣳसृ
ज्य मातृभिष्ट्वं ज्योतिष्मान्पुनरासदः॥ ४०॥ पुनरासद्य सदनमप
श्च पृथिवीमग्ने॥ शेषे मातुर्यथोपस्थेंतरस्याꣳ शिवतमः॥ ४१॥ पुन
रूर्जा निवर्तस्व पुनरग्न इषायुषा॥ पुनर्नः पाह्यꣳहसः॥ ४२॥ सह
रय्या निवर्तस्वाग्ने पिन्वस्व धारया॥ विश्वप्स्न्या विश्वतस्परि॥ ४३॥
बोधा मे अस्य वचसो यविष्ठ मꣳहिष्ठस्य प्रभृतस्य स्वधावः॥ पीय
ति त्वो अनु त्वो गृणाति वंदारुष्टे तन्वं वंदे अग्ने॥ ४४॥ स बोधि सूरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्यंघ्याव सुपतेवसुदावन्॥ यो अस्मद्द्वेषो शसिंचिचक्रेणेस्वाहा॥
॥४४॥पुनस्त्वादित्या रुद्रा वसवः समिंधतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः॥ घृते
न त्वं तन्वं वर्धयस्व सत्याः संतु यजमानस्य कामाः स्वाहा॥४५॥ ६॥ अपे
त वीत वि च सर्पतातो ये त्र स्थ पुराणा ये च नूतनाः॥ अदाद्यमो वसानं पृ
थिव्या अक्रन्निमं पितरो लोकमस्मै॥४६॥ संज्ञानमसि कामधरणं म
यि ते कामधरणं भूयात्॥ अग्नेर्भस्मास्यग्नेः पुरीषमसि॥ चितस्थ प
रिचित ऊर्ध्वचितः श्रयध्वं॥४७॥ अयं सो अग्निर्यस्मिन्त्सोममिंद्रः सु
तं दधे जठरे वावशानः॥ सहस्रियं वाजमत्यं न सप्तिं ससवान्त्सन्त्स्तूय
से जातवेदः॥४८॥ अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र॥

॥७२॥

येनांतरिक्षमुर्वाततंथ त्वेषः स भानुरर्णवो नृचक्षाः॥४९॥ अग्ने दिवो अ
र्णमच्छा जिगास्यच्छा देवाँ ऊचिषे धिष्ण्या ये॥ या रोचने परस्तात्सूर्यस्य
याश्चावस्तादुपतिष्ठंत आपः॥ पुरीष्यासो अग्नयः प्रावणेभिः सजोष
सः॥ जुषंतां यज्ञमद्रुहो नमीवा इषो महीः॥५१॥ इडामग्ने पुरुदंसं स
निं गोः शश्वत्तमं हवमानाय साध॥ स्यान्नः सूनुस्तनयो विजावाग्ने सा
ते सुमतिर्भूत्वस्मे॥५२॥ अयं ते योनिरृत्वियो यतो जातो अरोचथाः॥ तं
जानन्नग्न आरोहाथा नो वर्धया रयिं॥५३॥ चिदसि तया देवतयांगिरस्व
द्ध्रुवा सीद॥ परिचिदसि तया देवतयांगिरस्वद्ध्रुवा सीद॥५४॥ लोकं पृ
ण छिद्रं पृणाथो सीद ध्रुवा त्वं॥ इंद्राग्नी त्वा बृहस्पतिरस्मिन्योनाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥७३॥

सीषदन्॥५५॥ ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः॥ जन्मन्देवानां
विशस्त्रिष्वारोचने दिवः॥५६॥ इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः॥
रथीतमꣳ रथीनां वाजानाꣳ सत्पतिं पतिं॥५७॥ समितꣳ संकल्पेथाꣳ
संप्रियौ रोचिष्णू सुमनस्यमानौ॥ इषमूर्जमभि संवसानौ॥५८॥ सं
वां मनाꣳसि सं व्रता समु चित्तान्याकरं॥ अग्ने पुरीष्याधिपा भव त्वं
न इषमूर्जं यजमानाय धेहि॥ अग्ने त्वं पुरीष्यो रयिमान्पुष्टिमाꣳ असि॥
शिवाः कृत्वा दिशः सर्वाः स्वं योनिमिहासदः॥६०॥ भवतन्नः समन
सौ सचेतसावरेपसौ॥ मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शि
वौ भवतमद्य नः॥६१॥ मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योनौ

अभारुखा॥ तां विश्वैर्देवैरृतुभिः संविदानः प्रजापतिर्विश्वकर्मा वि मुं
चतु॥६२॥ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्कर
स्य॥ अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु॥६३॥ न
मः सु ते निर्ऋते तिग्मतेजोऽयस्मयं वि चृता बंधमेतं॥ यमेन त्वं यम्या सं
विदानोत्तमे नाके अधि रोहयैनं॥६४॥ यस्यास्ते घोर आसंजुहोम्येषां
बंधानामवसर्जनाय॥ यां त्वा जनो भूमिरिति प्रमंदते निर्ऋतिं त्वाहं प
रि वेद विश्वतः॥६५॥ यं ते देवी निर्ऋतिराबबंध पाशं ग्रीवास्वविचृत्यं॥
तं ते वि ष्याम्यायुषो न मध्यादथैतं पितुमद्धि प्रसूतः॥ नमो भूत्यै येदं च
कार॥६६॥ निवेशनः संगमनो वसूनां विश्वा रूपाभि चष्टे शचीभिः॥ देव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥७४॥ २ ते

१ स

इ वसु वितास्य घर्मेंद्रान तं स्योस मरे पथीनं॥६७॥ सीरा युंजंति कवयो
युगा वितन्वते पृथक्॥ धीरा देवेषु सुम्नया॥६८॥ युनक्त सीरा वियुगा तनु
ध्वं कृते योनौ वपतेह बीजं॥ गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः प
क्वमेयात्॥६९॥ शुनं सुफाला विकृषंतु भूमिं शुनं कीनाशा अभियं
तु वाहैः॥ [struck out] शुनासीरा हविषा तोशमाना सुपिप्पला ओषधीः
कर्त्तसस्मे॥७०॥ घृतेन सीता मधुना समज्यतां विश्वैर्देवैरनुमता मरु
द्भिः॥ ऊर्जस्वती पयसा पिन्वमानास्मान्त्सीते पयसाभ्याववृत्स्व॥
॥७१॥ लांगलं पवीरवत्सुशेवं सोमपित्सरु॥ तदुद्वपति गामविं प्र
फर्व्यं च पीवरीं प्रस्थावद्रथवाहणं॥७२॥ कामं कामदुघे धुक्ष्व मि

॥७४॥

त्राय वरुणाय च॥ इंद्रायाश्विभ्यां पूष्णे प्रजाभ्य ओषधीभ्यः॥७३॥ विमुच्य
ध्वम॥ घ्न्या देवयाना अगन्म तमसस्पारमस्य॥ ज्योतिरापाम॥
॥७४॥ सजूरब्दो अयवोभिः सजूरुषा अरुणीभिः॥ सजोषसा अश्विना
दंसोभिः सजूः सूर एतशेन सजूर्वैश्वानर इडया घृतेन स्वाहा॥७५॥ ६॥
या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा॥ मनै नु बभ्रूणामहं शतं धा
मानि सप्त च॥७६॥ शतं वो अंब धामानि सहस्रमुत वो रुहः॥ अधा शत
क्रत्वो यूयमिमं मे अगदं कृत॥७७॥ ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसू
वरीः॥ अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः॥७८॥ ओषधीरिति मा
तरस्तद्वो देवीरुपब्रुवे॥ सनेयमश्वं गां वास आत्मानं तव पूरुष॥७९॥ अश्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥७५॥

श्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गोभाज इत्किलासथ यत्सनवथ पूरुषं॥८१॥ यत्रौषधीः समग्मत राजानः समिताविव। विप्रः स उच्यते भिषग्रक्षोहामीवचातनः॥८२॥ अश्वावतीं सोमावतीमूर्जयन्तीमुदोजसं। आवित्सि सर्वा ओषधीरस्मा अरिष्टतातये॥८३॥ उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते। धनं सनिष्यन्तीनामात्मानं तव पूरुष॥८४॥ इष्कृतिर्नाम वो माताथो यूयं स्थ निष्कृतीः। सीराः पतत्रिणी स्थन यदामयति निष्कृथ॥८५॥ अति विश्वाः परिष्ठाः स्तेन इव व्रजमक्रमुः। ओषधीः प्राचुच्यवुर्यत्किं च तन्वो रपः॥८६॥ यदिमा वाजयन्नहमोषधीर्हस्त आदधे। आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा॥८७॥

॥७५॥ ॥८३॥

यस्यौषधीः प्रसर्पथाङ्गमङ्गं परुष्परुः। ततो यक्ष्मं वि बाधध्व उग्रो मध्यमशीरिव॥८८॥ साकं यक्ष्म प्र पत चाषेण किकिदीविना। साकं वातस्य ध्राज्या साकं नश्य निहाकया॥८९॥ अन्या वो अन्यामवत्वन्यान्यस्या उपावत। ताः सर्वाः संविदाना इदं मे प्रावता वचः॥९०॥ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः॥९१॥ मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत। अथो यमस्य पड्बीशात्सर्वस्माद्देवकिल्बिषात्॥९२॥ अवपतन्तीः समवदन्त दिव ओषधयस्परि। यं जीवमश्नवामहै न स रिष्याति पूरुषः॥९३॥ या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्ष

णः ॥ तां सोमस्य त्वमुत्तमारं कामाय यथा हृदे ॥१३॥ या ओषधीः सोम-
राज्ञीर्विष्ठिताः पृथिवीमनु ॥ बृहस्पतिप्रसूता अस्यै संदत्त वीर्यं ॥१४॥
याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः ॥ सर्वाः संगत्य वीरुधोऽस्यै संद-
त्त वीर्यं ॥१५॥ नास्य पित्री बलासस्यार्शस उपचितामसि ॥ अथो त्वमास-
स्य यक्ष्माणां पाकारोरसि नाशनी ॥१६॥ मा वो रिषत् खनिता यस्मै चा-
हं खनामि वः ॥ द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरं ॥१७॥ ओषध-
यः संवदन्ते सोमेन सह राज्ञा ॥ यस्मै कृणोति ब्राह्मणस्तं राजन्पारया-
मसि ॥१८॥ त्वां गंधर्वा अखनंस्त्वामिंद्रस्त्वां बृहस्पतिः ॥ त्वामोष-
धे सोमो राजा विद्वान्यक्ष्मादमुच्यत ॥१९॥ त्वमुत्तमास्योषधे तव वृक्षा

उपस्तयः ॥ उपस्तिरस्तु सोऽस्माकं यो अस्मां अभिदासति ॥२०॥६॥ मा मा
हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा व्या[illegible]नट् ॥ यश्चा-
पश्चंद्राः प्रथमो जजान कस्मै देवाय हविषा विधेम ॥१०१॥ अभ्यावर्त-
स्व पृथिवि यज्ञेन पयसा सह ॥ वपां ते अग्निरिषितोऽवरोहतु ॥१०२॥ अ-
ग्ने यत्ते शुक्रं यच्चंद्रं यत्पूतं यच्च यज्ञियं ॥ तद्देवेभ्यो भरामसि ॥१०३॥ इ-
षमूर्जमहमित आदमृतस्य योनिं महिषस्य धारां ॥ आ मा गोषु विश-
त्वा तनूषु जहामि सेदिमनिराममीवां ॥१०४॥ अग्ने तव श्रवो वयो म-
हि भ्राजन्ते अर्चयो विभावसो ॥ बृहद्भानो शवसा वाजमुक्थ्यं दधा-
सि दाशुषे कवे ॥१०५॥ पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥७७॥

४३७

भी नु नो ॥ पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी उभे ॥१०६॥ पुन्नो
नपाज्जातवेदः सुशस्तिभिर्मंदस्व धीतिभिर्हितः ॥ त्वे इषः संदधुर्भू
रिवर्पसश्चित्रोतयो वामजाताः ॥१०७॥ इरज्यन्नग्ने प्रथयस्व जंतुभिर
स्मे रायो अमर्त्य ॥ स दर्शतस्य वपुषो विराजसि पृणक्षि सानसिं क्रतुं ॥
॥१०८॥ इष्कर्त्तारमध्वरस्य प्रचेतसं क्षयंतं राधसो महः ॥ रातिं वाम
स्य सुभगां महीमिषं दधासि सानसिं रयिं ॥१०९॥ ऋतावानं महिषं
विश्वदर्शतमग्निं सुम्नाय दधिरे पुरो जनाः ॥ श्रुत्कर्णं सप्रथस्तमं
त्वा गिरा दैव्यं मानुषा युगा ॥११०॥ आप्यायस्व समेतु ते विश्वतः सोम
वृष्ण्यं ॥ भवा वाजस्य संगथे ॥१११॥ सं ते पयांसि समु यंतु वाजाः

॥७७॥

५४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥७८॥

संवृध्र्याण्यभिमातिषाहः॥ आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व॥११२॥ आप्या[illegible]यस्व मदिंतम सोम विश्वेभिः रंशुभिः॥ भवा नः सप्रथस्तमः सखा वृधे॥११३॥ आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात्॥ अग्ने त्वां कामया गिरा॥११४॥ तुभ्यं ता अंगिरस्तम विश्वाः सुक्षितयः पृथक्॥ अग्ने कामाय येमिरे॥११५॥ अग्निः प्रियेषु धामसु कामो भूतस्य भ[illegible]व्यस्य॥ संम्राडेको विराजति॥११६॥छ॥ दृशानो रुक्मः॥११८॥ दिवस्परि॥११९॥ समिधाग्निं१५ अपेत१७ अस्मुन्वंतमयजमानं१३ या ओषधीः॥२५॥ मा मा हिंसीः॥११६॥ सहानु वावृषुषा ... इति शुक्लयजुर्वेदसंहितायां त्रयोदशोध्यायः॥१२॥छ॥ कंडिका संख्या ११६॥छ॥

॥७८॥

ताभिर्नो अद्य सर्वाभी रुचे जनाय नस्कृधि॥२२॥ या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः॥ इंद्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते॥२३॥ विराड् ज्योतिरधारयत्स्वराड् ज्योतिरधारयत्॥ प्रजापतिष्ट्वा सादयतु पृ[illegible]ष्ठे पृथिव्या ज्योतिष्मतीं॥२४॥ विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ॥ अग्निष्टेधिपतिस्तया देवतयांगिरस्वद्ध्रुवा सीद॥२५॥ मधुश्च माधवश्च वासंतिकावृतू अग्नेरंतः श्लेषोसि॥ कल्पेतां द्यावापृथिवी कल्पंतामाप ओषधयः कल्पंतामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः॥ ये अग्नयः समनसोंतरा द्यावापृथिवी इमे॥ वासंतिका वृतू अभिकल्पमाना इंद्रमिव देवा अभिसंविशंतु तया देव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८२॥

तयांगिरस्वद्ध्रुवेसीदतं॥२६॥अषाढासिसहमानासहस्वारातीः
सहस्वपृतनायतः॥सहस्रवीर्यासिसामाजिन्व॥२७॥सहस्वेमा
अभिमातीःसहस्वपृतनायतः॥सहस्वसर्वंपाप्मानꣳसहमानास्यो
षधे॥२८॥छि॥मधुवाताऋतायतेमधुक्षरंतिसिंधवः॥माध्वीर्नः
संत्वोषधीः॥२९॥मधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः॥म
धुद्यौरस्तुनःपिता॥३०॥मधुमान्नोवनस्पतिर्मधुमाꣳअस्तुसूर्यः॥
माध्वीर्गावोभवंतुनः॥३१॥अपांगंभेसीदमात्वासूर्योभितोप्सी
न्माग्निर्वैश्वानरः॥अच्छिन्नपत्राःप्रजाअनुवीक्षस्वानुत्वादिव्या
वृष्टिःसचतां॥३२॥त्रीन्समुद्रान्समसृपत्स्वर्गानपांपतिर्वृषभ

॥८२॥

सू

इष्टकानां॥पुरीषंवसानःसुकृतस्यलोके तत्रगच्छयत्रपूर्वेपरेताः॥
॥३३॥महीद्यौःपृथिवीचनइमंयज्ञंमिमिक्षतां॥पिपृतांनोभरीम
भिः॥३४॥विष्णोःकर्माणिपश्यतयतोव्रतानिपस्पशे॥इंद्रस्ययुज्यः
सखा॥३५॥ध्रुवासिधरुणेतोजज्ञेप्रथममेभ्योयोनिभ्योअधिजा
तवेदाः॥सगायत्र्यात्रिष्टुभानुष्टुभाचदेवेभ्योहव्यंवहतुप्रजानन्॥
॥३६॥इषेरायेरमस्वसहसेद्युम्नऊर्जेअपत्याय॥सम्राडसिस्व
राडसिसारस्वतौत्वोत्सौप्रावेतां॥३७॥अग्नेयुक्ष्वाहियेतवाश्वा
सोदेवसाधवः॥अरंवहंतिमन्यवे॥३८॥युक्ष्वाहिदेवहूतमाꣳअश्वाँ
अग्नेरथीरिव॥निहोतापूर्व्यःसदः॥३९॥छि॥सम्यक्स्रवंतिसरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेन धेना अंतर्हृदा मनसा पूयमानाः ॥ घृतस्य धारा अभिचाकशीमि
हिरण्ययो वेतसो मध्ये अग्नेः ॥३८॥ ऋचे त्वा रुचे त्वा भासे त्वा ज्योतिषे
त्वा ॥ अभूदिदं विश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानरस्य च ॥३९॥
अग्निर्ज्योतिषा ज्योतिष्मान् रुक्मो वर्चसा वर्चस्वान् ॥ सहस्रदा अ
सि सहस्राय त्वा ॥४०॥ आदित्यं गर्भं पयसा समंग्धि सहस्रस्य
प्रतिमां विश्वरूपं ॥ परिवृंग्धि हरसा माभिमंस्थाः शतायुषं कृणु
हि चीयमानः ॥४१॥ वातस्य जूतिं वरुणस्य नाभिमश्वं जज्ञानꣳ
सरिरस्य मध्ये ॥ शिशुं नदीनां हरिमद्रिबुध्नमग्ने मा हिꣳसीः परमे
व्योमन् ॥४२॥ अजस्रमिंदुमरुषं भुरण्युमग्निमीडे पूर्वचित्तिं नमो

॥८२॥

भिः ॥ स पर्वभिर्ऋतुशः कल्पमानो गां मा हिꣳसीरदितिं विराजं ॥४३॥
वरूत्रीं त्वष्टुर्वरुणस्य नाभिमविं जज्ञानां रजसः परस्मात् ॥ मही
ꣳ साहस्रीमसुरस्य मायामग्ने मा हिꣳसीः परमे व्योमन् ॥४४॥ यो
अग्निरग्नेरध्यजायत शोकात् पृथिव्या उत वा दिवस्परि ॥ येन प्रजा
विश्वकर्मा जजान तमग्ने हेडः परि ते वृणक्तु ॥४५॥ चित्रं देवानामु
दगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ॥ आप्रा द्यावापृथिवी अंत
रिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च ॥४६॥ इमम्मा हिꣳसीर्द्विपादं
पशुꣳ सहस्राक्षो मेधाय चीयमानः ॥ मयुं पशुं मेधमग्ने जुषस्व तेन चि
न्वानस्तन्वो निषीद ॥ मयुं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥४७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८३॥

इमम्मा हिꣳसीरेकशफं पशुं कनिक्रदं वाजिनं वाजिनेषु। गौरमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद। गौरं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥५०॥ इमꣳ साहस्रꣳ शतधारमुत्सं व्यच्यमानꣳ सरिरस्य मध्ये। घृतं दुहानामदितिं जनायाग्ने मा हिꣳसीः परमे व्योमन्। गवयमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद। गवयं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥५१॥ इममूर्णायुं वरुणस्य नाभिं त्वचं पशूनां द्विपदां चतुष्पदाम्। त्वष्टुः प्रजानां प्रथमं जनित्रमग्ने मा हिꣳसीः परमे व्योमन्। उष्ट्रमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद। उष्ट्रं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥५२॥

॥८३॥

पो

अजो ह्यग्नेरजनिष्ट शोकात्सो अपश्यज्जनितारमग्रे। तेन देवा देवतामग्रमायंस्तेन रोहमायन्नुप मेध्यासः। शरभमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद। शरभं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥५३॥ त्वं यविष्ठ दाशुषो नॄꣳ पाहि शृणुधी गिरः। रक्षा तोकमुत त्मना ॥५४॥ धा॥ अपां त्वेमन्त्सादयाम्यपां त्वोद्मन्त्सादयाम्यपां त्वा भस्मन्त्सादयामि। अपां त्वा ज्योतिषि सादयाम्यपां त्वायने सादयामि। अर्णवे त्वा सदने सादयामि समुद्रे त्वा सदने सादयामि सरिरे त्वा सदने सादयामि। अपां त्वा क्षये सादयाम्यपां त्वा सधिषि सादयामि। अपां त्वा सदने सादयाम्यपां त्वा सधस्थे सादयाम्यपां त्वा योनौ सा

२ मो

दयामि॥ अपां त्वा पुरीषे सादयाम्यपां त्वा पाथसि सादयामि॥ गायत्रेण त्वा छंदसा सादयामि त्रैष्टुभेन त्वा छंदसा सादयामि जागतेन त्वा छंदसा सादयामि॥ आनुष्टुभेन त्वा छंदसा सादयामि पाङ्क्तेन त्वा छंदसा सादयामि॥५५॥ अयं पुरो भुवस्तस्य प्राणो भौवायनो वसंतः प्राणायनः॥ गायत्री वासंती॥५६॥ गायत्र्यै गायत्रं गायत्रादुपांशुरुपांशोस्त्रिवृत् त्रिवृतो रथंतरं॥ वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्यः॥५७॥ अयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणं॥ ग्रीष्मो मानसस्त्रिष्टुप् ग्रैष्मी॥५८॥ त्रिष्टुभः स्वारं स्वारादंतर्यामोंतर्यामात्पंचदशः पंचदशाद्बृहत्॥ भरद्वाज ऋषिः प्रजापति

॥८४॥

गृहीतया त्वया मनो गृह्णामि प्रजाभ्यः॥५९॥ अयं पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं॥ वर्षाश्चाक्षुष्यो जगती वार्षी॥६०॥ जगत्या ऋक्सममृक्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपं॥ जमदग्निर्ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः॥६१॥ इदमुत्तरात्स्वस्तस्य श्रोत्रं सौवं॥ शरच्छ्रौत्र्यनुष्टुप् शारदी॥६२॥ अनुष्टुभ ऐडमैडान्मंथी मंथिन एकविंश एकविंशाद्वैराजं॥ विश्वामित्र ऋषिः प्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः॥६३॥ इयमुपरि मतिस्तस्यै वाङ्मात्या॥ हेमंतो वाच्यः पंक्तिर्हैमंती॥६४॥ पंक्त्यै निधनवन्निधनवत आग्रयण आग्रयणात्त्रिणवत्रयस्त्रिंशौ त्रिणवत्र

न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८५॥

यश्चिश्वराभ्यां श्वराक्तुर रैवले॥ विश्वकर्मा ऋषिः प्रजापतिगृहीतया त्वया वाचं मे पाहि प्रजाभ्यः॥ लोकं पृण छिद्रं पृण अथो सीद ध्रुवा त्वम्। इन्द्राग्नी त्वा बृहस्पतिः। अस्मिन् योनावसीषदन्॥ ता अस्य सूददोहसः सोमं श्रीणन्ति पृश्नयः। जन्मन् देवानां विशस्त्रिष्वा रोचने दिवः॥ इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः॥

॥८५॥८

यश्चि श्वराभ्यां श्वराक्तुर रैवले॥ विश्वकर्मा ऋषिः प्रजापतिगृहीतया त्वया वाचं मे पाहि प्रजाभ्यः॥ लोकं पृ तो णे अ स्यं द्र वि श्वा॥ इ॥ ध्वा। म चि म्हा मि १२ ध्रु वा स्त्रि १३ म धु वा ता॥ १४ सम्य क् स्र वं ति॥ १५॥ इ म म्मा हि श्सीः॥ १६ अ पां त्वा १७॥ अ यं पु रः॥ १८॥ अं डि क्रा॥ १९॥ स मा नु वा के षु पंच षष्ठि॥ इति शुक्लयजुर्वेदसंहितायां चतुर्दशोऽध्यायः॥ हरिः ॐ॥ ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासि ध्रुवं योनिमासीद साधुया। उख्यस्य केतुं प्रथमं जुषाणा अश्विनाध्वर्यू सादयतामिह त्वा॥ १॥ कुलायिनी घृतवती पुरंधिः स्योने सीद सदने पृथिव्याः॥ अभि त्वा रुद्रा वसवो गृणन्त्विमा ब्रह्म पीपिहि सौभगायाश्विनाध्वर्यू सा

दयतामिह त्वा॥ २॥ स्वैर्दक्षैर्दक्षपितेह सीद देवानां सुम्ने बृहते रणाय॥ पितेवैधि सूनव आ सुशेवा स्वावेशा तन्वा संविशस्वाश्विनाध्वर्यू सादयतामिह त्वा॥ ३॥ पृथिव्याः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभि गृणन्तु देवाः॥ स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणा यजस्वाश्विनाध्वर्यू सादयतामिह त्वा॥ ४॥ अदित्यास्त्वा पृष्ठे सादयाम्यन्तरिक्षस्य धर्त्रीं विष्टम्भनीं दिशामधिपत्नीं भुवनानां॥ ऊर्मिर्द्रप्सो अपामसि विश्वकर्मा त ऋषिरश्विनाध्वर्यू सादयतामिह त्वा॥ शुक्रश्च शुचिश्च ग्रैष्मावृतू अग्नेरन्तःश्लेषोऽसि॥ कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः॥ ये अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्नयः समनसोंतरा द्यावापृथिवी इमे ॥ ग्रैष्मावृतू अभिकल्पमाना इं
द्रमिव देवा अभिसंविशंतु तया देवतयांगिरस्वद्ध्रुवे सीदतं ॥५॥ स
जूर्ऋतुभिः सजूर्विधाभिः सजूर्देवैः सजूर्देवैर्वयोनाधैः ॥ अग्न
त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा ॥ सजूर्ऋतुभिः सजू
र्विधाभिः सजूर्वसुभिः सजूर्देवैर्वयोनाधैः ॥ अग्नये त्वा वैश्वानरा
याश्विनाध्वर्यू सादयतामिह त्वा ॥ सजूर्ऋतुभिः सजूर्विधाभिः
सजू रुद्रैः सजूर्देवैर्वयोनाधैः ॥ अग्नये त्वा वैश्वानरायाश्विनाध्व
र्यू सादयतामिह त्वा ॥ सजूर्ऋतुभिः सजूर्विधाभिः सजूरादित्यैः
सजूर्देवैर्वयोनाधैः ॥ अग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादय

॥८६॥

तामिह त्वा ॥ सजूर्ऋतुभिः सजूर्विधाभिः सजूर्विश्वैर्देवैः सजू
र्देवैर्वयोनाधैः ॥ अग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामि
ह त्वा ॥६॥ प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि ॥ चक्षुर्म उर्व्या वि
भाहि श्रोत्रं मे श्लोकय ॥७॥ अपः पिन्वौषधीर्जिन्व द्विपादव चतुष्पा
त्पाहि ॥ दिवो वृष्टिमेरय ॥८॥ ॥९॥ मूर्द्धा वयः प्रजापतिश्छंदः क्ष
त्रं वयो मयंदं छंदः ॥ विष्टंभो वयोधिपतिश्छंदो विश्वकर्मा वयः पर
मेष्ठी छंदः ॥१०॥ बस्तो वयो विवलं छंदो वृष्णिर्वयो विशालं छंदः ॥
पुरुषो वयस्तंद्रं छंदो व्याघ्रो वयोनाधृष्टं छंदः ॥११॥ सिंहो वयश्छदि
श्छंदः पष्ठवाड्वयो बृहती छंदः ॥ उक्षा वयः ककुप् छंदऋषभो वयः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्तो बृहती छंदः ॥११॥ अनड्वान्वयः पङ्क्तिश्छंदो धेनुर्वयो जगती छं
दः ॥ त्र्यविर्वयस्त्रिष्टुप् छंदो दित्यवाड्वयो विराट् छंदः ॥१२॥ पंचावि
र्वयो गायत्री छंदस्त्रिवत्सो वय उष्णिक् छंदः ॥ तुर्यवाड्वयोनुष्टुप् छंदो
लोकं॰ पृणता अस्येंद्रं विश्वा ॥१३॥ ध॥ इंद्राग्नी अव्यथमानामिष्टकां
दृंहतं युवं ॥ पृष्ठेन द्यावापृथिवी अंतरिक्षं च विबाधसे ॥१४॥ विश्व
कर्मा त्वा सादयत्वंतरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीमं ॥ अंतरिक्षं
सि यच्छांतरिक्षं दृंहांतरिक्षं मा हिंसीः ॥ विश्वस्मै प्राणायापाना
य व्यानायोदानाय प्रतिष्ठायै चरित्राय ॥ वायुष्ट्वाभिपातु मह्या स्व
स्त्या छर्दिषा शंतमेन तया देवतयांगिरस्वद्ध्रुवा सीद ॥१५॥ राज्ञ्यसि

॥८८॥

प्राची दिग्विराडसि दक्षिणा दिक्सम्राडसि प्रतीची दिक्स्वराडस्यु
दीची दिगधिपत्न्यसि बृहती दिक् ॥ विश्वकर्मा त्वा सादयत्वंतरिक्षस्य
पृष्ठे ज्योतिष्मतीं ॥ विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्य
च्छ ॥ वायुष्टेधिपतिस्तया देवतयांगिरस्वद्ध्रुवा सीद ॥१६॥ नभश्च न
भस्यश्च वार्षिकावृतू अग्नेरंतः श्लेषोसि ॥ कल्पेतां द्यावापृथि
वी कल्पंतामाप ओषधयः कल्पंतामग्नयः पृथङ्मम ज्यैष्ठ्याय स
व्रताः ॥ ये अग्नयः समनसोंतरा द्यावापृथिवी इमे ॥ वार्षिकावृतू
अभिकल्पमाना इंद्रमिव देवा अभिसंविशंतु तया देवतयांगि
रस्वद्ध्रुवे सीदतं ॥ इषश्चोर्जश्च शारदावृतू अग्नेरंतःश्लेषोसि ॥

॥८८॥

कल्पेतांद्यावापृथिवीकल्पंतामापऽओषधयःकल्पंतामग्नयःपृथ
ङ्मम ज्यैष्ठ्यायसव्रताःयेऽअग्नयःसमनसोंतराद्यावापृथिवीऽइमे
ग्रारदावृतूऽअभिकल्पमानाऽइंद्रमिवदेवाऽअभिसंविशंतुतया
देवतयांगिरस्वद्ध्रुवेसीदतं॥१६॥छ॥आयुर्मेपाहिप्राणंमेपाह्यपा
नंमेपाहिव्यानंमेपाहि॥चक्षुर्मेपाहिश्रोत्रंमेपाहिवाचंमेपिन्वम
नोमेजिन्वात्मानंमेपाहिज्योतिर्मेयच्छ॥१७॥माछंदःप्रमाछंदःप्र
तिमाछंदोऽअस्त्रीवयश्छंदः॥पंक्तिश्छंदऽउष्णिक्छंदः॥१८॥बृह
तीछंदोनुष्टुप्छंदोविराट्छंदोगायत्रीछंदः॥त्रिष्टुप्छंदोजग
तीछंदः॥१९॥पृथिवीछंदोंतरिक्षंछंदोद्यौश्छंदःसमाश्छंदः॥

नक्षत्राणिछंदोवाक्छंदः॥२०॥मनश्छंदःकृषिश्छंदोहिरण्यंछंदोगौ
श्छंदः॥अजाछंदोश्वश्छंदः॥२१॥अग्निर्देवतावातोदेवतासूर्योदे
वताचंद्रमादेवता॥वसवोदेवतारुद्रादेवता॥आदित्यादेवतामरुतो
देवताविश्वेदेवादेवताबृहस्पतिर्देवता॥इंद्रोदेवतावरुणोदेवता॥
॥२२॥छ॥मूर्द्धासिराड्ध्रुवासिधरुणाधर्त्र्यसिधरणी॥आयुषे
त्वावर्चसेत्वाकृष्यैत्वाक्षेमायत्वा॥२३॥यंत्रीराड्यंत्र्यसियमनीध्रु
वासिधरित्री॥इषेत्वोर्जेत्वारय्यैत्वापोषायत्वा॥लोकंपृणताछि
स्पंद्रविश्वाः॥२४॥छ॥आशुस्त्रिवृद्भांतःपंचदशोव्योमासप्तदशो
धरुणऽएकविंशःप्रतूर्त्तिरष्टादशः॥तपोनवदशोभीवर्त्तःसवि

॥८८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८४॥ शोवर्चो द्वाविंशः संभरणस्त्रयोविंशो योनिश्चतुर्विंशः ॥ ॥८४॥
॥२५॥ गर्भाः पंचविंशः ओजस्त्रिणवः क्रतुरेकत्रिंशः प्रतिष्ठा
त्रयस्त्रिंशो ब्रध्नस्य विष्टपं चतुस्त्रिंशः ॥ नाकः षट्त्रिंशो वि
वर्त्तोष्टाचत्वारिंशो धर्त्रं चतुष्टोमः ॥२६॥ ॥छ॥ अग्नेर्भागोसि दीक्षा
या आधिपत्यं ब्रह्म स्पृतं त्रिवृत्स्तोमः ॥ इंद्रस्य भागोसि विष्णोरा
धिपत्यं क्षत्रं स्पृतं पंचदश स्तोमः ॥२७॥ नृचक्षसां भागोसि धा
तुराधिपत्यं जनित्रं स्पृतं सप्तदश स्तोमः ॥ मित्रस्य भागोसि
वरुणस्याधिपत्यं दिवो वृष्टिर्वात स्पृत एकविंशः स्तोमः ॥
॥२८॥ वसूनां भागोसि रुद्राणामाधिपत्यं चतुष्पात्स्पृतं चतु

र्विंश स्तोमः ॥ आदित्यानां भागोसि मरुतामाधिपत्यं गर्भाः स्पृताः पंच
विंश स्तोमः ॥२९॥ अदित्यै भागोसि पूष्ण आधिपत्यमोजः स्पृतं त्रिण
व स्तोमः ॥ देवस्य सवितुर्भागोसि बृहस्पतेराधिपत्यं समीचीर्दिशः
स्पृताश्चतुष्टोम स्तोमः ॥३०॥ यवानां भागोस्ययवानामाधिपत्यं प्रजाः
स्पृताश्चतुश्चत्वारिंश स्तोमः ॥ ऋभूणां भागोसि विश्वेषां देवानामा
धिपत्यं भूतं स्पृतं त्रयस्त्रिंश स्तोमः ॥ सहश्च सहस्यश्च हैमंतिकावृतू
अग्नेरंतः श्लेषोसि ॥ कल्पेतां द्यावापृथिवी कल्पंतामाप ओषधयः क
ल्पंतामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः ॥ ये अग्नयः समनसोंतरा द्यावा
पृथिवी इमे ॥ हैमंतिकावृतू अभिकल्पमाना इंद्रमिव देवा अभिसंवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ण्णं तुलया देवतयांगिरस्वद्ध्रुवे सीदतं ॥ ३० ॥ धि ॥ एकयास्तुवत प्रजा अधी
यंत प्रजा[illegible]पतिरधिपतिरासीत्तिसृभिरस्तुवत ब्रह्मासृज्यत ब्रह्म
णस्पतिरधिपतिरासीत् ॥ पंचभिरस्तुवत भूतान्यसृज्यंत भूतानां पति
रधिपतिरासीत्सप्त[illegible]भिरस्तुवत सप्तऋषयोऽसृज्यंत धाताधिपति
रासीत् ॥ ३२ ॥ नवभिरस्तुवत पितरोऽसृज्यंतादितिरधिपत्न्यासीदेका
दशभिरस्तुवत ऋतवोऽसृज्यंतार्त्तवा अधिपतय आसन् ॥ त्रयो
दश[illegible]भिरस्तुवत मासा असृज्यंत संवत्सरोऽधिपतिरासीत्पंचदशा
भिरस्तुवत क्षत्रमसृज्यतेंद्रो[illegible]ऽधिपतिरासीत् ॥ ३३ ॥ सप्तदशाभिर
स्तुवत ग्राम्याः पशवोऽसृज्यंत बृहस्पतिरधिपतिरासीन्नवदशाभिर

स्तुवत शूद्रार्यावसृज्येतामहोरात्रे अधिपत्नी आस्त्तां ॥ एकविंशत्यास्तुव
तैकशफाः पशवोऽसृज्यंत वरुणोऽधिपतिरासीत्त्रयोविंशत्यास्तुवत क्षु
द्राः पशवोऽसृज्यंत पूषाधिपतिरासीत् ॥ ३४ ॥ पंचविंशत्यास्तुवतारण्याः
पशवोऽसृज्यंत वायुरधिपतिरासीत्सप्तविंशत्यास्तुवत द्यावापृथिवी व्ये
तां वसवो रुद्रा आदित्या अनुव्यायंस्त एवाधिपतय आसन् ॥ नवविंश
त्यास्तुवत वनस्पतयोऽसृज्यंत सोमोऽधिपतिरासीदेकत्रिंशतास्तुवत प्र
जा असृज्यंत यवाश्चायवाश्चाधिपतय आसन् ॥ त्रयस्त्रिंशतास्तुव
त भूतान्यशाम्यन्प्रजापतिः परमेष्ठ्यधिपतिरासीत् ॥ लोकं पृण ता
अस्येंद्रं विश्वाः ॥ ३५ ॥ धि ॥ ध्रुवक्षितिर्ध्रुवयोनिः ॥ ५ ॥ सजूरृतुभिः ॥ २ ॥ १००

मूर्द्धा वयः॥५॥ इंद्राग्नी अव्यथमानां॥६॥ आयुर्मे पाहि॥७॥ मूर्द्धासि॥८॥ आशुस्त्रि
वृत्॥१०॥ अग्नेर्भागोसि॥११॥ एकयास्तुवत॥१२॥ अं॰ डिका संख्या॥१२॥ नवा
नुवाकेषु पंचत्रिंशत्॥ इति शुक्लयजुर्वेदसंहितायां पंचदशोध्यायः॥१५॥
॥१५॥ हरिः ॐ॥ अग्ने जातान्प्रणुदा नः सपत्नान्प्रत्यजातां
जातवेदो नुदस्व। अधि नो ब्रूहि सुमना अहेडँस्तव स्याम शर्म
स्त्रिवरूथ उद्भौ॥१॥ सहसा जातान्प्रणुदा नः सपत्नान्प्रत्यजातांनुदजा
तवेदः॥ अधि नो ब्रूहि सुमनस्यमानो वयंस्याम प्रणुदा नः सपत्नान्॥
षोडशी स्तोम ओजो द्रविणं चतुश्चत्वारिंश स्तोमो वर्चो द्रविणं॥२॥
अग्नेः पुरीषमस्य प्सो नाम तां त्वा विश्वे अभिगृणंतु देवाः॥ स्तोमपृष्ठा

॥९१॥

घृतवतीह सीद प्रजावदस्मे द्रविणा यजस्व॥३॥ एवश्छंदो वरिवश्छं
दः शंभूश्छंदः परिभूश्छंदः॥ आच्छच्छंदो मनश्छंदो व्यचश्छंदः॥४॥
सिंधुश्छंदः समुद्रश्छंदः सरिरं छंदः॥ ककुप्छंदस्त्रिककुप्छंदः
काव्यं छंदो अंकुपं छंदः॥५॥ अक्षरपंक्तिश्छंदः पदपंक्तिश्छंदो वि
ष्टारपंक्तिश्छंदः क्षुरो भ्रजश्छंदः॥ आच्छच्छंदः प्रच्छच्छंदः संयच्छं
दो वियच्छंदः॥६॥ बृहच्छंदो रथंतरं छंदो निकायश्छंदो विवधश्छं
दः॥ गिरश्छंदो भ्रजश्छंदः संस्तुप्छंदोनुष्टुप्छंदः॥७॥ एवश्छं
दो वरिवश्छंदो वयश्छंदो वयस्कृच्छंदः॥ विष्पर्धाश्छंदो विशालं
छंदश्छदिश्छंदो दूरोहणं छंदः॥ तंद्रं छंदो अंकांकं छंदः॥८॥ छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रश्मिनासत्यायसत्यंजिन्वप्रेतिनाधर्मणाधर्मंजिन्व॥अन्वित्यादि
दिवादिवंजिन्वसंधिनांतरिक्षेणांतरिक्षंजिन्व॥९॥प्रतिधिनापृ
थिव्यापृथिवींजिन्वविष्टंभेनवृष्ट्यावृष्टिंजिन्व॥प्रवयान्हाहर्जि
न्वानुयारात्र्यारात्रींजिन्व॥१०॥उशिजावसुभ्योवसूंजिन्वप्रकेते
नादित्येभ्यआदित्यांजिन्व॥तंतुनारायस्पोषेणरायस्पोषंजिन्वसं
सर्पेणश्रुतायश्रुतंजिन्व॥११॥ऐडेनौषधीभिरोषधीर्जि[illegible]न्वो
त्तमेनतनूभिस्तनूर्जिन्व॥वयोधसाधीतेनाधीतंजिन्वाभिजि
तातेजसातेजोजिन्व॥१२॥प्रतिपदसिप्रतिपदेत्वानुपदस्यनुप
देत्वा॥संपदसिसंपदेत्वातेजोसितेजसेत्वा॥१३॥त्रिवृदसित्रिवृ

तेत्वाप्रवृदसिप्रवृतेत्वा॥विवृदसिविवृतेत्वासवृदसिसवृते
त्वा॥१४॥आक्रमोस्याक्रमायत्वासंक्रमोसिसंक्रमायत्वा॥उत्क्र
मोस्युत्क्रमायत्वोत्क्रांतिरस्युत्क्रांत्यैत्वा॥अधिपतिनोर्जोर्जंजि र्जं
न्ववेषश्रीः क्षत्रायक्षत्रंजिन्व॥१५॥६॥राज्ञ्यसिप्राचीदिग्वसवस्ते
देवाअधिपतयः॥अग्निर्हेतीनांप्रतिधर्त्ता॥१६॥त्रिवृत्त्वास्तोमः
पृथिव्यांश्रयत्वाज्यमुक्थमव्यथायैस्तभ्नातु॥रथंतरंसाम
प्रतिष्ठित्याअंतरिक्षे॥१७॥ऋषयस्त्वाप्रथमजादेवेषुदिवोमात्र
यावरिम्णाप्रथंतु॥विधर्त्ताचायमधिपतिश्चतेत्वासर्वेसंवि
दानानाकस्यपृष्ठेस्वर्गेलोकेयजमानंचसादयंतु॥१८॥विराड

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्विदक्षिणा दिक् रुद्रास्ते देवा अधिपतयः॥ इंद्रो हेतीनां प्रतिध
र्त्ता॥१९॥ पंचदशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु प्रउगमुक्थमव्यथा
यै स्तभ्नातु॥ बृहत्साम प्रतिष्ठित्या अंतरिक्षे॥२०॥ ऋषयस्त्वा प्र
थमजा देवेषु दिवो मात्रया वरिम्णा प्रथंतु॥ विधर्त्ता चायमधिपति
श्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च साद
यंतु॥२१॥ सम्राडसि प्रतीची दिगादित्यास्ते देवा अधिपतयः॥ व
रुणो हेतीनां प्रतिधर्त्ता॥२२॥ सप्तदशस्त्वा स्तोमः पृथिव्याꣳ श्रय
तु मरुत्वतीयमुक्थमव्यथायै स्तभ्नातु॥ वैरूपꣳ साम प्रतिष्ठित्या
अंतरिक्षे॥२३॥ ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा

प्रथंतु॥ विधर्त्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य
पृष्ठे स्वर्गे लोके यजमानं च सादयंतु॥२४॥ स्वराडस्युदीची दिङ्मर
तस्ते देवा अधिपतयः॥ सोमो हेतीनां प्रतिधर्त्ता॥२५॥ एकवि
ꣳशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु निष्केवल्यमुक्थमव्यथायै स्त
भ्नातु॥ वैराजꣳ साम प्रतिष्ठित्या अंतरिक्षे॥२६॥ ऋषयस्त्वा प्रथ
मजा देवेषु दिवो मात्रया वरिम्णा प्रथंतु॥ विधर्त्ता चायमधिप
तिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं
च सादयंतु॥२७॥ अधिपत्न्यसि बृहती दिग्विश्वे ते देवा अधिपत
यः॥ बृहस्पतिर्हेतीनां प्रतिधर्त्ता॥२८॥ त्रिणवत्रयस्त्रिꣳशौ त्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१४॥

स्तोमौपृथिव्याऽश्रयत्तौवैश्वदेवाग्निमारुतेउक्थेअव्यथायैस्तभ्नी
तं॥ शाक्वररैवतेसामनीप्रतिष्ठित्याअंतरिक्षे॥१९॥ ऋषयस्त्वाप्र
थमजादेवेषुदिवोमात्रयावरिम्णाप्रथंतु॥ विधर्त्ताचायमधिपति
श्चतेत्वासर्वेसंविदानानाकस्यपृष्ठेस्वर्गेलोकेयजमानंचसाद
यंतु॥२०॥ अयंपुरोहरिकेशःसूर्यरश्मिस्तस्यरथगृत्सश्चरथौजा
श्चसेनानीग्रामण्यौ॥ पुंजिकस्थलाचक्रतुस्थलाचाप्सरसौदंक्ष्ण
वःपशवोहेतिःपौरुषेयोवधःप्रहेतिः॥२१॥ तेभ्योनमोअस्तुतेनोमृ
डयंतुतेनोवंतु॥ तेयंद्विष्मोयश्चनोद्वेष्टितमेषांजंभेदध्मः॥२२॥ अ
यंदक्षिणाविश्वकर्मातस्यरथस्वनश्चरथेचित्रश्चसेनानीग्रा

स्र २५

मण्यौ॥ मेनकाचसहजन्याचाप्सरसौयातुधानाहेतीरक्षांसि
प्रहेतिः॥२३॥ तेभ्योनमोअस्तुतेनोमृडयंतुतेनोवंतु॥ तेयंद्विष्मो
यश्चनोद्वेष्टितमेषांजंभेदध्मः॥२४॥ अयंपश्चाद्विश्वव्यचास्तस्य
रथप्रोतश्चासमरथश्चसेनानीग्रामण्यौ॥ प्रम्लोचंतीचानुम्लो
चंतीचाप्सरसौव्याघ्राहेतिःसर्पाःप्रहेतिः॥२५॥ तेभ्योनमोअस्तुतेनो
मृडयंतुतेनोवंतु॥ तेयंद्विष्मोयश्चनोद्वेष्टितमेषांजंभेदध्मः॥२६॥
अयमुत्तरात्संयद्वसुस्तस्यतार्क्ष्यश्चारिष्टनेमिश्चसेनानीग्रामण्यौ॥
विश्वाचीचघृताचीचाप्सरसाआपोहेतिर्वातःप्रहेतिः॥२७॥ ते
भ्योनमोअस्तुतेनोमृडयंतुतेनोवंतु॥ तेयंद्विष्मोयश्चनोद्वेष्टि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥९५॥

तमेषांजंभेदध्मः॥१८॥ अयमुपर्यर्वाग्वसुस्तस्यसेनजिच्चसुषेण
श्चसेनानीग्रामण्यौ। उर्वशीचपूर्वचित्तिश्चाप्सरसावस्फूर्जन्
तिर्विद्युत्प्रहेतिः॥१९॥ तेभ्योनमोअस्तुतेनोमृडयंतुतेनोवंतु॥ तेयं
द्विष्मोयश्चनोद्वेष्टितमेषांजंभेदध्मः॥२०॥ छ॥ अग्निर्मूर्द्धादिवः
ककुत्पतिःपृथिव्याअयं॥ अपाꣳरेताꣳसिजिन्वति॥२१॥ अयम
ग्निःसहस्रिणोवाजस्यशतिनस्पतिः॥ मूर्द्धाकवीरयीणां॥२२॥ त्वा
मग्नेपुष्करादध्यथर्वानिरमंथत॥ मूर्ध्नोविश्वस्यवाघतः॥२३॥
भुवोयज्ञस्यरजसश्चनेतायत्रानियुद्भिःसचसेशिवाभिः॥ दिवि
मूर्द्धानंदधिषेस्वर्षांजिह्वामग्नेचकृषेहव्यवाहं॥२४॥ अबोध्य

॥९५॥

ग्निःसमिधाजनानांप्रतिधेनुमिवायतीमुषासं। यव्हाइवप्रवया
मुज्जिहानाःप्रभानवःसिस्रतेनाकमछ॥२५॥ अवोचामकवयेमे
ध्यायवचोवंदारुवृषभायवृष्णे। गविष्ठिरोनमसास्तोममग्नौ
दिवीवरुक्ममुरुव्यंचमश्रेत॥२६॥ अयमिहप्रथमोधायिधातृ
भिर्होतायजिष्ठोअध्वरेष्वीड्यः। यमप्नवानोभृगवोविरुरुचुर्व
नेषुचित्रंविभ्वंविशेविशे॥२७॥ जनस्यगोपाअजनिष्टजागृ
विरग्निःसुदक्षःसुवितायनव्यसे। घृतप्रतीकोबृहतादिविस्पृ
शाद्युमद्विभातिभरतेभ्यःशुचिः॥२८॥ त्वामग्नेअंगिरसोगुहा
हितमन्वविंदंछिश्रियाणंवनेवने। सजायसेमथ्यमानःसहोम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हत्वामाहुः सहसस्पुत्रमंगिरः ॥४९॥ सखायः संवः सम्यंचमिषंस्तो
मं चाग्नये ॥ वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ॥५०॥ संसमि
द्युवसे वृषन्नग्ने विश्वान्यर्य आ ॥ इळस्पदे समिध्यसे स नो वसून्या
भर ॥५१॥ त्वामग्ने हविष्मंतो देवं मर्तास ईळते ॥ मन्ये त्वा जातवेद
सं स हव्या वक्ष्यानुषक् ॥५२॥ त्वं चित्रश्रवस्तम हवंते विक्षु जं
तवः ॥ शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळ्हवे ॥५३॥ एना वो अ
ग्निं नमसोर्जो नपातमाहुवे ॥ प्रियं चेतिष्ठमरतिं स्वध्वरं विश्व
स्य दूतममृतं ॥५४॥ विश्वस्य दूतममृतं विश्वस्य दूतममृतं ॥ स
योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः ॥५५॥ स दुद्रवत्स्वा

हुतः स दुद्रवत्स्वाहुतः ॥ सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो
जनानां ॥५६॥ अग्ने वाजस्य गोमत ईशानः सहसो यहो ॥ अस्मे धेहि
जातवेदो महि श्रवः ॥५७॥ स इधानो वसुष्कविरग्निरीळेन्यो गिरा ॥
रेवदस्मभ्यं पुर्वणीक दीदिहि ॥५८॥ क्षपो राजन्नुत त्मनाग्ने वस्तोरु
तोषसः ॥ स तिग्मजंभ रक्षसो दह प्रति ॥५९॥ भद्रो नो अग्निराहुतो
भद्रा रातिः सुभग भद्रो अध्वरः ॥ भद्रा उत प्रशस्तयः ॥६०॥ भद्रं उ
त प्रशस्तयो भद्रं मनः कृणुष्व वृत्रतूर्ये ॥ येना समत्सु सासहः ॥६१॥
येना समत्सु सासहोव स्थिरा तनुहि भूरि शर्धतां ॥ वनेमा ते अभि
ष्टिभिः ॥६२॥ अग्निं तं मन्ये यो वसुरस्तं यं यंति धेनवः ॥ अस्तम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥९८॥ वँतमाशावोस्तंनित्यासोवाजिनइषंस्तोतृभ्यआभर॥६३॥सोअ ॥९८॥
ग्निर्योवसुर्गृणेसंयमायंतिधेनवः॥समर्वंतोरघुद्रुवःसंसु
जातासःसूरयइषंस्तोतृभ्यआभर॥६४॥उभेसुश्चंद्रसर्पिषो
दर्वीश्रीणीषआसनि॥उतोनउत्पुपूर्याउक्थेषुशवसस्पतइषंस्तो
तृभ्यआभर॥६५॥अग्नेतमद्याश्वन्नस्तोमैःक्रतुंनभद्रंहृदिस्पृ
शं॥ऋध्यामातओहैः॥६६॥अधाह्यग्नेक्रतोर्भद्रस्यदक्षस्यसा
धोः॥रथीरृतस्यबृहतोबभूथ॥६७॥एभिर्नोअर्कैर्भवानोअ
र्वाङ्स्वर्णज्योतिः॥अग्नेविश्वेभिःसुमनाअनीकैः॥६८॥अग्नि
ंहोतारंमन्येदास्वंतंवसुंसूनुंसहसोजातवेदसंविप्रंनजा

तवेदसं॥यऊर्ध्वयास्वध्वरोदेवोदेवाच्याकृपा॥घृतस्यविभ्राष्टि
मनुवष्टिशोचिषाजुह्वानस्यसर्पिषः॥६९॥अग्नेत्वंनोअंतमउत
त्राताशिवोभवावरूथ्यः॥वसुरग्निर्वसुश्रवाअच्छानक्षिद्युमत्त
मंरयिंदाः॥तंत्वाशोचिष्ठदीदिवःसुम्नायनूनमीमहेसखि
भ्यः॥७०॥येनऋषयस्तपसासत्रमायन्निंधानाअग्निंस्व
राभरंतः॥तस्मिन्नहंनिदधेनाकेअग्निंयमाहुर्मनवस्तीर्णबर्हि
षं॥७१॥तंपत्नीभिरनुगच्छेमदेवाःपुत्रैर्भ्रातृभिरुतवाहिरण्यैः॥
नाकंगृभ्णानाःसुकृतस्यलोकेतृतीयेपृष्ठेअधिरोचनेदिवः॥
॥७२॥आवाचोमध्यमरुहद्भुरण्युरयमग्निःसत्पतिश्चेकितानः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१९८॥

पृष्ठे पृथिव्या निहितो दविद्युतदधस्पदं कृणुतां ये पृतन्यवः ॥७३॥
अयमग्निर्वीरतमो वयोधाः सहस्रियो द्योततामप्रयुछन् ॥ विभ्रा
जमानः सरिरस्य मध्य उप प्रयाहि दिव्यानि धाम ॥७४॥ संप्रच्य
वध्वमुप संप्रयाताग्ने पथो देवयानान्कृणुध्वं ॥ पुनः कृण्वाना पित
रा युवानान्वाताꣳसीत्त्वयि तंतुमेतं ॥७५॥ उद्बुध्यस्वाग्ने प्रति जागृ
हि त्वमिष्टापूर्ते सꣳसृजेथामयं च ॥ अस्मिन्सधस्थे अध्युत्त
रस्मिन्विश्वे देवा यजमानश्च सीदत ॥७६॥ येन वहसि सहस्रं
येनाग्ने सर्ववेदसं ॥ तेनेमं यज्ञं नो नय स्वर्देवेषु गंतवे ॥७७॥ अ
यं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ॥ तं जानन्नग्न आरोहा

॥१९८॥

थानो वर्द्धया रयिं ॥७८॥ छि ॥ तपश्च तपस्यश्च शैशिरावृतू अग्नेरंतः
श्लेषोसि ॥ कल्पेतां द्यावापृथिवी कल्पंतामाप ओषधयः कल्पंताम
ग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः ॥ ये अग्नयः समनसोंतरा द्यावापृथि
वी इमे ॥ शैशिरावृतू अभिकल्पमाना इंद्रमिव देवा अभिसंविशंतु
तया देवतयांगिरस्वद्ध्रुवे सीदतं ॥७९॥ परमेष्ठी त्वा सादयतु दिवस्पृ
ष्ठे ज्योतिष्मतीम् ॥ विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ ॥ ना ६
सूर्यस्तेधिपतिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद ॥७९॥ लोकं पृण छि
द्रं पृणाथो सीद ध्रुवा त्वं ॥ इंद्राग्नी त्वा बृहस्पतिरस्मिन्योना असीषद
न् ॥८०॥ ता अस्य सूददोहसः सोमꣳश्रीणंति पृश्नयः ॥ जन्मन्देवानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१९९॥

विराखिष्ठ्यारोचने दिवः॥८५॥ इंद्रं विश्वा अवीवृधन्समुद्रव्यचसं गिरः॥ रथीतमं रथीनां वाजानां सत्पतिं पतिं॥८२॥ प्रोथदश्वो न यवसे विष्यन्यदा महः संवरणाद्व्यस्थात्॥ आदस्य वातो अनुवाति शोचिरध स्म ते व्रजनं कृष्णमस्ति॥८३॥ आ यो धूर्षु सदने सादने सीसादद्याम्यवतश्छायायाः समुद्रस्य हृदये॥ रश्मीवती भास्वती मा याद्यां भास्या पृथिवीमोर्वन्तरिक्षं॥ परमेष्ठी त्वा सादयतु दिवस्पृष्ठे व्यचस्वती प्रथस्वती॥ दिवं यच्छ दिवं दृंह दिवं मा हिंसीः॥ विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय॥ सूर्यस्त्वाभिपातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयांगिरस्वद्ध्रुवे सीद तं॥८४॥ सहस्रस्य प्रतिमासि सहस्रस्य प्रतिमासि सहस्रस्योन्मासि॥ साहस्रोसि सहस्राय त्वा॥८५॥ अग्ने जातान्प्रणुदा नः सपत्नान्प्रत्यजातान्नुद जातवेदः॥ इषे नो रास्व सुमना असि स्युः॥ अग्ने जातान्प्रणुदा नः सत्याय॥ राष्ट्रमसि १५ ये पुरः॥ अग्निर्मूर्द्धा ॥ येन ऋषयः तपसा ॥ कुंडिकासंख्या ८५ सप्तानुवाकेषु पंचाशीतिः॥ इति याज्ञवल्क्य संहितायां षोडशोऽध्यायः॥ हरिः॥ ॐ नमस्ते रुद्र मन्यव उतो त इषवे नमः॥ बाहुभ्यामुत ते नमः॥१॥ या ते रुद्र शिवा तनूरघोरापापकाशिनी॥ तया नस्तन्वा शंतमया गि

॥ ॥१०॥१

रिशं तान्निचाकशीहि ॥२॥ यामिषुं गिरिशं त हस्ते बिभर्ष्य
स्तवे ॥ शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् ॥३॥ शि
वेन वचसा त्वा गिरिशाच्छा वदामसि ॥ यथा नः सर्वमिज्जग
दयक्ष्मं सुमना असत् ॥४॥ अध्यवोचदधिवक्ता प्रथमो दै
व्यो भिषक् ॥ अहींश्च सर्वाञ्जंभयन्सर्वाश्च यातुधान्योध
राचीः परा सुव ॥५॥ असौ यस्ताम्रो अरुण उत बभ्रुः सुमं
गलः ॥ ये चैनं रुद्रा अभितो दिक्षु श्रिताः सहस्रशोवैषां हे
ड ईमहे ॥६॥ असौ योवसर्पति नीलग्रीवो विलोहितः ॥ उतै

॥१

नं गोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः ॥७॥ नमो
स्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ॥ अथो ये अस्य सत्वानो
हं तेभ्यो करं नमः ॥८॥ प्रमुंच धन्वनस्त्वमुभयोरार्त्न्योर्ज्यां ॥ या
श्च ते हस्त इषवः परा ता भगवो वप ॥९॥ विज्यं धनुः कपर्दिनो वि
शल्यो बाणवां उत ॥ अनेशन्नस्य या इषव आभुरस्य निषंगधिः ॥
॥१०॥ परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ॥ अथो य इषु
धिस्तवारे अस्मन्निधेहि तं ॥११॥ या ते हेतिर्मीढुष्टम हस्ते बभू
व ते धनुः ॥ तयास्मान्विश्वतस्त्वमयक्ष्मया परि भुज ॥१२॥ अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वतस्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे॥ निशीर्य शल्यानां मुखा शिवो नः सुमना भव॥१२॥ नमस्त आयुधायानातताय धृष्णवे॥ उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने॥१३॥ मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितं॥ मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः॥१५॥ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः॥ मा नो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे॥१६॥ नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां

॥१०१॥

पतये नमः॥ नमः शष्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः॥१७॥ नमो बभ्लुशाय व्याधिनेन्नानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमः॥ नमो रुद्रायाततायिने क्षेत्राणां पतये नमो नमः सूतायाहन्त्यै वनानां पतये नमः॥१८॥ नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमः॥ नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नम उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमः॥१९॥ नमः कृत्स्नायतया धावते सत्त्वनां पतये नमो नमः सहमाना

५७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यनिव्याधिन आव्याधिनीनांपतयेनमः॥ नमककुभायनि
षंगिणेस्तेनानांपतयेनमोनमोनिचेरवेपरिचरायारण्या
नांपतयेनमः॥ २॥ नमोवंचतेपरिवंचतेस्तायूनांपतयेन
मोनमोनिषंगिण इषुधिमतेतस्कराणांपतयेनमः॥ नमः
सृकायिभ्योजिघांसद्भ्योमुष्णतांपतयेनमोनमोसिम
द्भ्योनक्तंचरद्भ्योविकृंतानांपतयेनमः॥ ३॥ ॥ नम उ
ष्णीषिणेगिरिचरायकुलुंचानांपतयेनमोनमइषु
मद्भ्योधन्वायिभ्यश्चवोनमः॥ नमआतन्वानेभ्यःप्रति

दधानेभ्यश्चवोनमोनमआयच्छद्भ्योस्यद्भ्यश्चवोनमः॥
॥४॥ नमोविसृजद्भ्योविध्यद्भ्यश्चवोनमोनमःस्वपद्भ्यो
जाग्रद्भ्यश्चवोनमः॥ नमःशयानेभ्यःआसीनेभ्यश्चवोन
मोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमः॥ ५॥ नमःसभाभ्यः
सभापतिभ्यश्चवोनमोनमोश्वेभ्योश्वपतिभ्यश्चवोन
मः॥ नमआव्याधिनीभ्योविविध्यंतीभ्यश्चवोनमोनमउगणा
भ्य स्तृंहतीभ्यश्चवोनमः॥ ६॥ नमोगणेभ्योग
णपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवो

नी६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१०३॥

नमः॥ नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो
विश्वरूपेभ्यश्च वो नमः॥२५॥ नमः सेनाभ्यः सेनानिभ्यश्च
वो नमो नमो रथिभ्यो अरथेभ्यश्च वो नमः॥ नमः क्षत्तृभ्यः सं
ग्रहीतृभ्यश्च वो नमो नमो महद्भ्यो अर्भकेभ्यश्च वो नमः॥२६॥छ॥
नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारे
भ्यश्च वो नमः॥ नमो निषादेभ्यः पुंजिष्टेभ्यश्च वो नमो नमः श्व
निभ्यो मृगयुभ्यश्च वो नमः॥२७॥ नमः श्वभ्यः श्वपतिभ्यश्च
वो नमो नमो भवाय च रुद्राय च॥ नमः शर्वाय च पशुपतये

॥१०३॥

च नमो नीलग्रीवाय च शितिकंठाय च॥२८॥ नमः कपर्दिने
च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च॥ नमो
गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते
च॥२९॥ नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे
च॥ नमो वृद्धाय च सवृधे च नमोऽग्र्याय च प्रथमाय च॥३०॥ न

म

म आशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च॥ नम
ऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च॥३१॥छ॥
नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।।१०४।।

नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च।
।।३२।। नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च।। नमः श्लोक्याय चावसान्याय च नम उर्वर्याय च खल्याय च।।३३।। नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च।। नम आशुषेणाय चाशुरथाय नमः शूराय चावभेदिने च।
।।३४।। नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च।
नमः श्रुताय च श्रुतसेनाय च नमो दुंदुभ्याय चाहनन्याय च।
।।३५।। नमो धृष्णवे च प्रमृशाय च नमो निषंगिणे चेषुधिमते

।।१०४।। य

च।। नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च।
।।३६।। नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च।। नमः कुल्याय च सरस्याय च नमो नादेयाय च वैशंताय च
।।३७।। नमः कू[illegible]प्याय चावट्याय च नम ईध्रियाय चातप्याय च
नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च।।३८।।
नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च।। नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च।।३९।। नमः शंगवे च पशुपतये च नम उग्राय च भीमाय च।। नमो अग्रेवधाय च दूरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥११०५॥

वघाय च नमो हंत्रे च हनीयसे च ॥४०॥ नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय ॥ नमः शंभवे च मयोभवे च नमः शंकराय च मयस्करा य च नमः शिवाय च शिवतराय च ॥४१॥ नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च ॥ नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च ॥४२॥ नमः सिकत्याय च प्रवाह्याय च नमः किंशिलाय च क्षयणाय च ॥ नमः कपर्दिने च पुलस्तिने च नम इरिण्याय च प्रपथ्याय च ॥४३॥ नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च ॥ नमो हृदय्याय च

॥११०५॥

निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च ॥ ४४॥ नमः शुष्क्याय च हरित्याय च नमः पांसव्याय च रजस्याय च ॥ नमो लोप्याय चोलप्याय च नम उर्व्याय च सूर्व्याय च ॥४५॥ नमः पर्णाय च पर्णशदाय च नम उद्गुरमाणाय चाभिघ्नते च ॥ नम आखिदते च प्रखिदते च नम इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमः ॥ नमो वः किरिकेभ्यो देवाना हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नम आनिर्हतेभ्यः ॥४६॥ द्रापे अन्धसस्पते दरिद्र नीललोहित ॥ आसां प्रजानामेषां पशूनां मा भेर्मा रोङ्मो च नः किंच

पच४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१०६॥

नाममत॥४७॥इमारुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभराम
हेमतीः॥यथाशमसद्द्विपदेचतुष्पदेविश्वंपुष्टंग्रामेअस्मि
न्ननातुरं॥४८॥यातेरुद्रशिवातनूःशिवाविश्वाहाभेषजी॥
शिवरुतस्यभेषजीतयानोमृडजीवसे॥४९॥परिणोहेती
रुद्रस्यवृज्याःपरित्वेषस्यदुर्मतिर्महीगात॥अवस्थिरामघ
वद्भ्यस्तनुष्वमीढुस्तोकायतनयायमृड॥५०॥मीढुष्ट
मशिवतमशिवोनःसुमनाभव॥परमेवृक्षआयुधंनिधा
यकृत्तिंवसानआचरपिनाकंबिभ्रदागहि॥५१॥विकिरि

॥१०६॥

द्रविलोहितनमस्तेअस्तुभगवः॥यास्तेसहस्रंहेतयोन्यम
स्मन्निवपंतुताः॥५२॥सहस्राणिसहस्रशोबाह्वोस्तवहेतयः॥
तासामीशानोभगवःपराचीनामुखाकृधि॥५३॥असंख्याता
सहस्राणियेरुद्राअधिभूम्यां॥तेषांसहस्रयोजनेवधन्वानि
तन्मसि॥५४॥अस्मिन्महत्यर्णवेंतरिक्षेभवाअधि॥तेषां
सहस्रयोजनेवधन्वानितन्मसि॥५५॥नीलग्रीवाःशितिकंठाः
दिवंरुद्राउपश्रिताः॥तेषांसहस्रयोजनेवधन्वानितन्मसि॥
॥५६॥नीलग्रीवाःशितिकंठाःशर्वाअधःक्षमाचराः॥तेषां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१०७॥
॥७॥

सहस्रयोजनेवधन्वानितन्मसि॥५७॥येवृक्षेषुशष्पिंजरानील
ग्रीवाविलोहिताः॥तेषाꣳसहस्रयोजनेवधन्वानितन्मसि॥
॥५८॥येभूतानामधिपतयोविशिखासःकपर्दिनः॥तेषाꣳसह
स्रयोजनेवधन्वानितन्मसि॥५९॥येपथांपथिरक्षयऐलबृ
दाआयुर्युधः॥तेषाꣳसहस्रयोजनेवधन्वानितन्मसि॥६०॥येती
र्थानिप्रचरंतिसृकाहस्तानिषंगिणः॥तेषाꣳसहस्रयोज
नेवधन्वानितन्मसि॥६१॥येन्नेषुविविध्यंतिपात्रेषुपिबतोज
नान्॥तेषाꣳसहस्रयोजनेवधन्वानितन्मसि॥६२॥यएतावं

तश्चभूयाꣳसश्चदिशोरुद्रावितस्थिरे॥तेषाꣳसहस्रयोजने
वधन्वानितन्मसि॥६३॥नमोस्तुरुद्रेभ्योयेदिवियेषांवर्षमिष
वः॥तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीचीर्दशोदीचीर्दशो
र्ध्वाः॥तेभ्योनमोअस्तुतेनोमृडयंतुतेनोवंतु॥तेयंद्विष्मोय
श्चनोद्वेष्टितमेषांजंभेदध्मः॥नमोस्तुरुद्रेभ्योयेंतरिक्षेयेषां
वातइषवः॥तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीचीर्दशो
दीचीर्दशोर्ध्वाः॥तेभ्योनमोअस्तुतेनोमृडयंतुतेनोवंतु॥ते
यंद्विष्मोयश्चनोद्वेष्टितमेषांजंभेदध्मः॥नमोस्तुरुद्रेभ्योये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१०८॥

पृथिव्यांयेषामन्नमिषवः॥तेभ्योदशप्राचीर्दशदक्षिणादशप्र
तीचीर्दशोदीचीर्दशोर्ध्वाः॥तेभ्योनमोअस्तुतेनोमृडयंतुतेनो
वंतु॥तेयंद्विष्मोयश्चनोद्वेष्टितमेषांजंभेदध्मः॥६६॥६६॥नम
स्ते१६ नमोहिरण्यबाहवे५ नमउष्णीषिणे५ नमस्तक्षभ्यः५ नमो
ज्येष्ठाय५ नमःसूत्याय५ नमःपार्याय५ द्रापेअंधसः॥११८॥कंडि
कासंख्या६७॥अष्टानुवाकेषुचतुःषष्टिः॥इतिशुक्लयजुर्वेदसं
हितायांसप्तदशोध्यायः॥१६॥१६॥१६॥ ✱ ॥हरिः ॐ मू॥अश्मन्
न्नूर्जंपर्वतेशिश्रियाणामद्भ्यओषधीभ्योवनस्पतिभ्यो अ

॥१०८॥

यि

धिसंभृतंपयः॥तांनइषमूर्जंधत्तमरुतःसꣳरराणाः॥अश्मꣳ
स्तेक्षुन्मयितऊर्ग्यंद्विष्मस्तंतेशुगृच्छतु॥१॥इमामेअग्नइष्टका
धेनवःसंत्वेकाचदशचदशचशतंचशतंच॥सहस्रंचसहस्रं
चायुतंचायुतंचनियुतंचनियुतंच॥२॥अर्बुदंचन्यर्बुदंचसमुद्र
श्चमध्यंचांतश्चपरार्धश्च॥एतामेअग्नइष्टकाधेनवःसंत्वमु
त्रामुष्मिंल्लोके॥३॥ऋतवस्थऋतावृधऋतुष्ठास्थऋता
वृधः॥घृतश्चुतोमधुश्चुतोविराजोनामकामदुघाअक्षीय
माणाः॥४॥समुद्रस्यत्वावकयाग्नेपरिव्ययामसि॥पावको

श्रु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्मभ्यं शिवो भव ॥५॥ हिमस्य त्वा जरायुणाग्ने परि व्ययामसि । पावको अस्मभ्यं शिवो भव ॥६॥ उप ज्मन्नुप वेतसेवतर नदीष्वा । अग्ने पित्तमपामसि मंडूकि ताभिरा गहि स मन्नो यज्ञं पावकवर्णं शिवं कृधि ॥७॥ अपामिदं न्ययनं समुद्रस्य निवेशनम् । अन्यांस्ते अस्मत्तपंतु हेतयः पावको अस्मभ्यं शिवो भव ॥८॥ अग्ने पावक रोचिषा मंद्रया देव जिह्वया । आ देवान्वक्षि यक्षि च ॥९॥ स नः पावक दीदिवो ग्ने देवां इहा वह । उप यज्ञं हविश्च नः ॥१०॥ पावकया यश्चितयंत्या कृपा क्षामन्रुरुच उषसो न भानुना । तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे न तत्षाणो अजरः ॥११॥ नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे । अन्यांस्ते अस्मत्तपंतु हेतयः पावको अस्मभ्यं शिवो भव ॥ नृषदे वेळप्सुषदे वेड्बर्हिषदे वेड्वनसदे वेट्स्वर्विदे वेट् ॥१२॥ ये देवा देवानां यज्ञिया यज्ञियानां संवत्सरीणमुप भागमासते । अहुता दोहविषो यज्ञे अस्मिं स्वयं पिबंतु मधुनो घृतस्य ॥१३॥ ये देवा देवेष्वधि देवत्वमायं न्ये ब्रह्मणः पुरएतारो अस्य । येभ्यो न ऋते पवते धाम किं

चन नते दिवो न पृथिव्याः। अधि स्नुषु॥१४॥ प्राणदाः। अपानदा
व्यानदा वर्चोदा वरिवोदाः॥ अन्यांस्ते। अस्मत्तपंतु हेतयः पा
वको। अस्मभ्यं शिवो भवा॥१५॥ प्रथमोनुवाकः॥ अग्निस्ति
ग्मेन। शोचिषा यासद्विश्वं न्यत्रिणम्॥ अग्निर्नो वनुते रयि
म्॥१६॥ य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः॥
सः आशिषा द्रविणमिच्छमानः प्रथमच्छदवरां आविवेश॥
॥१७॥ किं स्विदासीदधिष्ठानमारंभणं कतमत्स्वित्कथासी
त्॥ यतो भूमिं जनयन्विश्वकर्मा विद्यामौर्णोन्महिना विश्व

॥१०१०॥

चक्षाः॥१८॥ विश्वतश्चक्षुरुत। विश्वतो मुखो विश्वतो बाहुरुत वि
श्वतस्पात्॥ सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयं देव ए
कः॥१९॥ किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी
निष्टतक्षुः॥ मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि
धारयन्॥२०॥ या ते धामानि परमाणि यावमा या मध्यमा विश्व
कर्मन्नुतेमा॥ शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व त
न्वं वृधानः॥२१॥ वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वा
जे। अद्या हुवेम॥ स नो विश्वानि हवनानि जोषद्विश्वशंभूरवसे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥११११॥

साधुकर्म्मा ॥२२॥ विश्वकर्मन्हविषावावृधानः स्वयंयजस्वपृ
थिवीमुतद्याम् ॥ मुह्यंत्वन्येऽअभितः सपत्नाऽइहास्माकंमघ
वासूरिरस्तु ॥२३॥ विश्वकर्मन्हविषावर्द्धनेनत्रातारमिंद्रम
कृणोरवध्यम् ॥ तस्मैविशः समनमंतपूर्वीरयमुग्रोविहव्यो
यथासत् ॥२४॥ द्वितीयोनुवाकः ॥ चक्षुषः पितामनसाहिधीरोघृ
तमेनेऽअजनंनम्नमाने ॥ यदेदंताऽअदद्दृहंतपूर्व्वऽआदिद्या
वापृथिवीऽअप्रथेताम् ॥२५॥ विश्वकर्म्माविमनाऽआद्वि
हायाधाताविधातापरमोतसन्दृक् ॥ तेषामिष्टानिसमि

॥१११२॥

षामदंतियत्रासप्तऽऋषीन्परऽएकमाहुः ॥२६॥ योनः पिताज
नितायोविधाताधामानिवेदभुवनानिविश्वा ॥ योदेवानांनाम
धाऽएकऽएवतंसंप्रश्नंभुवनायंत्यन्या ॥२७॥ तऽआयजंत
द्रविणꣳसमस्माऽऋषयः पूर्वेजरितारोनभूना ॥ असूर्त्तेसू
र्त्तेरजसिनिषत्तेयेभूतानिसमकृण्वन्निमानि ॥२८॥ परो
दिवापरऽएनापृथिव्यापरोदेवेभिरसुरैर्यदस्ति ॥ कꣳ
स्विद्गर्भंप्रथमंदध्रऽआपोयत्रदेवाः समपश्यंतपूर्वे ॥२९॥ तमि
द्गर्भंप्रथमंदध्रऽआपोयत्रदेवाः समगच्छंतविश्वे ॥ अजस्यना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाऽअध्येकमर्पितंयस्मिन्विश्वानिभुवनानितस्थुः॥३०॥न
तंविदाथयऽइमाजजानान्यद्युष्माकमंतरंबभूव॥नीहारे
णप्रावृताजल्प्याचासुतृपऽउक्थशासश्चरंति॥३१॥विश्व
कर्माह्यजनिष्टदेवऽआदिद्गंधर्वोऽअभवद्द्वितीयः॥तृतीयः
पिताजनितौषधीनामपांगर्भंव्यदधात्पुरुत्रा॥३२॥तृतीयो
नुवाकः॥छ॥आशुःशिशानोवृषभोनभीमोघनाघनः
क्षोभणश्चर्षणीनाम्॥संक्रंदनोनिमिषऽएकवीरःशतं
सेनाऽअजयत्साकमिंद्रः॥३३॥संक्रंदनेनानिमिषेणजिष्णु

॥११२॥

नायुत्कारेणदुश्च्यवनेनधृष्णुना॥तदिंद्रेणजयततत्सहध्वं
युधोनरऽइषुहस्तेनवृष्णा॥३४॥सऽइषुहस्तैः॥सनिषंगि
भिर्वशीसंस्रष्टासयुधऽइंद्रोगणेन॥संसृष्टजित्सोम
पाबाहुशर्ध्युग्रधन्वाप्रतिहिताभिरस्ता॥३५॥बृहस्प
तेपरिदीयारथेनरक्षोहामित्रांऽअपबाधमानः॥प्रभं
जंत्सेनाःप्रमृणोयुधाजयन्नस्माकमेध्यविताथानाम्॥
॥३६॥बलविज्ञायस्थविरःप्रवीरःसहस्वान्वाजीसहमा
नऽउग्रः॥अभिवीरोऽअभिसत्वासहोजाजैत्रमिंद्ररथमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिष्ठ गोवित् ॥५॥ गोत्रभिदं गोविदं वज्रबाहुं जयंतमज्म
प्रमृणंतमोजसा ॥ इमं सजाताः अनुवीरयध्वमिंद्रं स
खायोः अनुसंरभध्वम् ॥६॥ अभिगोत्राणि सहसा गा
हमानो दयोवीरः शतमन्युरिंद्रः ॥ दुश्च्यवनः पृतनाषाळयु
ध्यो स्माकं सेनाः अवतु प्रयुत्सु ॥७॥ इंद्रः आसां नेता
बृहस्पतिर्दक्षिणा यज्ञः पुरः एतु सोमः ॥ देवसेनानाम
भिभंजतीनां जयंतीनां मरुतो यंत्वग्रम् ॥८॥ इंद्रस्य वृष्णो
वरुणस्य राज्ञः आदित्यानां मरुतां शर्ध उग्रम् ॥ महाम

॥११३॥

नसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥९॥ उद्ध
र्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनांसि ॥ उ
द्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यंतु घोषाः ॥१०॥
अस्माकमिंद्रः समृतेषु ध्वजेष्वस्माकं याः इषवस्ता जयंतु ॥
अस्माकं वीराः उत्तरे भवंत्वस्मां उ देवाः अवता हवेषु ॥११॥
अमीषां चित्तं प्रतिलोभयंती गृहाणांगान्यप्वे परेहि ॥ अ
भि प्रेहि निर्दह हृत्सु शोकैः अंधेनामित्रास्तमसा सचंताम् ॥
॥१२॥ अवसृष्टा परापत शरव्ये ब्रह्मसंशिते ॥ गच्छामित्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रपद्यस्वमामीषांकंचनोछिषः॥४५॥प्रेताजयतानरऽइंद्रो
वःशर्मयछतु॥उग्रावःसंतुबाहवोनाधृष्यायथासथ॥४६॥
असौयासेनामरुतःपरेषामभ्यैतिनऽओजसास्पर्धमाना॥
तांगूहततमसापव्रतेनयथामीऽअन्योऽअन्यंनजानन्॥४७॥
यत्रबाणाःसंपतंतिकुमाराविशिखाऽइव॥तंनऽइंद्रोबृहस्प
तिरदितिःशर्मयछतुविश्वाहाशर्मयछतु॥४८॥मर्माणि
ते॥वर्मणाछादयामिसोमस्त्वाराजामृतेनानुवस्ताम्॥उ
रोर्वरीयोवरुणस्तेकृणोतुजयंतंत्वानुदेवामदंतु॥४९॥६॥

॥११४॥

चतुर्थोनुवाकः॥ ॥उद्देनमुत्तरांनयाग्नेघृतेनाहुत॥रायस्पोषे
णसंसृजप्रजयाचबहुंकृधि॥५०॥इंद्रेमंप्रतरांनयसजा
तानामसद्वशी॥समेनंवर्चसासृजदेवानांभागदाऽअ
सत्॥५१॥यस्यकुर्मोगृहेहविस्तमग्नेवर्द्धयात्वम्॥तस्मैदे
वाऽअधिब्रुवन्नयंचब्रह्मणस्पतिः॥५२॥उदुत्वाविश्वेदेवाऽ
अग्नेभरंतुचित्तिभिः॥सनोभवशिवस्त्वंसुप्रतीको
विभावसुः॥५३॥पंचदिशोदैवीर्यज्ञमवंतुदेवीरपामतिंदु
र्मतिंबाधमानाः॥रायस्पोषेयज्ञपतिमाभजंतीरायस्पोषेऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋधियज्ञो ऽअस्यस्यात् ॥५४॥ समिद्धो ऽअग्नाः ऽअधिमामहानऽ
उक्थपत्र ऽईड्यो गृभीतः ॥ तप्तंघर्मंपरिगृह्यायजंतोर्जाय
द्यज्ञमयजंतदेवाः ॥५५॥ दैव्यायधर्त्रेजोष्ट्रेदेवश्रीः श्रीमणाः
शतपयाः ॥ परिगृह्यदेवायज्ञमायंदेवादेवेभ्यो ऽअध्वर्यंतो ऽअ
स्थुः ॥५६॥ वीतꣳहविः शमितꣳशमितायजध्यैतुरीयोयज्ञोय
त्रहव्यमेति ॥ ततोवाकाः ऽआशिषोनोजुषंताम् ॥५७॥ सूर्यरश्मि
र्हरिकेशः पुरस्तात्सविताज्योतिरुदयाँ२ऽअजस्रम् ॥ तस्यपू
षाप्रसवेयातिविद्वांत्संपश्यन्विश्वाभुवनानिगोपाः ॥५८॥ वि

विमानऽएषदिवोमध्यऽआस्तऽआपप्रिवान्रोदसीऽअंतरि
क्षं ॥ सविश्वाचीरभिचष्टेघृताचीरंतरापूर्वमपरंचके
तुम् ॥५९॥ उक्षासमुद्रो ऽअरुणः सुपर्णः पूर्वस्ययोनिंपितु
राविवेश ॥ मध्येदिवोनिहितः पृश्निरश्माविचक्रमेरज
सस्पात्यंतौ ॥६०॥ इंद्रंविश्वा ऽअवीवृधंत्समुद्रव्यचसंगिरः ॥
रथीतमꣳरथीनांवाजानाꣳसत्पतिंपतिम् ॥६१॥ देवहूर्यज्ञऽ
आचवक्षत्सुम्नहूर्यज्ञऽआचवक्षत् ॥ यक्षदग्निर्देवोदेवाँ२आ
चवक्षत् ॥६२॥ वाजस्यमाप्रसवऽउद्ग्राभेणोदग्रभीत् ॥ अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धासपत्नानिंद्रोमे निग्राभेणाधराँ२ अकः ॥६३॥ उद्ग्राभंचा
निग्राभंच ब्रह्मदेवाऽअवीवृधन् ॥ अधासपत्नानिंद्राग्नीमे
वि षूचीनान्व्यस्यताम् ॥ पंचमोनुवाकः ॥ क्रमध्वमग्निना
नाकमुख्यꣳहस्तेषु बिभ्रतः ॥ दिवस्पृष्ठꣳस्वर्गत्वामिश्रा
देवेभिराध्वम् ॥६४॥ प्राचीमनुप्रदिशंप्रेहि विद्वानग्नेरग्ने
पुरोऽअग्निर्भवेह ॥ विश्वाऽआशादीद्यानो विभाह्यूर्जंनोधे
हि द्विपदे चतुष्पदे ॥६५॥ पृथिव्याऽअहमुदंतरिक्षमारुह
मंतरिक्षाद्दिवमारुहम् ॥ दिवोनाकस्यपृष्ठात्स्वर्ज्योतिर

॥११६॥

गामहम् ॥६६॥ स्वर्यंतोनापेक्षंतऽआद्यांꣳरोहंतिरोदसी ॥
यज्ञंयेविश्वतोधारꣳसुविद्वाꣳसोवितेनिरे ॥६७॥ अग्नेप्रे
हि प्रथमोदेवयतांचक्षुर्देवानामुतमर्त्यानाम् ॥ इयक्षमा
णाभृगुभिः सजोषाः स्वर्यंतुयजमानाः स्वस्ति ॥६८॥ नक्तो
षासासमनसाविरूपेधापयेतेशिशुमेकꣳसमीची ॥ द्या
वाक्षामारुक्मोऽअंतर्विभातिदेवाऽअग्निंधारयंद्रविणो
दाः ॥६९॥ अग्नेसहस्राक्षशतमूर्द्धंछतंतेप्राणाः सहस्रंव्या
नाः ॥ त्वꣳसाहस्रस्यरायऽईशिषेतस्मैतेविधेमवाजायः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वाहा॥७०॥सुपर्णोसि गरुत्मान्पृष्ठे पृथिव्याः सीद॥भासां
तरिक्षमापृणज्योतिषा दिवमुत्तभान तेजसा दिशऽउद्दृं
ह॥७१॥आजुह्वानः सुप्रतीकः॥पुरस्तादग्ने स्वं योनिमासी
दसाधुया॥अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवा
यजमानश्च सीदत॥७२॥ताꣳ सवितुर्वरेण्यस्य चित्रामा
हं वृणे सुमतिं विश्वजन्याम्॥यामस्य कण्वोऽअदुहत्प्रपी
नाꣳ सहस्रधारां पयसा महीं गाम्॥७३॥विधेम ते पर
मे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे॥यस्माद्योनेरु

॥११८॥

दारिथा यजे तं प्र त्वे हवीꣳषि जुहुरे समिद्धे॥७४॥प्रेद्धोऽ
अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ॥त्वाꣳ शश्वं
तऽउप यन्ति वाजाः॥७५॥अग्ने तमद्याश्वं न स्तोमैः क्र
तुं न भद्रꣳ हृदिस्पृशम्॥ऋध्यामा तऽओहैः॥७६॥चि
त्तिं जुहोमि मनसा घृतेन यथा देवाऽइहागमन्वीतिहो
त्राऽऋतावृधः॥पत्ये विश्वस्य भूमनो जुहोमि विश्वकर्मणे
विश्वाहादाभ्यꣳ हविः॥७७॥सप्त ते अग्ने समिधः स
प्त जिह्वाः सप्तऽऋषयः सप्त धाम प्रियाणि॥सप्त होत्राः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्तधात्वायज्ञंतिसप्तयोनीरापृणस्वघृतेनस्वाहा॥७
॥७८॥ षष्ठोनुवाकः॥ शुक्रज्योतिश्चचित्रज्योतिश्चसत्य
ज्योतिश्चज्योतिष्मांश्च॥ शुक्रश्चऋतपाश्चात्यंह
हाः॥७९॥ ईदृङ्चान्यादृङ्चप्रतिसदृङ्च॥ मितश्चसंमित
श्चसभराः॥८०॥ ऋतजिच्चसत्यजिच्चसेनजिच्चसुषेण
श्च॥ अंतिमित्रश्चदूरेऽअमित्रश्चगणः॥८१॥ ऋतश्च॥
सत्यश्चध्रुवश्चधरुणश्च॥ धर्ताचविधर्ताचविधार
यः॥८२॥ ईदृक्षासएतादृक्षासऽऊषुणःसदृक्षासःप्र

॥११९॥

सदृक्

तिसदृक्षासएतन॥ मितासश्चसंमितासोनोऽअद्य
सभरसोमरुतोयज्ञेऽअस्मिन्॥८३॥ स्वतवांश्चप्र
घासीचसांतपनश्चगृहमेधीच॥ क्रीडीचशाकीचो
ज्जेषी॥८४॥ इंद्रंदैवीर्विशोमरुतोनुवर्त्मानोभवन्यथें
द्रंदैवीर्विशोमरुतोनुवर्त्मानोभवन्॥ एवमिमंयजमा
नंदैवीश्चविशोमानुषीश्चानुवर्त्मानोभूयासुः॥८५॥६॥
६ ६ अश्मन्नूर्जंपंचदश१५ अग्निस्तिग्मेन२
चक्षुषः पिता८ आशुःशिशानः१७ उदेन१५ ऋमध्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥११२॥

मग्निना॥१५॥ शुक्रज्योतिश्च ७॥ सप्तानुवाके प्रयन्तु रात्रीति
॥ इति अष्टादशोऽध्यायः॥१८॥ ॐ॥ ॥ इमं स्तनमूर्जस्वं
तं धया पां प्रपीनमग्ने सरिरस्य मध्ये॥ उत्सं जुषस्व मधुम
न्तमर्वंत्समुद्रियं सदनमाविशस्व॥१॥ घृतं मिमिक्षे घृ
तमस्य योनिर्घृते श्रितो घृतम्वस्य धाम॥ अनुष्वधमा
वह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम्॥२॥ समु
द्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट्॥
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः॥
॥३॥

॥११२॥

वयं नाम प्रब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभिः॥
उप ब्रह्मा शृणवच्छस्यमानं चतुःशृङ्गोऽवमीद्गौर एतत्॥४॥
चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अ
स्य॥ त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवे
श॥५॥ त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतम
न्वविंदन्॥ इंद्र एकं सूर्य एकं जजान वेनादेकं स्वध
या निष्टतक्षुः॥६॥ एता अर्षन्ति हृद्यात्समुद्राच्छतव्रजा रिपु
णा नावचक्षे॥ घृतस्य धारा अभिचाकशीमि हिरण्ययो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१२०॥

वेतसोमध्यऽआसाम्॥७॥ सम्यक्स्रवंतिसरितोनधेनाः
अंतर्हृदामनसापूयमानाः॥ एतेऽअर्षंत्यूर्मयो घृत
स्यमृगाऽइवक्षिपणोरीषमाणाः॥८॥ सिंधोरिवप्राध्व
ने॥ शूघनासोवातप्रमियःपतयंतियह्वाः॥ घृतस्यधाराः
अरुषोनवाजीकाष्ठाभिंदन्नूर्मिभिःपिन्वमानः॥९॥ अ
भिप्रवंतासमनेवयोषाःकल्याण्यस्मयमानासोऽअग्नि
म्॥ घृतस्यधाराःसमिधोनसंततांजुषाणोहर्यतिजात
वेदाः॥१०॥ कन्याऽइववहतुमेतवाऽउऽअंज्यंजानाऽअ

॥१२०॥

भिचाकशीमि॥ यत्रसोमःसूयतेयत्रयज्ञोघृतस्यधाराऽअ
भितत्पवंते॥११॥ अभ्यर्षतसुष्टुतिंगव्यमाजिमस्मासुभद्राद्र
विणानिधत्त॥ इमंयज्ञंनयतदेवतानोघृतस्यधारामधुम
त्पवंते॥१२॥ धामंते॥ विश्वंभुवनमधिश्रितमंतःसमुद्रेहृ
द्यंतरायुषि॥ अपामनीकेसमिथेयऽआभृतस्तमश्यामम
धुमंतंतऽऊर्मिम्॥१३॥ प्रथमोनुवाकः॥ वाजश्चमेप्रसवश्च
मेप्रयतिश्चमेप्रसितिश्चमे॥ धीतिश्चमेक्रतुश्चमेस्वरश्च
मेश्लोकश्चमे॥ श्रावश्चमेश्रुतिश्चमेज्योतिश्चमेस्वश्चमेय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञेन कल्पंताम् ॥१४॥ प्राणश्च मेपानश्च मे व्यानश्च मेसुश्च मे
चित्तं च मऽआधीतं च मे वाक् च मे मनश्च मे ॥ चक्षुश्च मे श्रोत्रं
च मे दक्षश्च मे बलं च मे यज्ञेन कल्पंताम् ॥१५॥ ओज
श्च। मे सहश्च मऽआत्मा च मे तनूश्च मे ॥ शर्म च मे वर्म च मेङ्गा
नि च मेस्थीनि च मे ॥ परूंषि च मे शरीराणि च मऽआयुश्च मे
जरा च मे यज्ञेन कल्पंताम् ॥१६॥ ज्यैष्ठ्यं च। मऽआधिपत्यं च
मे मन्युश्च मे भामश्च मे ॥ अमश्च मेंभश्च मे जेमा च मे महिमा
च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे।

॥१२१॥

वृद्धं च मे वृद्धिश्च मे यज्ञेन कल्पंताम् ॥१७॥ द्वितीयोनुवाकः॥
सत्यं च। मे श्रद्धा च मे जगच्च मे धनं च मे ॥ विश्वं च मे महश्च मे
क्रीडा च मे मोदश्च मे ॥ जातं च मे जनिष्यमाणं च मे सूक्तं च
मे सुकृतं च मे यज्ञेन कल्पंताम् ॥१८॥ वित्तं च। मे वेद्यं च मे भू
तं च मे भविष्यच्च मे ॥ सुगं च मे सुपथ्यं च मऽऋद्धं च मऽऋ
द्धिश्च मे ॥ क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे यज्ञे
न कल्पंताम् ॥१९॥ यंता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे ॥
विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे ॥ सीरं च मे लयश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मे सूश्च मे प्रसूश्च मे यज्ञेन कल्पंताम्।।२०।। शं चा मे मयश्च मे
प्रियं च मे नुकामश्च मे।। कामश्च मे सौमनसश्च मे भगश्च मे द्र
विणं च मे।। भद्रं च मे श्रेयश्च मे वसीयश्च मे यशश्च मे यज्ञेन
कल्पंताम्।।२१।।छ।। ऊर्क् च मे सूनृता च मे पयश्च मे रसश्च मे।। घृ
तं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे।। कृषिश्च मे वृष्टिश्च
मे जैत्रं च म औद्भिद्यं च मे यज्ञेन कल्पंताम्।।२२।। ऋतं च मे मृ
तं च मे यक्ष्मं च मे नामयश्च मे।। जीवातुश्च मे दीर्घायुत्वं च मे नमि
त्रं च मे भयं च मे।। सुगं च मे शयनं च मे सूषाश्च मे सुदिनं च मे य

ज्ञेन कल्पंताम्।।२३।। रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे।।
विभु च मे प्रभु च मे पूर्णं च मे पूर्णतरं च मे।। कुयवं च मे क्षितं च मे ऽन्नं
च मे क्षुच्च मे यज्ञेन कल्पंताम्।।२४।। व्रीहयश्च मे यवाश्च मे माषा
श्च मे तिलाश्च मे।। मुद्गाश्च मे खल्वाश्च मे प्रियंगवश्च मे णवश्च
मे।। श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे य
ज्ञेन कल्पंताम्।।२५।।छ।। अश्मा च मे मृत्तिका च मे गिरयश्च मे
पर्वताश्च मे।। सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मे यश्च
मे।। सीसं च मे त्रपु च मे श्यामं च मे लोहं च मे यज्ञेन कल्पंताम्।।२६।।

३५

॥१२३॥

अग्निश्चमऽआपश्चमेवीरुधश्चमओषधयश्चमे॥घृष्टपच्याश्चमेघृष्टपच्याश्चमेग्राम्याश्चमेपशवआरण्याश्चमे॥वित्तंचमेवित्तिश्चमेभूतंचमेभूतिश्चमेयज्ञेनकल्पंताम्॥२७॥वसुचमेवसतिश्चमेकर्मचमेशक्तिश्चमे॥अर्थश्चमेयामश्चमइत्याचमेगतिश्चमेयज्ञेनकल्पंताम्॥२८॥६॥अग्निश्चमऽइंद्रश्चमेसोमश्चमइंद्रश्चमे॥सविताचमइंद्रश्चमेसरस्वतीचमऽइंद्रश्चमे॥पूषाचमऽइंद्रश्चमेबृहस्पतिश्चमऽइंद्रश्चमेयज्ञेनकल्पंताम्॥२९॥मित्रश्चमऽइंद्रश्चमेवरुणश्चमऽइंद्रश्चमे॥

॥१२३॥

धाताचमऽइंद्रश्चमेत्वष्टाचमऽइंद्रश्चमे॥मरुतश्चमऽइंद्रश्चमेविश्वेचमेदेवाऽइंद्रश्चमेयज्ञेनकल्पंताम्॥३०॥पृथिवीचामऽइंद्रश्चमेंतरिक्षंचमऽइंद्रश्चमे॥द्यौश्चमऽइंद्रश्चमेसमाश्चमऽइंद्रश्चमे॥नक्षत्राणिचमऽइंद्रश्चमेदिशश्चमऽइंद्रश्चमेयज्ञेनकल्पंताम्॥३१॥षष्ठोनुवाकः॥अंशुश्चमेरश्मिश्चमेदाभ्यश्चमेधिपतिश्चमे॥उपांशुश्चमेंतर्यामश्चमऽऐंद्रवायवश्चमेमैत्रावरुणश्चमे॥आश्विनश्चमेप्रतिप्रस्थानश्चमेशुक्रश्चमेमंथीचमेयज्ञेनकल्पंताम्॥३२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१२४

आग्रयणश्चमेवैश्वदेवश्चमेध्रुवश्चमेवैश्वानरश्चमे।ऐंद्रा
ग्नश्चमेमहावैश्वदेश्चवेमेमरुत्वतीया श्चमेनिष्केवल्यश्च
मे।।सावित्रश्चमेसारस्वतश्चमेपात्नीवतश्चमेहारियोजन
श्चमेयज्ञेनकल्पंतलाम्।।२३।।स्रुचश्च।मेचमसाश्चमेवाय
व्यानिचमेद्रोणकलशाश्चमे।ग्रावाणश्चमेधिषवणेचमे
पूतभृच्चमेऽआधवनीयश्चमे।।वेदिश्चमेबर्हिश्चमेस्वगा
कारश्चमेवभृ थश्चमेयज्ञेनकल्पंतलाम्।।२४।।अग्निश्च।
मेघर्मश्चमेर्कश्चमेसूर्यश्चमे।प्राणश्चमेश्वमेधश्चमेपृथि

१२४

वीचमेदितिश्चमे।।दितिश्चमेद्यौश्चमेऽङ्गुलयःशक्करयोदि
शश्चमेयज्ञेनकल्पंतलाम्।।२५।।व्रतंचा।मेऽऋतवश्चमेसंवत्स
रश्चमेतपश्चमे।।अहोरात्रेऽऊर्वष्ठीवेब्रहद्रथंतरेचमेयज्ञेन
कल्पंतलाम्।।२६।।सप्तमोऽनुवाकः।।एकाचा।मेतिस्रश्चमेतिस्रश्च
मेपंचचमेपंचचमेसप्तचमेसप्तचमेनवचमेनवचमऽएकाद
शाचमेऽएकादशाचमेत्रयोदशाचमेत्रयोदशाचमे।।पंचदशाच
मेपंचदशाचमेसप्तदशाचमेसप्तदशाचमेनवदशाचमेनवदशा
चमेऽएकविंशतिश्चमेऽएकविंशतिश्चमेत्रयोविंशति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्च मे त्रयो विꣳशतिश्च मे ॥ पंचविꣳशतिश्च मे पंचविꣳशति
श्च मे सप्तविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च
मे नवविꣳशतिश्च मएकत्रिꣳशच्च मएकत्रिꣳशच्च मे त्रयस्त्रि
ꣳशच्च मे यज्ञेन कल्पताम् ॥३७॥ चतस्रश्च मेष्टौ च मेष्टौ च मे
द्वादश च मे द्वादश च मे षोडश च मे षोडश च मे विꣳशतिश्च
मे विꣳशतिश्च मे चतुर्विꣳशतिश्च मे चतुर्विꣳशतिश्च मेष्टा
विꣳशतिश्च मेष्टाविꣳशतिश्च मे ॥ द्वात्रिꣳशच्च मे द्वात्रिꣳश
च्च मे षड्त्रिꣳशच्च मे षड्त्रिꣳशच्च मे चत्वारिꣳशच्च मे चत्वारि

॥१२५॥

ꣳशच्च मे चतुश्चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मेष्टा
चत्वारिꣳशच्च [illegible] मे यज्ञेन कल्पता
म् ॥३८॥ त्र्यविश्च मे त्र्यवी च मे दित्यवाड् मे दित्यौही च मे ॥
पंचाविश्च मे पंचावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे ॥ तुर्य
वाड् मे तुर्यौही च मे यज्ञेन कल्पताम् ॥३९॥ पष्ठवाड् मे प
ष्ठौही च मे उक्षा च मे वशा च मे ॥ ऋषभश्च मे वेहच्च मे न
ड्वाꣳश्च मे धेनुश्च मे यज्ञेन कल्पताम् ॥४०॥ अष्टमानुवा
कः ॥ वाजाय स्वाहा प्रसवाय स्वाहा पिजाय स्वाहा क्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥११२६॥

तवे स्वाहा॥ वसवे स्वाहा॥ हाहर्पतये स्वाहा॥ अन्हे मुग्धाय स्वाहा
मुग्धाय वैनंशिनाय स्वाहा विनंशिन आंत्यायनाय स्वा
हांत्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वा
हा प्रजा पतये स्वाहा॥ १९॥ इयं ते राण्मित्राय यंतासि य
मनः॥ ऊर्जे त्वा वृष्ट्यै त्वा प्रजानां त्वाधिपत्याय॥ २०॥ आयुर्य
ज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पतां श्
श्रोत्रं यज्ञेन कल्पताम्॥ वाग्यज्ञेन कल्पतां मनो यज्ञेन क
ल्पतां मात्मा यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पताम्॥ ब्रह्म

॥१२६॥

यज्ञेन कल्पतां यज्ञो यज्ञे न कल्पतां ज्योतिर्यज्ञेन कल्प
तां स्वर्यज्ञेन कल्पताम्॥ २१॥ स्तोमश्च यजुश्च ऋक् च सा
म च बृहद्रथंतरं च॥ स्वर्देवा अगन्मामृता अभूम
प्रजापतेः प्रजा अभूम वेट् स्वाहा॥ २२॥ छ॥ छ॥
इमं स्तनद्वादश १२ वाजश्च चतु स्त्र ४ सह ४ ऊर्ध्व चेतु स्त्र ४ अस्मा
ति स्त्र द्वितीयोग्नि अ२ अ२ शुश्च ५९ आयमे ४ वाजाय स्वाहा ४ नवो नु वा
के पुत्रय चत्वारिं॥ छ॥ ओ॥ एकोनविंशतिमोध्यायः॥ हरिः ॐ॥ वाज
स्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे॥ यस्यामि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दं विश्वं भुवनमाविवेश ॥ तस्यां नो देवः सविता धर्म साविषत् ॥१॥
विश्वे अद्य मरुतो विश्व ऊती विश्वे भवंत्वग्नयः समिद्धाः ॥ विश्वे
नो देवा अवसागमंतु विश्वमस्तु द्रविणं वाजो अस्मे ॥२॥ वाजो
नः सप्त प्रदिशश्चतस्रो वा परावतः ॥ वाजो नो विश्वैर्देवैर्धनसा
ताऽइहावतु ॥३॥ वाजो नो अद्य प्रसुवाति दानं वाजो देवाँ ऋतुभिः
कल्पयाति ॥ वाजो हि मा सर्ववीरं चकार सर्वा आशा वाजप
तिर्भवेयम् ॥४॥ वाजः पुरस्तादुत मध्यतो नो वाजो देवान् हविषा
वर्द्धयाति ॥ वाजो हि मा सर्ववीरं चकार विश्वा आशा वाजपति

॥१२७॥

र्जयेयम् ॥५॥ सम्मा सृजामि पयसा पृथिव्याः सम्मा सृजाम्य
द्भिरोषधीभिः ॥ सोहं वाजꣳ सनेयमग्ने ॥६॥ पयः पृथिव्यां ॥
पय ओषधीषु पयो दिव्यंतरिक्षे पयो धाः ॥ पयस्वतीः प्रदिशः
संतु मह्यम् ॥ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ता
भ्याम् ॥ सरस्वत्यै वाचो यंतुर्यंत्रेणाग्नेः साम्राज्येनाभिषिंचामि ॥
॥७॥ [illegible]॥१॥ ऋताषाडृतधामाग्निर्गंधर्वः ॥ तस्यौषधयोप्सरसो
मुदो नाम ॥ स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥८॥
संहितो विश्वसामा ॥ सूर्यो गंधर्वः ॥ तस्य मरीचयोप्सरस आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युवोनाम॥ सनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्ताभ्यःस्वाहा॥९॥
सुषुम्णःसूर्यरश्मिश्चंद्रमागंधर्वः॥तस्यनक्षत्राण्यप्सरसोभे
कुरयोनाम॥सनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्ताभ्यःस्वाहा
॥१०॥इषिरोविश्वव्यचावातोगंधर्वः॥तस्यापोऽअप्सरसऊर्जो
नाम॥सनऽइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्ताभ्यःस्वाहा॥
॥११॥भुज्युःसुपर्णो।यज्ञोगंधर्वः॥तस्यदक्षिणाऽअप्सरस
स्तावानाम॥सनऽइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्ताभ्यःस्वा
हा॥१२॥प्रजापतिर्विश्वकर्मामनोगंधर्वः॥तस्यऽऋक्सामा

॥१२८॥

न्यप्सरसऽएष्टयोनाम॥सनःइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावा
ट्ताभ्यःस्वाहा॥१३॥सनोभुवनस्यपतेप्रजापतेयस्यतउप
रिगृहायस्यवेह॥अस्मैब्रह्मणेस्मैक्षत्रायमहिशर्मयच्छस्वा
हा॥१४॥समुद्रोसि।नभस्वानार्द्रदानुःशंभूर्मयोभूरभि
मावाहिस्वाहा॥मारुतोसिमरुतांगणःशंभूर्मयोभूरभि
मावाहिस्वाहा॥अवस्यूरसिदुवस्वाछंभूर्मयोभूरभिमा
वाहिस्वाहा॥१५॥यास्तेऽअग्नेसूर्येरुचोदिवमातन्वंतिर
श्मिभिः॥ताभिर्नोऽअद्यसर्वाभीरुचेजनायनस्कृधि॥१६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यावोदेवाःसूर्येरुचोगोष्वश्वेषुयारुचः॥ इंद्राग्नीताभिःसर्वा
भीरुचंनोधत्तब्रहस्पते॥४७॥ रुचंनोधेहिब्राह्मणेषुरुचंरा
जसुनस्कृधि॥ रुचंविश्येषुशूद्रेषुमयिधेहिरुचारुचम्॥४८॥
तत्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः।
अहेळमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः॥४९॥
स्वर्णघर्मःस्वाहास्वर्णार्कःस्वाहास्वर्णशुक्रःस्वाहा॥ स्वर्णज्यो
तिःस्वाहास्वर्णसूर्यःस्वाहा॥५०॥ द्वितीयोनुवाकः॥ अग्निंयुनज्मि
शवसाघृतेनदिव्यंसुपर्णवयसाबृहंतम्॥ तेनवयंगमेमब्र

॥१२९॥

ध्नस्यविष्टपंस्वोरुहाणाऽअधिनाकमुत्तमम्॥५१॥ इमौ
तेपक्षाऽअजरौपतत्रिणौयाभ्यांरक्षांस्यपहंस्यग्ने।
ताभ्यांपतेमसुकृतामुलोकंयत्रऽऋषयोजग्मुःप्रथमजाः
पुराणाः॥५२॥ इंदुर्दक्षःश्येनऽऋतावाहिरण्यपक्षःशकुनो
भुरण्युः॥ महान्त्सधस्थेध्रुवऽआनिषत्तोनमस्तेऽअस्तुमा
माहिंसीः॥५३॥ दिवोमूर्द्धासिपृथिव्यानाभिरूर्गपामोषधी
नाम्॥ विश्वायुःशर्मसप्रथानमस्पथे॥५४॥ विश्वस्यमूर्द्धा
नधितिष्ठसित्रितःसमुद्रेतेहृदयमप्स्वायुरपोदत्तोदधिंभिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१३०॥

ता॥ दिवस्पर्जन्यादंतरिक्षा[illegible]त्पृथिव्यास्ततोनोवृष्ट्या
व॥२५॥ इष्टोयज्ञोभृगुभिराशीर्दावसुभिः॥ तस्यनः इष्ट
स्यप्रीतस्यद्रविणेहागमेः॥२६॥ इष्टोऽअग्निराहुतःपिप[illegible]
र्तुनः इष्टंहविः॥ स्वगेदंदेवेभ्योनमः॥२७॥ध्रा॥ यदाकू
ता॥त्समसुस्रोद्धृदोवामनसोवासंभृतंचक्षुषोवा॥ तद
नुप्रेतसुकृतामुलोकंयत्रऋषयोजग्मुःप्रथमजाःपु
राणाः॥२८॥ एतंसधस्थाःपरिवोददामियमावहाच्छेव
धिंजातवेदाः॥ अन्वागंतायज्ञपतिर्वोऽअत्रतंस्मजा

त

नी[illegible]परमेव्योमन्॥२९॥ एतंजानाथापरमेव्योमंदेवाःसध
स्थाविदरूपमस्य॥ यदागच्छात्पथिभिर्देवयानैरिष्टापूर्त्तेकृ
णवथाविरस्मै॥३०॥ उद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापू
र्त्तेसंसृजेथामयंच॥ अस्मिंत्सधस्थेऽअध्युत्तरस्मिन्वि
श्वेदेवायजमानश्चसीदत॥३१॥ येनवहसिसहस्रंयेनाग्ने
सर्ववेदसम्॥ तेनेमंयज्ञंनोनयस्वर्देवेषुगंतवे॥३२॥ प्रस्त
रणपरिधिना॥ स्रुचावेद्याचबर्हिषा॥ ऋचेमंयज्ञंनोनय
स्वर्देवेषुगंतवे॥३३॥ यद्दत्तं॥ यत्परादानंयत्पूर्तंयाश्चद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१३१॥

क्षिणाः॥ तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत्॥३७॥ यत्र धाराः अनपेता मधोर्घृतस्य च याः॥ तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत्॥३८॥ ये अग्नयः पांचजन्याः अस्यां पृथिव्यामधि॥ तेषामसि त्वमुत्तमः प्र नो जीवातवे सुव॥३९॥ ४०॥ वार्त्रहत्याय शवसे पृतनाषाह्याय च॥ इंद्र त्वा वर्त्तयामसि॥४१॥ सहदानुं पुरुहूत क्षियंतमहस्तमिंद्र संपिणक् कुणारुम्॥ अभि वृत्रं वर्द्धमानं पियारुमपादमिंद्र तवसा जघंथ॥४२॥ वि न इंद्र मृधो जहि नीचा यच्छ पृतन्यतः॥ यो अस्मां अभिदास

॥१३१॥

त्यधरं गमया तमः॥४३॥ मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगंथा परस्याः॥ सृकं संशाय पविमिंद्र तिग्मं वि शत्रूंताढि वि मृधो नुदस्व॥४४॥ वैश्वानरो न ऊतय आ प्र यातु परावतः॥ अग्निर्नः सुष्टुतीरुप॥४५॥ पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश॥ वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषस्पातु नक्तम्॥४६॥ अश्याम तं कामम् अग्ने तवोती अश्याम रयिं रयिवः सुवीरम्॥ अश्याम वाजमभि वाजयंतो अश्याम द्युम्नमजराजरं ते॥४७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१२२॥

वयंते॥ अध्वररिमाहि कृत मनुज्ञानहस्तानमौ सोपसद्य॥ य
जिष्ठेन मँनसा यक्षि देवान स्त्रेधतामन्मना विप्रो॥ अग्ने॥ ४॥
धामच्छद् ग्निरिंद्रो ब्रह्मा देवो बृहस्पतिः॥ सचेतसो विश्वेदे
वा यज्ञं प्रावंतु नः शुभे॥ ५॥ त्वं यविष्ठ दाशुषो नॄँ ष्पाहि
श्रणुधी गिरः॥ रक्षा तोकमुत त्मना॥ ६॥ छ वाजस्य नु ९
ऋताषाड्ऋतधामा १२ अग्निं युनज्मि ७ यदाकूतात् ८ वार्त्रहत्याय १०
पंचानुवाकः॥ छ॥ छ॥ ॥ इति कण्वशाखायाः संहितायां वि
त्रिंशतिमोध्यायः॥ ॥छ॥ छ॥ ॥छ॥ छ॥
शुभमस्तु॥ रामार्पणमस्तु॥ २॥ ० ॥ श्री॥

॥ श्रीगणेशाय नमः॥ ॥ हरिः॥ ॥ ॐ म॥ स्वाद्वीं त्वा स्वादुना तीव्रां ती
व्रेणामृताममृतेन॥ मधुमतीं मधुमता सृजामि सः सोमेन॥ १
सोमोस्यश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेंद्राय सुत्राम्णे पच्यस्व॥ १
॥ १॥ परीतो षिंचता सुतः सोमो य उत्तमः हविः॥ दधन्वा यो
नर्यो अप्स्वंतरा सुषाव सोममद्रिभिः॥ २॥ वायोः पूतः पवित्रेण प्रा
ङ्सोमो अतिद्रुतः॥ इंद्रस्य युज्यः सखा॥ वायोः पूतः पवित्रेण
प्रत्यङ्सोमो अतिद्रुतः॥ इंद्रस्य युज्यः सखा॥ ३॥ पुनाति ते प
रिस्रुतः सोमः सूर्यस्य दुहिता॥ वारेण शश्वता तना॥ ४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्म क्षत्रं पवते तेज इंद्रियꣳ सुरया सोमः सुत आसुतो म
दाय ॥ शुक्रेण देव देवताः पिपृग्धि रसेनान्नं यजमानाय धेहि ॥
कुविदंग यवमंतो यवं चिद्यथा दांत्यनुपूर्वं वियूय ॥ इहेहैषां कृ
णुहि भोजनानि ये बर्हिषो नम उक्तिं यजंति ॥ उपयामगृ
हीतोस्यश्विभ्यां त्वा सरस्वत्यै त्वेंद्राय त्वा सुत्राम्णे ॥ एष ते योनि
स्तेजसे त्वा वीर्याय त्वा बलाय त्वा ॥ ५ ॥ नाना हि वां देवहित
ꣳ सदस्कृतं मा संꣳसृक्षाथां परमे व्योमन् ॥ सुरा त्वमसि शु
ष्मिणी सोम एष मा मा हिꣳसीः स्वां योनिमाविशंती ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुपयामगृहीतोस्याश्विनंतेजः सारस्वतंवीर्यमैन्द्रंबलं॥ एष
तेयोनिर्मोदायत्वानंदायत्वामहसेत्वा॥७॥ तेजोसि॥ तेजोम
यिधेहिवीर्यमसिवीर्यंमयिधेहिबलमसिबलंमयिधेह्योजो
स्योजोमयिधेहि॥ मन्युरसिमन्युंमयिधेहिसहोसिसहोम
यिधेहि॥८॥ याव्याघ्रंविषूचिकोभौवृकंचरक्षति॥ श्येनं
पतत्रिणंसिंहंसेमंपात्वंहसः॥९॥ यदापिपेषमात
रंपुत्रः प्रमुदितोधयन्॥ एतत्तदग्नेऽअनृणोभवाम्यहतौ
पितरौमया॥१०॥ संपृचस्थ॥ संमाभद्रेणपृङ्क्त॥ विपृचस्थ

॥१३४॥

॥छ॥

विमापापेनपृङ्क्त॥११॥ देवायज्ञमतन्वतभेषजंभिषजाश्विना॥
वाचासरस्वतीभिषगिंद्रायेंद्रियाणिदधतः॥१२॥ दीक्षायैरू
पंशष्पाणिप्रायणीयस्यतोक्मानि॥ क्रयस्यरूपंसो
मस्यलाजाः सोमांशवोमधु॥१३॥ आतिथ्यरूपंमासरं॥
महावीरस्यनग्नहुः॥ रूपमुपसदामेतत्तिस्रोरात्रीः सुरासु
ता॥१४॥ सोमस्यरूपं॥ क्रीतस्यपरिस्रुत्परिषिच्यते॥ अश्वि
भ्यांदुग्धंभेषजमिंद्रायैंद्रंसरस्वत्या॥१५॥ आसंदीरूपंरा
जासंद्यैवेद्यैकुंभीसुराधानी॥ अंतरउत्तरवेद्यारूपंकारोत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तरोभिषजः॥१६॥वेद्यावेदिःसमाप्यतेबर्हिषाबर्हिरिंद्रिय
म्॥यूपेनयूपऽआप्यतेप्रणीतोऽअग्निरग्निना॥१७॥हवि
र्द्धानंयदश्विनाग्नीध्रंयत्सरस्वती॥इंद्रायैंद्रꣳसदस्कृतं
पत्नीशालंगार्हपत्यः॥१८॥प्रैषेभिःप्रैषानाप्नोत्याप्रीभिरा
प्रीर्यज्ञस्य॥प्रयाजेभिरनुयाजान्वषट्कारेभिराहुतीः॥
॥१९॥पशुभिःपशूनाप्नोतिपुरोडाशैर्हवीꣳष्या॥छंदो
भिःसामिधेनीर्याज्याभिर्वषट्कारान्॥२०॥धानाःकरंभः
सक्तवःपरीवापःपयोदधि॥सोमस्यरूपꣳहविषऽ

॥१३५॥

आमिक्षावाजिनंमधु॥२१॥धानानाꣳरूपं॥कुवलंपरीवा
पस्यगोधूमाः॥सक्तूनाꣳरूपंबदरमुपवाकाःकरंभस्य॥
॥२२॥पयसोरूपं॥यद्यवादध्नो[illegible]पंकर्कंधूनि॥[illegible]सो
मस्यरूपंवाजिनꣳसौम्यस्यरूपमामिक्षा॥२३॥आश्रा
वयेतिस्तोत्रियाःप्रत्याश्रावोऽअनुरूपः॥यजेतिधाय्यारू
पंप्रगाथायेयजामहाः॥२४॥अर्द्धर्चैरुक्थानाꣳरूपं
पदैराप्नोतिनिविदः॥प्रणवैःशस्त्राणाꣳरूपंपयसासो
मऽआप्यते॥२५॥अश्विभ्यांप्रातःसवनमिंद्रेणैंद्रंमा

रू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यंदिनम्॥ वैश्वदेवꣳ सरस्वत्यास्तृतीयमाप्तꣳ सवनम्॥
॥२६॥ वायव्यैर्वायव्या॥न्याप्नोति सतेन द्रोणकलशम्॥ कुं
भीभ्याममंभृणौ सुते स्थालीभिः स्थालीराप्नोति॥२७॥ यजु
र्भिराप्यंते। ग्रहा ग्रहैः स्तोमाश्च विष्टुतीः॥ छंदोभिरुक्था
शस्त्राणि साम्नावभृथ आप्यते॥२८॥ इळाभिर्भक्षाना
प्नोति सूक्तवाकेनाशिषः॥ शंयुना पत्नीसंयाजांत्समिष्ट
यजुषा संस्थाम्॥२९॥ व्रतेन दीक्षामाप्नोति दीक्षयाप्नो
ति दक्षिणाम्॥ दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्य

॥१३६॥

ति जन्मना॥ ऋतेन सत्यमिंद्रियं विपानꣳ शुक्रमंधस इंद्रस्येंद्रि
यमिदं पयोऽमृतं मधु॥७६॥ दृष्ट्वा रूपे व्याकरोत्सत्यानृते प्रजाप
तिः॥ अश्रद्धामनृतेऽदधाच्छ्रद्धाꣳ सत्ये प्रजापतिः॥ ऋतेन सत्यमिं
द्रियं विपानꣳ शुक्रमंधस इंद्रस्येंद्रियमिदं पयोऽमृतं मधु॥७७॥
वेदेन रूपे व्यपिबत्सुतासुतौ प्रजापतिः॥ ऋतेन सत्यमिंद्रियं वि
पानꣳ शुक्रमंधस इंद्रस्येंद्रियमिदं पयोऽमृतं मधु॥७८॥ दृष्ट्वा परि
स्रुतो रसꣳ शुक्रेण शुक्रं व्यपिबत्पयः सोमं प्रजापतिः॥ ऋतेन स
त्यमिंद्रियं विपानꣳ शुक्रमंधस इंद्रस्येंद्रियमिदं पयोऽमृतं मधु॥
॥७९॥ ध॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१५२॥

सीसेन तंत्रं मनसा मनीषिण ऊर्णासूत्रेण कवयो वयंति ॥ अश्विना
यज्ञं सविता सरस्वतींद्रस्य रूपं वरुणो भिषज्यन् ॥८०॥ तदस्य
रूपममृतं शचीभिस्तिस्रो दधुर्देवताः संरराणाः ॥ लोमानि
शष्पैर्बहुधा न तोक्मभिस्त्वगस्य मांसमभवन्न लाजाः ॥८१॥
तदश्विना भिषजा रुद्रवर्तनी सरस्वती वयति पेशो अंतरम् ॥
अस्थि मज्जानं मासरैः कारोतरेण दधतो गवां त्वचि ॥८२॥ स
रस्वती मनसा पेशलं वसु नासत्याभ्यां वयति दर्शतं वपुः ॥
रसं परिस्रुता न रोहितं नग्नहुर्धीरस्तसरं न वेम ॥८३॥ पयसा

॥१५२॥

शुक्रममृतं जनित्रं सुरया मूत्राज्जनयंत रेतः ॥ अपामतिं दु
र्मतिं बाधमाना ऊवध्यं वातं सब्वं तदारात् ॥८४॥ इंद्रः सुत्रा
मा हृदयेन सत्यं पुरोडाशेन सविता जजान ॥ यकृत्क्लोमानं
वरुणो भिषज्यन्मतस्ने वायव्यैर्न मिनाति पित्तम् ॥८५॥ आंत्रा
णि स्थालीर्मधु पिन्वमाना गुदाः पात्राणि सुदुघा न धेनुः ॥ श्ये
नस्य पत्रं न प्लीहा शचीभिरासंदी नाभिरुदरं न माता ॥८६॥ कुं
भो वनिष्ठुर्जनिता शचीभिर्यस्मिन्नग्रे योन्यां गर्भो अंतः ॥ प्ला
शिर्व्यक्तः शतधार उत्सो दुहे न कुंभी स्वधां पितृभ्यः ॥८७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१४२॥

मुखꣳ सदस्य शिर इत्सतेन जिह्वा पवित्रमश्विनासंत्सरस्वती॥
चप्यं न पायुर्भिषगस्य वालो वस्तिर्न शेपो हरसा तरस्वी॥८८॥
अश्विभ्यां चक्षुरमृतं ग्रहाभ्यां छागेन तेजो हविषा शृतेन॥ प
क्ष्माणि गोधूमैः कुवलैरुतानि पेशो न शुक्रमसितं वसाते॥
॥८९॥ अविर्न मेषो नसि वीर्याय प्राणस्य पंथा अमृतो ग्रहाभ्या
म्॥ सरस्वत्युपवाकैर्व्यानं नस्यानि बर्हिर्बदरैर्जजान॥९०॥ इं
द्रस्य रूपं ऋषभो बलाय कर्णाभ्याꣳ श्रोत्रममृतं ग्रहाभ्याम्॥
यवा न बर्हिर्भ्रुवि केसराणि कर्कंधु जज्ञे मधु सारघं मुखात्॥
॥९१॥

॥१४३॥

आत्मंनुपस्थे न वृकस्य लोम मुखे श्मश्रूणि न व्याघ्रलोम॥ के
शा न शीर्षन्यशसे श्रियै शिखा सिꣳहस्य लोम त्विषिरिंद्रिया
णि॥९२॥ अंगान्यात्मन्भिषजा तदश्विनात्मानमंगैः सम
धात्सरस्वती॥ इंद्रस्य रूपꣳ शतमानमायुश्चंद्रेण ज्योति
रमृतं दधानाः॥९३॥ सरस्वती योन्यां गर्भमंतरश्विभ्यां पत्नी
सुकृतं बिभर्ति॥ अपाꣳ रसेन वरुणो न साम्नेंद्रꣳ श्रियै जनयं
नप्सु राजा॥९४॥ तेजः पशूनाꣳ हविरिंद्रियावत्परिस्रुता पयसा
सारघं मधु॥ अश्विभ्यां दुग्धं भिषजा सरस्वत्या सुतासुता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्यो ममृतः सोमः इंदुः ॥९५॥ छं॥ क्षत्रस्य नाभिरसि क्षत्रस्य यो
निरसि ॥ मा त्वा हिंसीन्मा मा हिंसीः ॥ निषसाद धृतव्रतो व
रुणः पस्त्यास्वा ॥ साम्राज्याय सुक्रतुः ॥ मृत्योः पाहि विद्यो
त्पाहि ॥ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्या
म् ॥९६॥ अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिंचा
मि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिंचामि ॥ इंद्रस्यें
द्रियेण बलाय श्रियै यशसेभिषिंचामि ॥९७॥ कोसि कतमो
सि कस्मै त्वा काय त्वा ॥ सुश्लोक सुमंगल सत्यराजन् ॥९८॥

॥१४४॥

शिरो मे श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि ॥ राजा मे प्रा
णोऽमृतं सम्राट् चक्षुर्विराट् श्रोत्रम् ॥९९॥ जिह्वा मे भद्रं वा
ङ्महो मनो मन्युः स्वराड् भामः ॥ मोदाः प्रमोदाऽअंगुलीरंगानि
मित्रं मे सहः ॥१००॥ बाहू मे बलमिंद्रियं हस्तौ मे कर्म वीर्य
म् ॥ आत्मा क्षत्रमुरो मम ॥१०१॥ पृष्टीर्मे राष्ट्रमुदरमंसौ ग्री
वाश्च श्रोणी ॥ ऊरूऽअरत्नी जानुनी विशो मेंगानि सर्वतः ॥
॥१०२॥ नाभिर्मे चित्तं विज्ञानं पायुर्मेपचितिर्भसत् ॥ आनंद
नंदाऽआंडौ मे भगः सौभाग्यं पसः ॥१०३॥ जंघाभ्यां पद्भ्यां ध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१४५॥

मोस्मिन्विश्रि राज्ञा प्रतितिष्ठित॥ प्रति क्षत्रे प्रतितिष्ठामि राष्ट्रे।
प्रत्यश्वेषु प्रतितिष्ठामि गोषु।१०४। प्रत्यंगेषु प्रतितिष्ठाम्यात्म
न्प्रति प्राणेषु प्रतितिष्ठामि पुष्टे। प्रति द्यावापृथिव्योः प्रतिति
ष्ठामि यज्ञे।१०५॥ त्रयादेवाऽएकादशास्त्रयस्त्रिंशः सुराधसः।
बृहस्पतिपुरोहितादेवस्य सवितुः सवे। देवादेवैरवंतु मा।
॥१०६। प्रथमाद्वितीयै द्वितीयास्तृतीयैस्तृतीयाः सत्येन॥
सत्यं यज्ञेन यज्ञो यजुर्भिर्यजूंषि सामभिः।१०७। सामान्यृ
ग्भिर्ऋचः पुरोनुवाक्याभिः पुरोनुवाक्या याज्याभिर्याज्या

॥१४५॥

वषट्कारैः॥ वषट्काराऽआहुतिभिराहुतयो मे कामान्त्समर्द्धयंतु
भूः स्वाहा॥१०८॥ लोमानि प्रयतिर्मम त्वङ्मऽआनतिरागतिः।
मांसं मऽउपनतिर्वस्वस्थि मज्जा मऽआनतिः॥१०९॥६॥ ॥६॥
स्वाद्वींत्वा १ देवायज्ञं २ सुरावंतं ३ दृष्ट्वा रूपे ४ सोमोराजा ५ सीसेन तंत्रं ६।
सत्रस्य नाभिः ७॥ इति एकविंशतितमोध्यायः॥ ॥ सप्तानुवाकेषु ७॥
॥६॥ ॥ॐ म॥ ॥ यद्देवादेवहेडनं देवासश्चकृमा वय
म्॥ अग्निर्मा तस्मादेनसो विश्वान्मुंचत्वंहसः॥१॥ यदि दि
वा यदि नक्तमेनांसि चकृमा वयम्। वायुर्मा तस्मादेनसो विश्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१४६॥

न्मुंचत्वꣳहसः॥२॥यदिजाग्रद्यदिस्वप्नऽएनाꣳसिचकृमावय
म्॥सूर्योमातस्मादेनसोविश्वान्मुंचत्वꣳहसः॥३॥यद्ग्रामेयदर
ण्येयत्सभायांयदिंद्रिये॥यच्छूद्रेयदर्येयदेनश्चकृमावयम्॥यदे
कस्याधिधर्मणितस्यावयजनमसि॥यदापोऽअ [illegible]
घ्न्याऽइतिवरुणेतिशपामहेततोवरुणनोमुंच॥अवभृथ
निचुंपुणनिचेरुरसिनिचुंपुणः॥अवदेवैर्देवकृतमेनोय
[illegible]क्ष्यवमर्त्यैर्मर्त्यकृतंपुरुराव्णोदेवरिषस्पाहि॥समुद्रेतेहृद
यमप्स्वंतः संत्वाविशंत्वोषधीरुतापः॥सुमित्रियानऽआपः॥७

॥१४६॥

त्रि

षधयःसंतुदुर्मित्रियास्तस्मैसंतु॥योस्मान्द्वेष्टियंचवयंद्विष्मः॥
॥८॥द्रुपदादिवमुमुचानःस्विन्नस्नातोमलादिव॥पूतंप
वित्रेणेवाज्यमापःशुंधंतुमैनसः॥९॥उद्वयंतमसस्परिस्वः
पश्यंतऽउत्तरम्॥देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमम्॥१०॥
अपोऽअद्यान्वचारिषꣳरसेनसमसृक्ष्महि॥पयस्वानग्नऽ
आगमंतंमासꣳसृजवर्चसाप्रजयाचधनेनच॥११॥एधोस्येधिषी
महिसमिदसितेजोसितेजोमयिधेहि॥१२॥समाववर्तिपृथि
वीसमुषाःसमुसूर्यः॥समुविश्वमिदंजगत्॥वैश्वानरज्योति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१४७॥

भूयासंविभून्नामान्यश्चवैभूः स्वाहा ॥८॥ अभ्यादधामि सम्मि
धमग्ने व्रतपते त्वयि ॥ व्रतं च श्रद्धां चोपैमींधे त्वा दीक्षितो ऽ
अहम् ॥९॥ यत्र ब्रह्म च क्षत्रं च सम्यंचौ चरतः सह ॥ तं लोकं
पुण्यं प्रज्ञेषं यत्र देवाः सहाग्निना ॥१०॥ यत्रेंद्रश्च वायुश्च सम्यं
चौ चरतः सह ॥ तं लोकं पुण्यं प्रज्ञेषं यत्र सेदिर्न विद्यते ॥११॥
अंशुना ते ऽअंशुः पृच्यतां परुषा परुः ॥ गंधस्ते सोममव
तु मदाय रसो ऽअच्युतः ॥१२॥ सिंचंति परि षिंचंत्युत्सिंचं
ति पुनंति च ॥ सुरायै बभ्रवै मदे किंत्वो वदति किंत्वः ॥१३॥

॥१४७

धानावंतं करंभिणमपूपवंतमुक्थिनम् ॥ इंद्र प्रातर्जुषस्व
नः ॥१४॥ बृहदिंद्राय गायत मरुतो वृत्रहंतमम् ॥ येन ज्योतिर
जनयंन्नृतावृधो देवं देवाय जागृवि ॥१५॥ अध्वर्यो ऽअद्रिभिः
सुतꣳ सोमं पवित्र ऽआनय ॥ पुनीहींद्राय पातवे ॥१६॥ यो भू
तानामधिपतिर्यस्मिंल्लोका ऽअधि श्रिताः ॥ य ऽईशे महतो
महांश्च स्तेन गृह्णामि त्वामहं मयि गृह्णामि त्वामहम् ॥१७॥
उपयामगृहीतो ऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेंद्राय त्वा सुत्रा
म्णे ॥ एष ते योनिरश्विभ्यां त्वा सरस्वत्यै त्वेंद्राय त्वा सुत्राम्णे ॥१८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१४८॥

प्राण पा मेः अपानपाश्चक्षुष्पाश्रोत्रपाश्च मे॥ वाचो मे वि
श्वभेषजो मनसो सि विलायकः॥१९॥ अश्विनघृतस्य
ते सरस्वत्लिघृतस्येंद्रेण सुत्राम्णा घृतस्या उपहूत उपहू
तस्य भक्षयामि॥२०॥ समिद्ध इंद्र उषसामनीके पुरोरु
चा पूर्वघृद्वावृधानः॥ त्रिभिर्देवैस्त्रिंशता वज्रबाहु
र्जघान वृत्रं वि दुरो ववार॥२१॥ नराशंसः प्रतिशू
रो मिमानस्तनूनपात्प्रति यज्ञस्य धाम॥ गोभिर्वपावा
न्मधुना समंजन्हिरण्यैश्चंद्री यजति प्रचेताः॥२२॥

॥१४८॥

ईडितो देवैर्हरिवांश्च अभिष्टिराजुह्वानो हविषा शर्द्ध[illegible]मा
नः॥ पुरंदरो गोत्रभिद्वज्रबाहुरा यातु यज्ञमुपनो जुषाणः॥
॥२३॥ जुषाणो बर्हिर्हरिवान्न इंद्रः प्राचीनं सीद[illegible]प्रदिशा
पृथिव्याः॥ उरुप्रथाः प्रथमानं स्योनमादित्यैरक्तं वसुभिः
सजो[illegible]षाः॥२४॥ इंद्रं दुरः॥ कवष्यो धावमाना वृषाणं यंतु
जनयः सुपत्नीः॥ द्वारो देवीरभितो विश्रयंतां सुवीरा वी
रं प्रथमाना महोभिः॥२५॥ उषासानक्ता बृहती बृहंतं प
यस्वती सुदुघे शूरमिंद्रम्॥ तंतुं ततं पेशसा संवयंती दे

॥१४२॥

यानं देवं यजतः सुरुक्मे॥२६॥ दैव्या मिमाना मनुषः पुरुत्राहोतारा इंद्रं प्रथमा सुवाचा॥ मूर्द्धन्यज्ञस्य मधुना दधाना प्राचीनं ज्योतिर्हविषा वृधातः॥२७॥ तिस्रो देवी॥ हविषा वर्द्धमाना इंद्रं जुषाणा जनयो न पत्नीः॥ अछिन्नं तंतुं पयसा सरस्वतीळा देवी भारती विश्वतूर्तिः॥२८॥ त्वष्टा दधच्छुष्ममिंद्राय वृष्णे पाको चिष्टुर्यशसे पुरूणि॥ वृषा यजन्वृषणं भूरिरेता मूर्द्धन्यज्ञस्य समनक्तु देवान्॥२९॥ वनस्पतिरवसृष्टो न पाशैस्त्मन्या समंजं छमिता न देवः॥ इंद्रस्य ह

॥१४२॥

व्यैर्जठरं पृणानः स्वदाति यज्ञं मधुना घृतेन॥३०॥ स्तोकानामिंदुं प्रति शूर इन्द्रो वृषायमाणो वृषभस्तुराषाट्॥ घृतप्रुषा मनसा मोदमानाः स्वाहा देवा अमृता मादयंतां॥३१॥ धिं आयात्विंद्रो वस उप न इह स्तुतः सधमादस्तु शूरः॥ वावृधानस्तविषीर्यस्य पूर्वीर्द्यौर्न क्षत्रमभिभूति पुष्यात्॥३२॥ आ न इंद्रो दूरादा न आसादभिष्टिकृदवसे यासदुग्रः॥३ॅ॥ जिष्ठेभिर्नृपतिर्वज्रबाहुः संगे समत्सु तुर्वणिः पृतन्यून्॥३३॥ आ न इंद्रो हरिभिर्यात्वछार्वाचीनो वसे राधसे च॥ तिष्ठाति वज्री मघवा विरप्शीमं यज्ञमनु नो वाजसातौ॥३४॥ त्रात

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रमिंद्रमवितारमिंद्रꣳहवेहवेसुहवꣳशूरमिंद्रं।।ह्वयामिश
क्रंपुरुहूतमिंद्रꣳस्वस्तिनोमघवाधात्विन्द्रः।।५०।।इन्द्रः
सुत्रामास्ववाँ२अवोभिस्सुमृडीकोभवतुविश्ववेदाः।।बाध
तांद्वेषोअभयङ्कृणोतुसुवीर्यस्यपतयःस्याम।।५१।।तस्य
वयꣳसुमतौयज्ञियस्यापिभद्रेसौमनसेस्याम।।ससुत्रा
मास्ववाँ२इन्द्रोअस्मेआराच्चिद्द्वेषस्सनुतर्युयोतु।।५२।।आ
मन्द्रैरिंद्रहरिभिर्याहिमयूररोमभिः।।मात्वाकेचिन्नियम
न्विन्नपाशिनोतिधन्वेवताँ२इहि।।५३।।एवेदिन्द्रंवृषणंव

ज्रबाहुंवसिष्ठासोअभ्यर्चन्त्यर्कैः।।सनस्स्तुतोवीरवद्धातुगो
मद्यूयंपातःस्वस्तिभिःसदानः।।५४।।समिद्धोअग्निरश्वि
नातप्तोघर्मोविराट्सुतः।।दुहेधेनुःसरस्वतीसोमꣳशु
क्रमिहेन्द्रियं।।५५।।तनूपाभिषजासुतेश्विनोभासरस्वती।।
मध्वारजाꣳसीन्द्रियमिंद्रायपथिभिर्वहान्।।५६।।इन्द्राये
न्दुꣳसरस्वतीनराशꣳसेननग्नहुम्।।अधातामश्विनाम
धुभेषजंभिषजासुते।।५७।।आजुह्वानासरस्वतीन्द्रायेन्द्रि
याणिवीर्यम्।।इडाभिरश्विनाइषꣳसमूर्जꣳसꣳरयिं
दधुः।।५८।।अश्विनानमुचेःसुतꣳसोमꣳशुक्रंपरिस्रुता।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१४५॥

सरस्वतीत्वमाभरद्बर्हिषेन्द्रायपातवे॥४७॥कूवष्योनव्यच
स्वतीरश्विभ्यान्नदुरोदिशः॥इन्द्रोनरोदसीउभेदुहेकामा
न्सरस्वती॥४८॥उषासानक्तमश्विनादिवेंद्रꣳसायमिंद्रि
यैः॥संजानानेसुपेशसासमंजातेसरस्वत्या॥४९॥पातं
नोअश्विनादिवापाहिनक्तꣳसरस्वति॥दैव्याहोताराभि
षजापातमिंद्रꣳसचासुते॥५०॥तिस्त्रस्त्रेधासरस्वत्यश्वि
नाभारतीळा॥तीव्रंपरिस्रुतासोममिन्द्रायसुषुवुर्मदं॥
॥५१॥अश्विनाभेषजंमधुभेषजंनस्सरस्वती॥इंद्रेत्वष्टा
यशःश्रियꣳरूपꣳरूपमधुस्सुते॥५२॥ऋतुथेंद्रोवनस्प

॥१४५॥

तिःशशमानःपरिस्रुता॥कीलालमश्विभ्यांमधुदुहेधेनुः
सरस्वती॥५३॥गोभिर्नसोममश्विनामासरेणपरिस्रु
ता॥समधातꣳसरस्वत्यास्वाहेन्द्रेसुतम्मधु॥५४॥छि॥
अश्विनाहविरिंद्रियंनमुचे र्धियासरस्वती॥आशु
क्रमासुराद्वसुमघमिन्द्रायजभ्रिरे॥५५॥यमश्विनास
रस्वतीहविषेंद्रमवर्द्धयन्॥सबिभेदवलम्मघन्नमुचा
आसुरेसचा॥५६॥तमिंद्रंपशवःसचाश्विनोभासरस्व
ती॥दधानाअभ्यनूषतहविषायज्ञइंद्रियैः॥५७॥यइं
द्रइंद्रियंदधुःसवितावरुणोभगः॥ससुत्रामाहविष्पतिर्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जमानाय सश्चत ॥५५॥ सविता वरुणो दधद्यजमानाय दा
शुषे ॥ आदत्त नमुचेर्वसु सुत्रामा बलमिंद्रियं ॥५६॥ वरु
णः क्षत्रमिंद्रियं भगेन सविता श्रियं ॥ सुत्रामा यशसा बलं
दधाना यज्ञमाशत ॥५७॥ अश्विना गोभिरिंद्रियमश्वेभि
र्वीर्यं बलं ॥ हविषेन्द्रꣳ सरस्वती यजमानमवर्द्धयन् ॥५८॥
ता नासत्या सुपेशसा हिरण्यवर्त्तनी नरा ॥ सरस्वती हवि
ष्मतींद्र कर्मसु नोवत ॥५९॥ ता भिषजा सुकर्मणा सा सुदु
घा सरस्वती ॥ स वृत्रहा शतक्रतुरिंद्राय दधुरिंद्रियं ॥६०॥
युवꣳ सुराममश्विना नमुचावासुरे सचा ॥ विपिपानाः

॥१५२॥

सरस्वतींद्रं कर्मस्वावत ॥६१॥ पुत्रमिव पितराश्विनोभे
न्द्रावथुः काव्यैर्दꣳसनाभिः ॥ यत्सुरामं व्यपिबः शचीभिः स
रस्वती त्वा मघवन्नभिष्णक् ॥६२॥ यस्मिन्नश्वास ऋष
भास उक्षणो वशा मेषा अवसृष्टास आहुताः ॥ कीलालपे सो
मपृष्ठाय वेधसे हृदा मतिं जनय चारुमग्नये ॥६३॥ अहाव्य
ग्ने हविरास्ये ते स्रुचीव घृतं चम्वीव सोमः ॥ वाजसनिꣳ
रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहंतं ॥६४॥ ६॥ अ
श्विना तेजसा चक्षुः प्राणेन सरस्वती वीर्यं ॥ वाचेंद्रो बले
नेंद्राय दधुरिंद्रियं ॥६५॥ गोमदू षु णासत्याश्वावद्यात

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मश्विना॥ वर्त्तीरुद्रान्तपाय्यं॥६६॥नयत्परोम्नांतरआदधर्ष-
द्वृषण्वसू॥दुःशंसोमर्त्योरिपुः॥६७॥तानआवोढमश्वि-
नारयिंपिशंगसंदृशं॥धिष्ण्यावरिवोविदं॥६८॥
पावकानःसरस्वतीवाजेभिर्वाजिनीवती॥यज्ञंवष्टुधियाव-
सुः॥६९॥चोदयित्रीसूनृतानांचेतंतीसुमतीनां॥यज्ञंदधेस-
रस्वती॥७०॥महोअर्णःसरस्वतीप्रचेतयतिकेतुना॥धियो
विश्वाविराजति॥७१॥इन्द्रायाहिचित्रभानोसुताइमेत्वाय-
वः॥अण्वीभिस्तनापूतासः॥७२॥इंद्रायाहिधियेषितोवि-
प्रजूतःसुतावतः॥उपब्रह्माणिवाघतः॥७३॥इंद्रायाहि

॥१५३॥

तूतुजानउपब्रह्माणिहरिवः॥सुतेदधिष्वनश्चनः॥७४॥
अश्विनापिबतांमधुसरस्वत्यासजोषसा॥इंद्रःसुत्रामावृ-
त्रहाजुषंतांसोम्यंमधु॥७५॥ ॥छ॥ ॥छ॥ अष्टानुवाकेषुपंच
सप्ततिः॥ इतिशुक्लयजुर्वेदसंहितायांद्वाविंशतिमोध्या-
यः॥२०॥ हरिः ॐ॥ इमंमेवरुणःश्रुधीहवमद्याचमृडय॥
त्वामवस्युराचके॥१॥तत्वायामिब्रह्मणावंदमानस्तदाशा-
स्तेयजमानोहविर्भिः॥अहेडमानोवरुणेहबोध्युरुशंस
मानःआयुःप्रमोषीः॥२॥त्वंनोअग्नेवरुणस्यविद्वा-
न्देवस्यहेडोअवयासिसीष्ठाः॥यजिष्ठोवह्नितमःशोशु-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१५४॥

चा नो विश्वा द्वेषाᳪसि प्र मुमुग्ध्यस्मत्॥३॥ स त्वन्नो अग्नेऽव
मो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ॥ अव यक्ष्व नो वरुण
ᳪ रराणो वीहि मृळीकᳪ सुहवो न एधि॥४॥ महीमू षु मात
रᳪ सुव्रतानामृतस्य पत्नीमवसे हुवेम॥ तुविक्षत्रामजर
न्तीमुरूचीᳪ सुशर्माणमदितिᳪ सुप्रणीतिं॥५॥ सुत्रामाणं
पृथिवीं द्यामनेहसᳪ सुशर्माणमदितिᳪ सुप्रणीतिं॥ दै
वीं नावᳪ स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये
॥६॥ सुनावमा रुहे यमस्रवन्तीमनागसं॥ शतारित्राᳪ
स्वस्तये॥७॥ आ नो मित्रावरुणा घृतैर्गव्यूतिमु क्षतं॥

॥१५४॥

मध्वा रजाᳪसि सुक्रतू॥८॥ प्र बाहवा सिसृतं जीवसे न आ
नो गव्यूतिमुक्षतं घृतेन॥ आ मा जने श्रवयतं युवाना श्रुतं मे
मित्रावरुणा हवेमा॥९॥ शन्नो भवन्तु वाजिनो हवेषु देवता
ता मितद्रवः स्वर्काः॥ जम्भयन्तोऽहिं वृकᳪ रक्षाᳪसि सनेम्य
स्मद्युयवन्नमीवाः॥१०॥ ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृ
ण्वन्तु वाजिनो मितद्रवः॥ सहस्रसा मेधसाता सनिष्यवो महो
ये धनᳪ समिथेषु जभ्रिरे॥११॥ वाजेवाजेऽवत वाजिनो
नो धनेषु विप्रा अमृता ऋतज्ञाः॥ अस्य मध्वः पिबत मादयध्वं
तृप्ता यात पथिभिर्देवयानैः॥१२॥ ६॥ समिद्धो अग्निः समि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धासुसमिद्धो वरेण्यः॥ गायत्रीछंदइंद्रियं त्र्यविर्गौर्वयोद
धुः॥१३॥ तनूनपाच्छुचिव्रतस्तनूपाश्च सरस्वती॥ उष्णिहा
छंदइंद्रियंदित्यवाड्गौर्वयोदधुः॥१४॥ इळाभिरग्निरीड्यः
सोमो देवो अमर्त्यः॥ अनुष्टुप्छंदइंद्रियं पंचाविर्गौर्वयो
दधुः॥१५॥ सुबर्हिरग्निः पूषण्वान्स्तीर्णबर्हिरमर्त्यः॥
बृहतीछंदइंद्रियं त्रिवत्सो गौर्वयोदधुः॥१६॥ दुरो देवीर्दिशो
महीर्ब्रह्मा देवो बृहस्पतिः॥ पंक्तिश्छंद इहेंद्रियं तुर्यवाड्गौ
र्वयोदधुः॥१७॥ उषे यह्वी सुपेशसा विश्वे देवा अमर्त्याः॥ त्रि
ष्टुप्छंद इहेंद्रियं पष्ठवाड्गौर्वयोदधुः॥१८॥ दैव्या होतारावि

षजेंद्रेण सयुजा युजा॥ जगतीछंद इंद्रियमनड्वान्गौर्वयोदधुः॥
॥१९॥ तिस्र इळा सरस्वती भारती मरुतो विशः॥ विराट्छं
द इहेंद्रियं धेनुर्गौर्न वयोदधुः॥२०॥ त्वष्टा तुरीपो अद्भुत इंद्रा
ग्नी पुष्टिवर्धना॥ द्विपदाछंद इंद्रियमुक्षा गौर्न वयोदधुः॥
॥२१॥ शमिता नो वनस्पतिः सविता प्रसुवन्भगम्॥ ककुप्
छंद इहेंद्रियं वशा वेहद्वयोदधुः॥२२॥ स्वाहा यज्ञं वरुणः सु
क्षत्रो भेषजं करत्॥ अतिछंदा इंद्रियं बृहदृषभो गौर्वयोद
धुः॥२३॥ छ॥ वसंतेन ऋतुना देवा वसवस्त्रिवृता स्तुताः॥
रथंतरेण तेजसा हविरिंद्रे वयोदधुः॥२४॥ ग्रीष्मेण ऋतुना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नो

॥१५६॥

देवा रुद्राः पंचदशे स्तुताः ॥ बृहता यशसा बलꣳ हविरिंद्रे व
योदधुः ॥२५॥ वर्षाभिर्ऋतुनादित्याः स्तोमे स[illegible]प्तदशे स्तुताः ॥
वैरूपेण विशौजसा हविरिंद्रे वयोदधुः ॥२६॥ शारदेन ऋतु
ना देवा एकविꣳशऋभव स्तुताः ॥ वैराजेन श्रिया श्रियꣳ
हविरिंद्रे वयोदधुः ॥२७॥ हेमंतेन ऋतुना देवास्त्रिणवे म
रुतस्तुताः ॥ बलेन शक्वरीः सहो हविरिंद्रे वयोदधुः ॥
॥२८॥ शैशिरेण ऋतुना देवास्त्रयस्त्रिꣳशेऽमृता स्तुताः ॥
सत्येन रेवतीः क्षत्रꣳ हविरिंद्रे वयोदधुः ॥२९॥ ६॥ होता य
क्षत्समिधाग्निमिडस्पदेश्विनेंद्रꣳ सरस्वतीमजो धूम्रोन

॥१५६॥

गोधूमैः कुवलैर्भेषजं मधु शष्पैर्न तेज इंद्रियं पयः सोमः प
रिस्रुता घृतं मधु व्यंत्वाज्यस्य होतर्यज ॥३०॥ होता यक्षत्तनूनपा
त्सरस्वतीमविर्मेषो न भेषजं पथा मधुमताभरन्नश्विनेंद्राय
वीर्यम् ॥ बदरैरुपवाकाभिर्भेषजं तोक्मभिः पयस्सोमः प
रिस्रुता घृतं मधु व्यंत्वाज्यस्य होतर्यज ॥३१॥ होता यक्षन्नरा
शꣳसं न नग्नहुं पतिꣳ सुरया भेषजं मेषस्सरस्वती भिषग्रथो
न चंद्र्यश्विनोर्वपा इंद्रस्य वीर्यम् ॥ बदरैरुपवाकाभिर्भेषजं
तोक्मभिः पयः सोमः परिस्रुता घृतं मधु व्यंत्वाज्यस्य होत
र्यज ॥३२॥ होता यक्षदिडेडित आजुह्वानः सरस्वतीमिंद्रं ब

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१५८॥

स्य

त्लेनवर्द्धयंन्नृषभेणगावेंद्रियमश्विनेंद्रायभेषजमू॥यवैःक
र्कंधुभिर्मधुलाजैर्नमासरंपयःसोमःपरिस्रुताघृतंमधुव्यं
त्वाज्यहोतर्यज॥३३॥होतायक्षद्बर्हिरूर्णम्रदाभिषङ्नासत्या
भिषजाश्विनाश्वाशिशुमतीभिषग्धेनुःसरस्वतीभिषगू॥दु
हइंद्रायभेषजंपयःसोमःपरिस्रुताघृतंमधुव्यंत्वाज्यस्यहो
तर्यज॥३४॥होतायक्षद्दुरोदिशःकवष्योनव्यचस्वतीरश्वि
भ्यान्नदुरोदिशइंद्रोनरोदसीदुघेदुहेधेनुस्सरस्वत्यश्विनें
द्रायभेषजं॥शुक्रंनज्योतिरिंद्रियंपयःसोमःपरिस्रुताघृतं
मधुव्यंत्वाज्यस्यहोतर्यज॥३५॥होतायक्षत्सुपेशसोषेनक्तं

॥१५८॥

दिवाश्विनासमंजातेसरस्वत्यात्विषिमिंद्रेनभेषजम॥
श्येनोनरजसाहृदाश्रियानमासरंपयःसोमःपरिस्रुताघृ
तंमधुव्यंत्वाज्यस्यहोतर्यज॥३६॥होतायक्षद्दैव्याहोतारा
भिषजाश्विनेंद्रंनजागृविदिवानक्तंनभेषजैः॥शूषंस
रस्वतीभिषक्सीसेनदुहइंद्रियंपयःसोमःपरिस्रुताघृतं
मधुव्यंत्वाज्यस्यहोतर्यज॥३७॥होतायक्षत्तिस्रोदेवीर्न
भेषजंत्रयस्त्रिधातवोपसोरूपमिंद्रेहिरण्ययमश्विने
डानभारती॥वाचासरस्वतीमहइंद्रायदुहइंद्रियंपयः
सोमःपरिस्रुताघृतंमधुव्यंत्वाज्यस्यहोतर्यज॥३८॥हो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१५८॥

तायक्षत्सुरेतसमृषभंनर्यापसंत्वष्टारमिंद्रमश्विनाभि
षजंनसरस्वतीमोजोनजूतिरिंद्रियंवृकोनरभसोभि
षग्यशःसुरयाभेषजंश्रियानमासरंपयःसोमःप
रिस्रुताघृतंमधुव्यंत्वाज्यस्यहोतर्यज॥३९॥होतायक्षद्व
नस्पतिंशमितारंशतक्रतुंभीमन्नमन्युंराजानंव्या
घ्रंनमसाश्विना॥भामंसरस्वतीभिषगिंद्रायदुहइंद्रि
यंपयःसोमःपरिस्रुताघृतंमधुव्यंत्वाज्यस्यहोतर्यज॥
॥४०॥होतायक्षदग्निंस्वाहाज्यस्यस्तोकानांस्वाहामे
दसांपृथक्स्वाहाछागमश्विभ्यांस्वाहामेषंसरस्वत्यै॥

॥१५८॥

स्वाहऋषभमिंद्रायसिंहायसहसइंद्रियंस्वाहाग्निंन्न
भेषजंस्वाहासोममिंद्रियं॥स्वाहेंद्रंसुत्रामाणंसविता
रंवरुणंभिषजांपतिंस्वाहावनस्पतिंप्रियंपाथोनभेषजं॥
स्वाहादेवा[illegible]आज्यपाजुषाणोअग्निर्भेषजंपयःसोमःपरि
स्रुताघृतंमधुव्यंत्वाज्यस्यहोतर्यज॥॥४१॥॥चतुर्थोनुवाकः॥
होतायक्षदश्विनौछागस्यवपायामेदसोजुषेतांहविर्होतर्य
ज॥होतायक्षत्सरस्वतीमेषस्यवपायामेदसोजुषतांहवि
र्होतर्यज॥होतायक्षदिंद्रमृषभस्यवपायामेदसोजुषतां
हविर्होतर्यज॥४२॥होतायक्षद[illegible]श्विनौसरस्वतीमिंद्रंसु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१५१॥

त्रामाणमिमेसोमाःसुरामाणश्छागैर्नमेषैर्ऋषभैःसुताः॥
शष्पैर्नतोक्मभिर्लाजैर्महस्वंतोमदामासरेणपरिष्कृताः॥
शुक्राःपयस्वंतोमृताःप्रस्थितावोमधुश्चुतस्तानश्विनासर
स्वतींद्रःसुत्रामावृत्रहाजुषंतांसोम्यंमधु॥पिबंतुमदंतुव्यं
तुहोतर्यज॥७२॥होतायक्षदश्विनौछागस्यहविषआत्तामद्य
मध्यतोमेदउद्भृतंपुराद्वेषोभ्यःपुरापौरुषेय्यागृभः॥घस्तांनू
नंघासेअज्राणांयवसप्रथमानांसुमत्क्षराणांशतरु
द्रियाणामग्निष्वात्तानांपीवोपवसनानां॥पार्श्वतःश्रोणितः
शितामतउत्सादतोंगादंगादवत्तानांकरतएवाश्विनाजुषे

॥१५२॥

तांहविर्होतर्यज॥होतायक्षत्सरस्वतींमेषस्यहविषआव
यदद्यमध्यतोमेदउद्भृतंपुराद्वेषोभ्यःपुरापौरुषेय्यागृभः॥
घसन्नूनंघासेअज्राणांयवसप्रथमानांसुमत्क्षराणां
शतरुद्रियाणामग्निष्वात्तानांपीवोपवसनानां॥पार्श्वत
श्रोणितःशितामतउत्सादतोंगादंगादवत्तानांकरदेवं
सरस्वतीजुषतांहविर्होतर्यज॥होतायक्षदिंद्रमृषभस्य
हविषआवयदद्यमध्यतोमेदउद्भृतंपुराद्वेषोभ्यःपुरापौ
रुषेय्यागृभः॥घसन्नूनंघासेअज्राणांयवसप्रथमानां
सुमत्क्षराणांशतरुद्रियाणामग्निष्वात्तानांपीवोपवस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१६०॥

नानाम् ॥ प्रार्थ्वतः श्रोत्रितः श्रितामतः सादतो ऽङ्गा दङ्गादव
त्तानां करदेवमिंद्रो जुषतां हविर्होतर्यज ॥ ४४ ॥ होताय
क्षद्वनस्पतिमभिहि पिष्टतमया रभिष्ठया रशनयाधित्वा
यत्राश्विनोश्छागस्य हविषः प्रिया धामानि यत्र सरस्वत्या
मेषस्य हविषः प्रिया धामानि यत्रेंद्रस्य ऋषभस्य हविषः प्रि
या धामानि ॥ यत्राग्नेः प्रिया धामानि यत्र सोमस्य प्रिया धा
मानि यत्रेंद्रस्य सुत्राम्णः प्रिया धामानि ॥ यत्र सवितुः प्रिया धा
मानि यत्र वरुणस्य प्रिया धामानि यत्र वनस्पतेः प्रिया पाथा
ᳬसि ॥ यत्र देवानामाज्यपानां प्रिया धामानि य[illegible]त्राग्नेर्हो

॥१६०॥

तुः प्रिया धामानि ॥ तत्रैतान्प्रस्तुत्येवोपस्तुत्येवोपावस्रक्षद्रभी
यस इव घृत्वी करदेवं देवो वनस्पतिर्जुषतां हविर्होतर्यज ॥
॥ ४५ ॥ होता यक्षदग्निᳬ स्विष्टकृतमयाडग्निरश्विनोश्छा
गस्य हविषः प्रिया धामान्ययाट् सरस्वत्या मेषस्य हविषः प्रिया
धामान्ययाडिंद्रस्य ऋषभस्य हविषः प्रिया धामानि ॥ अयाडग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामान्ययाडिंद्रस्य सु
त्राम्णः प्रिया धामानि ॥ अयाट् सवितुः प्रिया धामान्ययाड् वरुण
स्य प्रिया धामान्ययाड् वन[illegible]स्पतेः प्रिया पाथाᳬसि ॥ अयाड्दे
वानामाज्यपानां प्रिया धा नियक्षदग्नेर्होतुः प्रिया धामा

मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१६१॥

नि॥ यक्षत्स्वं महिमानमायजतामेज्या इषः कृणोतु सो अध्व
रा जातवेदा जुषतां हविर्होतर्यज॥४६॥ ॥पंचमोनुवाकः॥
देवं बर्हिः। सरस्वती सुदेवमिंद्रे अश्विना। तेजो न चक्षुर
क्ष्योर्बर्हिषा दधुरिंद्रियं वसुवने वसुधेयस्य व्यंतु यज॥
॥४७॥ देवीर्द्वारो अश्विना भिषजेंद्रे सरस्वती। प्राणं न वी
र्यं नसि द्वारो दधुरिंद्रियं वसुवने वसुधेयस्य व्यंतु यज॥
॥४८॥ देवी उषासा। अश्विना सुत्रामेंद्रे सरस्वती। बलं न वा
चमास्य उषाभ्यां दधुरिंद्रियं वसुवने वसुधेयस्य व्यंतु य
ज॥४९॥ देवी जोष्ट्री सरस्वत्यश्विनेंद्रमवर्द्धयन्। श्रोत्रं न

॥१६१॥

कर्णयोर्यशो जोष्ट्रीभ्यां दधुरिंद्रियं वसुवने वसुधेयस्य व्यं
तु यज॥५०॥ देवी ऊर्जाहुती दुघे सुघे इंद्रे सरस्वत्यश्विना भि
षजावतः। शुक्रं न ज्योतिस्तनयोराहुती धत्त इंद्रियं वसुव
ने वसुधेयस्य व्यंतु यज॥५१॥ ॥१॥ देवा देवानां भिषजा होता
राविंद्रमश्विना वषट्कारैः सरस्वती त्विषिं न हृदये मतिं॥
होतृभ्यां दधुरिंद्रियं वसुवने वसुधेयस्य व्यंतु यज॥५२॥
देवीस्तिस्रः। तिस्रो देवीरश्विनेडा सरस्वती। शूषं न मध्ये
नाभ्यामिंद्राय दधुरिंद्रियं वसुवने वसुधेयस्य व्यंतु यज॥५३॥
देव इंद्रो नराशंसस्त्रिवरूथः सरस्वत्याश्विभ्यामीयते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१६२॥

रथः॥ रेतो न रूपममृतं जनित्रमिंद्राय त्वष्टा दधदिंद्रिया
णि वसुवने वसुधेयस्य व्यंतु यज॥५४॥ देवो देवैर्वनस्पति
र्हिरण्यपर्णो अश्विभ्याꣳ सरस्वत्या सुपिप्पल इंद्राय प
च्यते मधु॥ ओजो न जूतिर्ऋषभो न भामं वनस्पतिर्नो दध
दिंद्रियाणि वसुवने वसुधेयस्य व्यंतु यज॥५५॥ देवं
बर्हिर्वारितीनामध्वरे स्तीर्णमश्विभ्यामूर्णम्रदाः सर
स्वत्या स्योनमिंद्र ते सदः॥ ईशायै मन्युꣳ राजानं बर्हि
षा दधुरिंद्रियं वसुवने वसुधेयस्य व्यंतु यज॥५६॥ देवो
अग्निः स्विष्टकृद्देवान्यक्षद्यथायथꣳ होतारा इंद्रमश्विना

॥१६२॥

वाचा वाचꣳ सरस्वतीमग्निꣳ सोमꣳ स्विष्टकृता॥ स्विष्ट
इंद्रः सुत्रामा सविता वरुणो भिषगिष्टो देवो वनस्पतिः स्विष्टा
देवा आज्यपाः॥ स्विष्टो अग्निरग्निना होता होत्रे स्विष्टकृद्य
शो न दधदिंद्रियमूर्जमपचितिꣳ स्वधां वसुवने वसुधेयस्य
व्यंतु यज॥५७॥ अग्निमद्य होतारमवृणीतायं यजमानः
पचन्पक्तीः पचन्पुरोडाशान्बध्नन्नश्विभ्यां छागꣳ सरस्वत्यै
मेषमिंद्राय ऋषभꣳ सुन्वन्नश्विभ्याꣳ सरस्वत्या इंद्राय
सुत्राम्णे सुरासोमान्॥५८॥ सूपस्था अद्य देवो वनस्पति
रभवदश्विभ्यां छागेन सरस्वत्यै मेषेणेंद्राय ऋषभेण॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१६३॥

अद्भ्य॑ स्तोमेदुस्तः प्रतिपचताग्रभीषुतावीवृधंतपुरोळा
शैरपुरश्विनासरस्वतींद्रः सुत्रामासुरासोमान्॥५९॥ त्वाम
द्यऽऋषऽआर्षेय। ऋषीणान्नपाद्वृणीतायंयजमानो
बहुभ्य आसंगतेभ्यएषमेदेवेषुवसुवार्यायक्ष्यतइति॥ता
यादेवादेवदानान्यदुस्तान्यस्माआचशास्वाचगुरस्वेषित
श्चहोतरसिभद्रवाच्यायप्रेषितोमानुषः सूक्तवाकायसू
क्ताब्रूहि॥६०॥ ॥छ॥ षष्ठानुवाकेषुवष्टिः॥ ॥छ॥ इतिशुक्लयजुर्वेदसं
हितायांत्रयोविंशतिमोध्यायः॥ ॥छ॥ ॥ हरिः ॐ ॥ तेजोसि
शुक्रममृतमायुष्पा आयुर्मेपाहि॥ देवस्यत्वासवितुः

॥१६३॥

सि

प्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामाददे॥१॥ इमामगृभ्णा
न्रशनामृतस्यपूर्व्यऽआयुषिविदथेषुकव्या॥ सानोऽअस्मिन्त्सु
तऽआबभूवऋतस्यसामन्त्सरमारपंती॥२॥ अभिधाऽअसि
भुवनमसियंतासिधर्त्ता॥ सत्वमग्निंवैश्वानरंसप्रथसंगाछ
स्वाहाकृतस्त्वगात्वादेवेभ्यः॥३॥ प्रजापतयेब्रह्मन्नश्वंभंत्स्या
मिदेवेभ्यःप्रजापतयेतेनराध्यासम्॥ तंबधानदेवेभ्यःप्रजा
पतयेतेनराध्नुहि॥ प्रजापतयेत्वाजुष्टंप्रोक्षामींद्राग्निभ्यां
त्वाजुष्टंप्रोक्षामिवायवेत्वाजुष्टंप्रोक्षामिविश्वेभ्य [illegible] स्त्वादे
वेभ्योजुष्टंप्रोक्षामिसर्वेभ्यस्त्वादेवेभ्योजुष्टंप्रोक्षामि॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१६३॥

यो अर्व्वंतं॥ जिघांसति तमभ्यमीति वरुणः॥ परो मर्त्तः प
रश्वा॥५॥ ॥प्रथमोनुवाकः॥ ॥अग्नये स्वाहा॥ सोमाय स्वाहा॥
पांमोदाय स्वाहा॥ सवित्रे स्वाहा॥ वायवे स्वाहा॥ विष्णवे स्वाहा॥
इंद्राय स्वाहा॥ बृहस्पतये स्वाहा॥ मित्राय स्वाहा॥ वरुणाय स्वाहा॥

॥१६४॥

॥६॥ हिंकाराय स्वाहा॥ हिं[illegible]कृताय स्वाहा॥ क्रंदते स्वाहा॥ अवक्रं
दाय स्वाहा॥ प्रोथते स्वाहा॥ प्रप्रोथाय स्वाहा॥ गंधाय स्वाहा॥ घ्रा

॥७॥

ताय स्वाहा॥ निविष्टाय स्वाहा॥ उपविष्टाय स्वाहा॥ संदिताय स्वा
हा॥ व[illegible]त्माते स्वाहा॥ आसीनाय स्वाहा॥ शयानाय स्वा
हा॥ स्वपते स्वाहा॥ जाग्रते स्वाहा॥ कूजते स्वाहा॥ प्रबुद्धाय स्वा

॥८॥

हा॥ विजृंभमाणाय स्वाहा॥ विचृ[illegible]त्ताय स्वाहा॥ संहानाय
स्वाहोपस्थिताय स्वाहा॥ अयनाय स्वाहा॥ प्रायणाय स्वाहा॥ ॥९॥
यते स्वाहा॥ धावते स्वाहा॥ उद्द्रावाय स्वाहा॥ उद्द्रुताय स्वाहा॥ भूका
राय स्वाहा॥ भूघृताय स्वाहा॥ निषण्णाय स्वाहा॥ उत्थिताय स्वाहा॥
॥१०॥ जवाय स्वाहा॥ बलाय स्वाहा॥ विवर्तमानाय स्वाहा॥ वि
वृत्ताय स्वाहा॥ विधून्वानाय स्वाहा॥ विधूताय स्वाहा॥ शुश्रूषमा

ष

णाय स्वाहा॥ शृण्वते स्वाहा॥ ॥११॥ ईक्षमाणाय स्वाहा॥ ईक्षिता
य स्वाहा॥ वीक्षिताय स्वाहा॥ निमेषाय स्वाहा॥ यदत्ति तस्मै स्वा
हा॥ यत्पिबति तस्मै स्वाहा॥ यन्मूत्रं करोति तस्मै स्वाहा॥ कुर्वते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१६श्री॥

स्वाहा द्रुतायस्वाहा ॥१२॥ ॥ॐ॥ तत्सवितुर्वरेण्यं भर्गोदेव
स्यधीमहि ॥ धियोयोनः प्रचोदयात् ॥१३॥ हिरण्यपाणि
मूतयेसवितारमुपह्वये ॥ सचेत्तादेवतापदम् ॥१४॥ दे
वस्यचेततो ॥ महीप्रसवितुर्हवामहे ॥ सुमतिꣳ सत्यरा
धसम् ॥१५॥ सुष्टुतिꣳ सुमतीवृधो रातिꣳ सवितुरी
महे ॥ प्र देवायमतीविदे ॥१६॥ रातिꣳ सत्पतिं महे सवि
तारमुपह्वये ॥ आसवंदेववीतये ॥१७॥ देवस्यसवितुर्म
तिमासवं विश्वदेव्यं ॥ धियाभगंमनाम हे ॥१८॥ अ
ग्निꣳ स्तोमेन ॥ बोधयसमिधानो अमर्त्यम् ॥ हव्यादेवेषु

॥१६श्री॥

तु

नोदधत् ॥१९॥ सहव्यवाडमर्त्य उशिग्दूतश्चनोहितः ॥ अ
ग्निर्द्धियासमृण्वति ॥२०॥ तं त्वाघृतस्नवीमहे चित्रभानो
स्वर्दृशम् ॥ देवꣳ आवीतयेवह ॥२१॥ अग्निं दूतं पुरोदधे ह
व्यवाहमुपब्रुवे ॥ देवꣳ आसादयादिह ॥२२॥ अजीजनो हि
पवमान सूर्यं विधारे शक्मनापयः ॥ गोजीरयारꣳहमाणः पु
रन्ध्या ॥२३॥ विभूर्मात्रा ॥ प्रभूः पित्राश्वोसि हयोस्यत्योसि मयो
स्यर्वासि सप्तिरसि वाज्यसि वृषासि नृमणा असि ॥ ययुर्ना
मासि शिशुर्नामास्यादित्यानां पत्वान्विहि ॥२४॥ देवा आशा
पाला ॥ एतं देवेभ्योश्वं मेधाय प्रोक्षितꣳ रक्षत ॥ इह रंतिरि

मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१९५॥

हरमतामिहधृतिरिहस्वधृतिस्वाहा॥२५॥कायस्वाहा।
कस्मैस्वाहाकतमस्मैस्वाहा॥स्वाहाधिमाधीतायस्वाहा
मनःप्रजापतयेस्वाहाचित्तंविज्ञातायाः॥२६॥अदित्यैस्वाहादि
त्यैमह्यैस्वाहादित्यैसुमृडीकायैस्वाहा॥सरस्वत्यैस्वाहा
सरस्वत्यैपावकायैस्वाहासरस्वत्यैबृहत्यैस्वाहा॥२७॥
पूष्णेस्वाहा।पूष्णेप्रप[illegible]थ्यायस्वाहापूष्णेनरंधिषायस्वा
हा॥त्वष्ट्रेस्वाहात्वष्ट्रेतुरीपायस्वाहात्वष्ट्रेपुरुरूपायस्वाहा।
विष्णवेस्वाहाविष्णवेनिभूयपायस्वाहाविष्णवेशिपिवि
ष्टायस्वाहा॥२८॥विश्वोदेवस्यनेतुर्मर्त्तोवुरीतसख्यंम॥

॥१९५॥

विश्वोरायइषुध्यतिद्युम्नंवृणीतपुष्यसेस्वाहा॥२९॥आब्र
ह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यः॥शूरइष
व्योतिव्याधीमहारथोजायतां॥३०॥दोग्ध्रीधेनुर्वोढानड्वा
नाशुःसप्तिःपुरंधिर्योषा॥जिष्णूरथेष्ठाःसभेयोयुवास्ययं
जमानस्यवीरोजायतां॥३१॥निकामेनिकामेनःपर्ज्जन्योव
र्षतुफलवत्योनओषधयःपच्यंतां॥योगक्षेमोनःकल्पतां
म्॥३२॥ॐप्राणायस्वाहा।पानायस्वाहाव्यानायस्वाहा॥च
क्षुषेस्वाहाश्रोत्रायस्वाहावाचेस्वाहामनसेस्वाहा॥३३॥
प्राच्यैदिशे।स्वाहार्वाच्यैदिशेस्वाहादक्षिणायैदिशेस्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१६५॥

हा॥ र्वाच्यै दिशे स्वाहा॥ प्रतीच्यै दिशे स्वाहा॥ र्वाच्यै दिशे स्वाहा॥ उदी
च्यै दिशे स्वाहा॥ र्वाच्यै दिशे स्वाहा॥ ऊर्ध्वायै दिशे स्वाहा॥ र्वा
च्यै दिशे स्वाहा॥ वाच्यै दिशे स्वाहा॥ र्वाच्यै दिशे स्वाहा॥ ७४॥ अद्भ्य
स्वाहा॥ वार्भ्य स्वाहा॥ दकाय स्वाहा॥ तिष्ठंतीभ्यः स्वाहा॥ स्रवंतीभ्यः
स्वाहा॥ स्यंदमानाभ्यः स्वाहा॥ कूप्याभ्यः स्वाहा॥ सूद्याभ्यः स्वा
हा॥ धार्याभ्यः स्वाहा॥ र्णवाय स्वाहा॥ समुद्राय स्वाहा॥ सरिराय स्वा
हा॥ ७५॥ वाताय स्वाहा॥ धूमाय स्वाहा॥ भ्राय स्वाहा॥ मेघाय स्वा
हा॥ विद्योतमानाय स्वाहा॥ स्तनयते स्वाहा॥ अवस्फूर्जते स्वाहा॥ व
र्षते स्वाहा॥ वव र्षते स्वाहा॥ मंव र्षते स्वाहा॥ शीघ्रंव र्षते

॥१६५॥

स्वाहा॥ द्रु[illegible]ते स्वाहा॥ द्रुहीताय स्वाहा॥ प्रुष्णते स्वाहा॥ शीकाय
ते स्वाहा॥ प्रुष्वाभ्यः स्वाहा॥ ह्रादुनीभ्यः स्वाहा॥ नीहाराय स्वाहा॥
॥७६॥ ७७॥ अग्नये स्वाहा॥ सोमाय स्वाहा॥ इंद्राय स्वाहा॥ पृथिव्यै स्वा
हा॥ तरिक्षाय स्वाहा॥ दिवे स्वाहा॥ दिग्भ्य स्वाहा॥ शाभ्यः स्वाहा॥
र्व्यै दिशे स्वाहा॥ र्वाच्यै दिशे स्वाहा॥ ७७॥ नक्षत्रेभ्यः स्वाहा॥
नक्षत्रियेभ्यः स्वाहा॥ होरात्रेभ्यः स्वाहा॥ र्द्धमासेभ्यः स्वाहा॥ मा
सेभ्यः स्वाहा॥ ऋतुभ्यः स्वाहा॥ र्त्तवेभ्यः स्वाहा॥ संवत्सराय स्वा
हा॥ द्यावापृथिवीभ्यां स्वाहा॥ ७८॥ चंद्राय स्वाहा॥ सूर्याय स्वा
हा॥ रश्मिभ्यः स्वाहा॥ वसुभ्यः स्वाहा॥ रुद्रेभ्यः स्वाहा॥ दित्येभ्यः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वाहा॥मरुद्भ्यः स्वाहा॥विश्वेभ्यो देवेभ्यः स्वाहा॥३९॥मूलेभ्यः
स्वाहा॥शाखाभ्यः स्वाहा॥वनस्पतिभ्यः स्वाहा॥पुष्पेभ्यः स्वा
हा॥फलेभ्यः स्वाहा॥ओषधीभ्यः स्वाहा॥४०॥पृथिव्यै स्वाहा॥अंत
रिक्षाय स्वाहा॥दिवे स्वाहा॥सूर्याय स्वाहा॥चंद्राय स्वाहा॥
नक्षत्रेभ्य स्वाहा॥अद्भ्यः स्वाहा॥ओषधीभ्यः स्वाहा॥वनस्पतिभ्य
स्वाहा॥परिप्लवेभ्यः स्वाहा॥चराचरेभ्यः स्वाहा॥सरीसृपे
भ्यः स्वाहा॥४१॥असवे स्वाहा॥वसवे स्वाहा॥विभुवे स्वाहा॥
विवस्वते स्वाहा॥गणश्रिये स्वाहा॥गणपतये स्वाहा॥अभिभु
वे स्वाहा॥अधिपतये स्वाहा॥४२॥शूषाय स्वाहा॥संसर्पा

य स्वाहा॥चंद्राय स्वाहा॥ज्योतिषे स्वाहा॥मलिम्लुचाय स्वाहा॥
दिवापतयते स्वाहा॥४३॥मधवे स्वाहा॥माधवाय स्वाहा॥
शुक्राय स्वाहा॥शुचये स्वाहा॥नभसे स्वाहा॥नभस्याय स्वाहा॥
षाय स्वाहा॥ऊर्जाय स्वाहा॥सहसे स्वाहा॥सहस्याय स्वाहा॥त
पसे स्वाहा॥तपस्याय स्वाहा॥अंहसस्पतये स्वाहा॥४४॥वा
जाय स्वाहा॥प्रसवाय स्वाहा॥पिजाय स्वाहा॥क्रतवे स्वाहा॥स्व
स्वाहा॥मूर्द्ध्ने स्वाहा॥व्यश्नुविने स्वाहा॥आंत्याय स्वाहा॥अंत्याय नाय
नाय स्वाहा॥भौवनाय स्वाहा॥भुवनस्य पतये स्वाहा॥अधिपतये स्वा
हा॥प्रजापतये स्वाहा॥४५॥आयुर्यज्ञेन॥कल्पतां स्वाहा॥प्रा

हा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१६९॥

णाय ज्ञेन कल्पतांꣳ स्वाहापानोय ज्ञेन कल्पतांꣳ स्वाहा व्या
नोय ज्ञेन कल्पतांꣳ स्वाहा॥ उदानोय ज्ञेन कल्पतांꣳ स्वाहा
समानोय ज्ञेन कल्पतांꣳ स्वाहा चक्षुर्यज्ञेन कल्पता
ꣳ स्वाहा श्रोत्रं यज्ञेन कल्पतांꣳ स्वाहा॥ वाग्यज्ञेन कल्पता
ꣳ स्वाहा मनो यज्ञेन कल्पतांꣳ स्वाहात्मा यज्ञेन कल्पता
ꣳ स्वाहा पृष्ठं यज्ञेन कल्पतांꣳ स्वाहा॥ ब्रह्म यज्ञेन कल्पता
ꣳ स्वाहा यज्ञो यज्ञेन कल्पतांꣳ स्वाहा ज्योतिर्यज्ञेन कल्प
तांꣳ स्वाहा स्वर्यज्ञेन कल्पतांꣳ स्वाहा॥३३॥ एकस्मै स्वा
हा। द्वाभ्याꣳ स्वाहा॥ शताय स्वाहैकशताय स्वाहा॥ व्युष्ट्यै

॥१६९॥

स्वाहा स्वर्गाय स्वाहा॥३४॥ छ॥ छ॥ एकविंशत्यनुवाकेषु सप्तच
त्वारिंशत्॥ छ॥ इति शुक्लयजुर्वेदसंहितायां चतुर्विंश
तितमोऽध्यायः॥ छ॥ छ॥ हरिः ॐ॥ हिरण्यगर्भः समवर्त्तता
ग्रे भूतस्य जातः पतिरेक आसीत्॥ स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम॥१॥ उपयामगृहीतोसि प्रजापतये
त्वा जुष्टं गृह्णाम्येष ते योनिः सूर्यस्ते महिमा॥ यस्तेहन्त्संवत्सरे म
हिमा संबभूव यस्ते वायावन्तरिक्षे महिमा संबभूव॥ यस्ते दि
वि सूर्ये महिमा संबभूव तस्मै ते महिम्ने प्रजापतये स्वाहा देवेभ्यः॥
२॥ छ॥ यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१७०॥

वा॥यईशेअस्यद्विपदश्चतुष्पदःकस्मैदेवायहविषाविधेम॥३॥उपयामगृहीतोसिप्रजापतयेत्वाजुष्टंगृह्णाम्येषतेयो
निश्चंद्रमास्तेमहिमा॥यस्तेरात्रौसंवत्सरेमहिमासंबभूव
यस्तेपृथिव्यामग्नौमहिमासंबभूव॥यस्तेनक्षत्रेषुचंद्रमसिमहिमासंबभूवतस्मैतेमहिम्नेप्रजापतयेदेवेभ्यःस्वाहा॥४॥युंजंतिब्रध्नमरुषंचरंतंपरितस्थुषः॥रोचंतेरोचनादिवि॥५॥युंजंत्यस्यकाम्याहरीविपक्षसारथे॥शोणाधृष्णू
नृवाहसा॥६॥यद्वातोअपोअगनीगन्प्रियामिंद्रस्यतन्वं॥एतंस्तोतरनेनपथापुनरश्वमावर्त्तयासिनः॥७॥वसवस्त्वा

॥१७०॥

जंतुगायत्रेणछंदसारुद्रास्त्वांजंतुत्रैष्टुभेनछंदसा॥आदित्यास्त्वांजंतुजागतेनछंदसा॥८॥भूर्भुवःस्वर्लाजीञ्छाचीअन्यव्येगव्ये॥एतदन्नमत्तदेवाएतदन्नमद्धिप्रजापते॥९॥कःस्विदेकाकीचरतिकउस्विज्जायतेपुनः॥किंस्विद्धिमस्यभेषजंकिंस्वावपनंमहत्॥१०॥सूर्यएकाकीचरतिचंद्रमाजायतेपुनः॥अग्निर्हिमस्यभेषजंभूमिरावपनंमहत्॥११॥का
स्विदासीत्पूर्वचित्तिःकिंस्विदासी बृहद्वयः॥कास्वि
दासीत्पिलिप्पिलाका स्विदासीत्पिशंगिला॥१२॥द्यौरा
सीत्पूर्वचित्तिरश्वआसीद्बृहद्वयः॥अविरासीत्पिलिप्पिला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१८१॥

रात्रिरासीत्पिलिप्पिला॥१३॥ वायुष्ट्वा पचतैरवत्वसितग्रीव
श्छागैः॥ न्यग्रोधश्चमसैः शाल्मलिर्वृद्ध्या॥१४॥ एष स्य रा
थ्यो वृषा पड्भिश्चतुर्भिरेदगन्॥ ब्रह्माकृष्णश्च नोवतु न
मोग्नये॥१५॥ सꣳशितो रश्मिना रथः सꣳशितो रश्मिना
हयः॥ सꣳशितो अप्स्वप्सुजा ब्रह्मा सोमपुरोगवः॥१६॥ स्वयं
वाजिꣳस्तन्वं कल्पयस्व स्वयं यजस्व स्वयं जुषस्व॥ महिमा
तेन्येन न सन्नशे॥१७॥ न वा उ एतन्म्रियसे न रिष्यसि दे
वꣳ इदेषि पथिभिः सुगेभिः॥ यत्रासते सुकृतो यत्र ते ययुस्त
त्र त्वा देवः सविता दधातु॥१८॥ अग्निः पशुरासीत्तेनायजन्त

ष ॥१८१॥

श्री॥

स एतं लोकमजयद्यस्मिन्नग्निः॥ स ते लोको भविष्यति तं जेष्य
सि पिबैता अपः॥ वायुः पशुरासीत्तेनायजन्त स एतं लोकमजय
द्यस्मिन्वायुः॥ स ते लोको भविष्यति तं जेष्यसि पिबैता अपः॥
सूर्य्यः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्सूर्यः॥
स ते लोको भविष्यति तं जेष्यसि पिबैता अपः॥१९॥ध्या॥ प्राणा
य स्वाहा॥ पानाय स्वाहा व्यानाय स्वाहा॥ अम्बे अम्बिके अम्बालिके न
मा नयति कश्चन॥ ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनी
म्॥२०॥ गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ
हवामहे॥ निधीनां त्वा निधिपतिꣳ हवामहे वसो मम॥२१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१७८॥

आह। मज्जानि गर्भधमाद्व मज्जास्थि गर्भधमूं॥ तानु मोचतुरः पदः सं
प्रसारयावा॥ स्वर्गे लोके प्राणिनां थांव्ष वाजी रेतोधा रेतो दधातु
॥२२॥ उत्सक्थ्या अवगुदं धेहि समंजिं चारया वृषन्॥ यस्त्रीणां जी
वभोजनः॥२३॥ यकासकौ शकुंतिकाहलगिति वंचति। आहं
तिगभे पसो निगल्गलीति धारका॥२४॥ यकोसकौ शकुंतक
आहलगिति वंचति॥ विवक्षत इव ते मुखमध्वर्यो मान स्त्वम
भिभाषथाः॥२५॥ माता च ते पिता च तेग्रं वृक्षस्य रोहतः॥ प्रति
लामीति ते पिता गभे मुष्टिमतंसयत्॥२६॥ माता च ते पिता
च तेग्रे वृक्षस्य क्रीडतः॥ विवक्षत इव ते मुखं ब्रह्मन्मा त्वं वदो ब

॥१७८॥

हु॥२७॥ ऊर्ध्वमेनामुच्छ्रापय गिरौ भारं हरन्निव॥ अथास्यै
मध्यमेधतां शीते वाते पुनन्निव॥२८॥ ऊर्ध्वमेनामुच्छ्रयतां
गिरौ भारं हरन्निव॥ अथास्य मध्यमेजतु शीते वाते पुने
न्निव॥२९॥ यदस्या अंहुभेद्याः कृधु स्थूलमुपातसत्॥ मुष्का
विदस्या एजतो गोशफे शकुलाविव॥३०॥ यद्देवासो ललामगुं
प्रविष्टीमिनमाविषुः॥ सक्थ्ना देदिश्यते नारी सत्यस्याक्षिभु
वो यथा॥३१॥ यद्धरिणो यवमत्ति न पुष्टं पशु मन्यते॥ शूद्रा य
दर्यजारा न पोषाय धनायति॥३२॥ यद्धरिणो यवमत्ति न पुष्टं
बहु मन्यते॥ शूद्रो यदर्यायै जारो न पोषमनु मन्यते॥३३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१७०२॥

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभिनो
मुखाकरत्प्रणआयूंषितारिषत्॥३२॥ गायत्रीत्रिष्टुब्जग
त्यनुष्टुप्पंक्त्यासह। बृहत्युष्णिहाककुप्सूचीभिःशम्यंतुत्वा
॥३३॥ द्विपदायाश्चतुष्पदास्त्रिपदायाश्चषट्पदाः। विछंदा
याश्चसछंदाःसूचीभिःशम्यंतुत्वा॥३४॥ महानाम्न्योरेव
त्योविश्वाआशाःप्रभूवरीः। मैघी र्विद्युतोवाचःसूची
भिःशम्यंतुत्वा॥३५॥ नार्यस्तेपत्न्योलोमविचिन्वंतुमनी
षया। देवानांपत्न्योदिशःसूचीभिःशम्यंतुत्वा॥३६॥ रज
ताहरिणीःसीसायुजोयुज्यंतेकर्मभिः। अश्वस्यवाजिन

॥१७०३॥

स्त्वचिसिमाःशम्यंतुशम्यंतीः॥३७॥ कुविदंगयवमंतोयवंचि
द्यथादांत्यनुपूर्वंवियूय। इहेहैषांकृणुहिभोजनानियेबर्हि
षोनमउक्तिंनजग्मुः॥३८॥ कस्त्वाछ्यतिकस्त्वा विशास्ति
कस्तेगात्रा णिशम्यति। कउतेशमिताकविः॥३९॥ ऋ
तवस्तऋतुथापर्वशमितारोविशासतु। संवत्सरस्यतेज
साशमीभिःशम्यंतुत्वा॥४०॥ अर्द्धमासाःपरूंषितेमासा
आछ्यंतुशम्यंतः। अहोरात्रा णिमरुतोविलिष्टंसूदयंतु
ते॥४१॥ दैव्याअध्वर्यवस्त्वाछ्यंतुविचशासतु। गात्राणिपर्व
शस्तेसिमाःकृण्वंतुशम्यंतीः॥४२॥ द्यौस्तेपृथिव्यंतरिक्षं

छ्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वायुश्छिद्रंपृणातुते।।सूर्यस्तेनक्षत्रैःसहलोकंकृणोतुसा धु
या।।४४।।शंतेपरेभ्योगात्रेभ्यःशंमस्त्ववरेभ्यः।।शमस्थभ्योम
ज्जभ्यःशम्वस्तुतन्वैतव।।४५।।कस्विदेकाकीचरतिकउस्वि
ज्जायतेपुनः।।किंस्विद्धिमस्यभेषजंकिम्वावपनंमहत्।।४६।।
सूर्यएकाकीचरतिचंद्रमाजायतेपुनः।।अग्निर्हिमस्यभेषजं
भूमिरावपनंमहत्।।४७।।किंस्वित्सूर्यसमंज्योतिः किंस
मुद्रसमंसरः।।किंस्वित्पृथिव्यैवर्षीयःकस्यमात्रानविद्य
ते।।४८।।ब्रह्मसूर्यसमंज्योतिर्द्यौःसमुद्रसमंसरः।।इन्द्रःपृ
थिव्यैवर्षीयान्गोस्तुमात्रानविद्यते।।४९।।पृच्छामित्वाचितेन

येदेवसखयदित्वमत्रमनसाजगंथा।।येषुविष्णुस्त्रिषुपदेष्वे
ष्टस्तेषुविश्वंभुवनमाविवेश।।५०।।अपितेषुत्रिषुपदेष्वस्मि
येषुविश्वंभुवनमाविवेश।।सद्यःपर्येमिपृथिवीमुतद्यामेकेनां
गेनदिवोअस्यपृष्ठं।।५१।।केष्वंतःपुरुषआविवेशकान्यंतःपुरु
षेअर्पितानि।।एतद्ब्रह्मन्नुपवल्हामसित्वाकिंस्विन्नःप्रतिवो
चास्यत्र।।५२।।पंचस्वंतःपुरुषआविवेशतान्यंतःपुरुषेअर्पि
तानि।।एतत्त्वात्रप्रतिमन्वानोअस्मिनमाययाभवस्युत्तरोम
त्।।५३।।कास्विदासीत्पूर्वचित्तिःकिंस्विदासीद्बृहद्वयः।
कास्विदासीत्पिलिप्पिलाकास्विदासीत्पिशंगिला।।५४।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥९७५॥

द्यौरासीत्पूर्वचित्तिरश्व आसीद्बृहद्वयः॥ अविरासीत्पिलिप्पि
लारात्रिरासीत्पिशंगिला॥५४॥ का ईमरे पिशंगिला का ईंकु
रुपिशंगिला॥ क ईमास्कंदमर्षति क ईं पंथां विसर्प्पति॥५५॥
अजारे पिशंगिला श्वावित्कुरुपिशंगिला॥ शश आस्कंदम
र्षत्यहिः पंथां विसर्प्पति॥५६॥ कत्यस्य विष्ठाः कत्यक्षराणि
कति होमासः कतिधा समिद्धः॥ यज्ञस्य त्वा विदथा पृच्छमत्र
कति होतार ऋतुशो यजंति॥५७॥ षडस्य विष्ठाः शतमक्ष
राण्यशीतिर्होमाः समिधो ह तिस्रः॥ यज्ञस्य ते विदथा प्रब्रवी
मि सप्त होतार ऋतुशो यजंति॥५८॥ को अस्य वेद भुवनस्य

॥९७५॥

नाभिं को द्यावापृथिवी अंतरिक्षं॥ कः सूर्यस्य वेद बृहतो जनित्रं
को वेद चंद्रमसं यतोजाः॥५९॥ वेदाहमस्य भुवनस्य नाभिं वेद
द्यावापृथिवी अंतरिक्षं॥ वेद सूर्यस्य बृहतो जनित्रमथो वेद चं
द्रमसं यतोजाः॥६०॥ पृच्छामि त्वा परमंतं पृथिव्याः पृच्छामि यत्र
भुवनस्य नाभिः॥ पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वा
चः परमं व्योम॥६१॥ इयं वेदिः परो अंतः पृथिव्या अयं यज्ञो भुव
नस्य नाभिः॥ अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः प
रमं व्योम॥६२॥ सुभूः स्वयंभूः प्रथमोंतर्महत्यर्णवे॥ दधे ह
गर्भमृत्वियं यतो जातः प्रजापतिः॥६३॥ होता यक्षत्प्रजापति

ॐ सोमस्य महिम्नः ॥ जुषतां पिबतु सोमं ॐ होतर्यज ॥६४॥ प्रजा
पते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ॥ यत्कामास्ते
जुहुमस्तन्नो अस्तु वयं ॐ स्याम पतयो रयीणाम् ॥६५॥ ६६॥ ६७॥
एवं द[illegible]शानुवाकेषु सप्तषष्टिः ॥६७॥ इति शुक्लयजुर्वेदसंहितायां
पंचविंशतितमोध्यायः ॥२५॥ हरिः ॐ ॥ अश्वस्तूपरो गो
मृगस्ते प्राजापत्याः कृष्ण[illegible]ग्रीव आग्नेयो रराटे ॥ पुरस्ता
त्सारस्वती मेष्यधस्ताद्धन्वोः ॥१॥ आश्विनावधोरामौ बा
ह्वोः सोमापौष्णः श्यामो नाभ्यां ॐ सौर्ययामौ ॥ श्वेतश्च कृष्णश्च
पार्श्वयोः ॥२॥ त्वाष्ट्रौ लोमशसक्थौ सक्थ्योर्वायव्यः श्वेतः

पुच्छ इंद्राय स्वपस्याय [illegible] वेहद्वैष्णवो वामनः ॥ रोहितो धूम्ररोहितः क
र्कंधुरोहितस्ते सौम्या बभ्रुररुणबभ्रुः शुकबभ्रुस्ते वारुणाः ॥३॥
शितिरंध्रोन्यतः शितिरंध्रः ॥ समंतशितिरंध्रस्ते सावित्राः शितिबा
हुरन्यतः शितिबाहुः समंतशितिबाहुस्ते बार्हस्पत्याः ॥ पृषती क्षुद्र
पृषती स्थूलपृषती ता मैत्रावरुण्यः ॥४॥ शुद्धवालः सर्वशुद्धवालो
मणिवालस्त आश्विनाः ॥ श्येतः श्येताक्षोरुणस्ते रुद्राय पशुपत
ये कर्णा यामाः ॥५॥ अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः ॥
पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः ॥ फल्गूर्लोहि
तोर्णी पलक्षी ताः सारस्वत्यः ॥ प्लीहाकर्णः शुंठाकर्णोध्यालोहकर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्ण्यस्ते त्वाष्ट्राः ॥७॥ धूम्रललामीवः शितिकक्षौ। जिवस्थस्त ऐंद्राग्नाः।
कृष्णांजि रल्पांजिर्महांजिस्त उषस्याः ॥८॥ शिल्पा वैश्वदेव्यो
रोहिण्यस्त्र्यवयो वाचे विज्ञाता अदित्यै। सरूपा धात्रे वत्सतर्यो दे
वानां पत्नीभ्यः ॥९॥ धूम्रललामी वाग्नेय्या। शितिभ्रवौ ■ वसू
नां रोहितो रुद्राणां। श्वेता अवरोकिण आदित्यानां नभोरूपाः
पार्जन्याः ॥१०॥ उन्नत ऋषभो वामनस्त ऐंद्रावैष्णवा उन्नतः शि
तिबाहुः शितिपृष्ठस्त ऐंद्राबार्हस्पत्याः। शुकरूपा वाजिनाः क
ल्माषा आग्निमारुताः श्यामाः पौष्णाः ॥११॥ एतास्त ऐंद्राग्नाः द्विरू
पा अग्नीषोमीया वामना अनड्वाह आग्नावैष्णवाः। वशा मैत्रा

वरुण्यो न्यलरुण्यो मैत्र्यः ॥१२॥ धूम्रललामीवाग्नेय्या। बभ्रवस्सो
म्याः श्वेता वायव्या अविज्ञाता अदित्यै। सरू■पा धात्रे वत्सतर्यो दे
वानां पत्नीभ्यः ॥१३॥ कृष्णा भौमाः धूम्रा आंतरिक्षा बृहंतो दि
व्याः ॥ शबला वैद्युतास्सिध्मास्तारकाः ॥१४॥ धूम्रान्वसंताया
लभते श्वेतान्ग्रीष्माय कृष्णान्वर्षाभ्योरुणान् ■ शरदे। पृषतो हे
मंताय पिशंगां छिछिराय ॥१५॥ त्र्यवयो गायत्र्यै। पंचावयस्त्रि
ष्टुभे दित्यवाहो जगत्यै। त्रिवत्सा अनुष्टुभे तुर्यवाह उष्णिहे ॥१६॥
पष्ठवाहो विराजा उक्षाणो बृहत्या ऋषभाः ककुभे। अनड्वाहः
पंक्त्यै धेनवो तिछंदसे ॥१७॥ धूम्रललामीवाग्नेय्या बभ्रवः सौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म्याऽउपध्वस्तास्सावित्रा वत्सतर्यस्सारस्वत्यः श्यामाः पौष्णाः॥
पृश्नयो मारुता बहुरूपा वैश्वदेवा वशा द्यावापृथिवीयाः॥
॥१८॥ उक्तास्संचराऽएताऽऐन्द्राग्नाः॥ कृष्णा वारुणाः पृश्नयो मा
रुताः कायास्तूपराः॥१९॥ अग्नयेनीकवते प्रथमजानालभते
मरुद्भ्यः सान्तपनेभ्यस्सवात्यान्मरुद्भ्यो गृहमेधिभ्यो बष्किहान्॥
मरुद्भ्यः क्रीडिभ्यः सꣳसृष्टान्मरुद्भ्यः स्वतवद्भ्योनुसृष्टान्॥
॥२०॥ छ॥ ॥उक्ताः संचराऽएताऽऐन्द्राग्नाः॥ प्राशृङ्गा माहेन्द्रा बहुरू
पा वैश्वकर्मणाः॥२१॥ धूम्रा बभ्रुनीकाशाः पितॄणाꣳ सोम
वतां बभ्रवो धूम्रनीकाशाः पितॄणां बर्हिषदाम्॥ कृष्णा बभ्रु

॥१७८॥

नीकाशाः पितॄणामग्निष्वात्तानां कृष्णाः पृषन्तस्त्रैयम्बकाः
॥२२॥ उक्ताः संचराऽएताः शुनासीरीयाः॥ श्वेता वायव्याः श्वे
ताः सौर्याः॥२३॥ वसन्ताय कपिञ्जलानालभते ग्रीष्माय क
लविङ्कान्वर्षाभ्यस्तित्तिरीञ्छरदे वर्त्तिकाः॥ हेमन्ताय ककरां
छिशिराय विककरान्॥२४॥ समुद्राय शिशुमारानाल
भते पर्ज्जन्याय मण्डूकानद्भ्यो मत्स्यान्॥ मित्राय कुलीप
यान्वरुणाय नाक्रान्॥२५॥ सोमाय हꣳसानालभते वा
यवे बलाकाऽइन्द्राग्निभ्यां क्रुञ्चान्॥ मित्राय मद्गून्वरुणाय
चक्रवाकान्॥२६॥ अग्नये कुटरूनालभते वनस्प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिभ्यउलूकानग्नीषोमाभ्यांचाषानश्विभ्यांमयूरान्मित्राव
रुणाभ्यांकपोतान्॥२७॥सोमायलबानालभतेत्वष्ट्रेकौ
लीकान्गोषादीर्देवानांपत्नीभ्यः॥कुलीकादेवजामिभ्योग्न
येगृहपतयेपारुष्णान्॥२८॥अह्नेपारावतानालभतेरात्र्यै
सीचापूरहोरात्रयोःसंधिभ्योजतूः॥मासेभ्योदात्यौहान्संव
त्सरायमहतःसुपर्णान्॥२९॥भूम्याआखूनालभतेंतरिक्षा
यपाङ्क्त्रान्दिवेकशान्॥दिग्भ्योनकुलान्बभ्रुकानवांतर
दिशाभ्यः॥३०॥वसुभ्यऋश्यानालभतेरुद्रेभ्योरुरू
नादित्येभ्योन्यंकून्॥विश्वेभ्योदेवेभ्यःपृषतान्साध्येभ्यः

॥१८०१॥

कुलुंगान्॥३१॥ईशानायपरस्वतआलभतेमित्रायगौरान्व
रुणायमहिषान्॥बृहस्पतयेगवयांस्त्वष्ट्रउष्ट्रान्॥३२॥
प्रजापतयेपुरुषान्॥हस्तिनआलभतेवाचेप्लुषीन्॥चक्षुषे
मशकान्छ्रोत्रायभृंगाः॥३३॥प्रजापतयेचवायवेचगोमृगोव
रुणायारण्योमेषोयमायकृष्णोमनुष्यराजायमर्कटः॥शा
र्दूलायरोहिदृषभायगवयीक्षिप्रश्येनायवर्तिकानीलंगोः
क्रिमिःसमुद्रायशिशुमारोहिमवतेहस्ती॥३४॥मयुःप्राजाप
त्यउलोहलिक्ष्णोवृषदंशस्तेधात्रेदिशांकंकोधुंक्षाग्नेयी
कलविंकोलोहिताहिःपुष्करसादस्तेत्वाष्ट्रावाचेक्रुंचः॥३५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१९८॥

सोमाय कुलुंगः । आरण्योऽजो नकुलः । शकास्ते पौष्णाः क्रो
ष्टा मायोरिंद्रस्य गौरमृगः ॥ पिद्गोन्यंकुः ककुटस्तेनुमत्यै प्र
तिश्रुत्कायै चक्रवाकः ॥ ३६ ॥ सौरी बलाका ॥ शार्गः सृजयः शया
ण्डकस्ते मैत्राः सरस्वत्यै शारिः पुरुषवाक्श्वाविद्भौमी ॥
शार्दूलो वृकः पृदाकुस्ते मन्यवे सरस्वते शुकः पुरुषवाक् ॥
॥ ३७ ॥ सुपर्णः पार्जन्य आतिर्वाहसो दर्विदा ते वायवे बृह
स्पतये वाचस्पतये पैंगराजो लज अंतरिक्षः ॥ प्लवो मद्गु
मत्स्यास्ते नदीपतये द्यावापृथिवीयः कूर्मः ॥ ३८ ॥ पुरुषमृ

॥१९८॥

गश्चंद्रमसो । गोधा कालका दार्वाघाटस्ते वनस्पतीनां कृक
वाकुः सावित्रो हंसो वातस्य ॥ नाक्रो मकरः कुलीपयस्ते कू
पारस्य ह्रियै शल्यकः ॥ ३९ ॥ ऐण्यह्नो मंडूको मूषिका तित्ति
रिस्ते सर्पाणां लोपाश आश्विनः कृष्णो रात्र्यै ॥ ऋक्षो जतूः सु
षिलीका तइतरजनानां जहका वैष्णवी ॥ ४० ॥ अन्यवापोऽर्द्धमा
सानां । ऋश्यो मयूरः सुपर्णस्ते गंधर्वाणामपामुद्रो मासां क
श्यपः ॥ रोहित्कुंडृणाची गोलत्तिका ते प्सरसां मृत्यवेऽसितः ॥
॥ ४१ ॥ वर्षाहूरृतूनामाखुः कशो मान्थालस्ते पितृणां बला
याजगरो वसूनां कपिंजलः ॥ कपोत उलूकः शशस्ते निरृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१८०॥

त्येवरस्यणायारण्यो मेषः ॥३७॥ श्वित्र आदित्यानामुष्ट्रो घृणीवान्वार्ध्रीनसस्ते मत्या अरण्याय सृमरो रुरू रौद्रः ॥ क्वयिः कुटरुर्दात्यौहस्ते वाजिनां कामाय पिकः ॥३८॥ खङ्गो वैश्वदेवः श्वा कृष्णः कर्णो गर्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकरः ॥ सिंहो मारुतः कृकलासः पिप्पका शकुनिस्ते शरव्यायै विश्वेषां देवानां पृषतः ॥४०॥ ४॥ ४॥ अष्टानुवाकेषु चतुश्चत्वारिंशत् ॥ ४॥ ४॥ इति शुक्लयजुर्वेदसंहितायां षड्विंशतिमोध्यायः ॥२४॥ हरिः ॐ ॥ शादं दद्भिरवकां दंतमूलैर्मृदं बर्स्वैस्तेगां दंष्ट्राभ्यां स

रस्वत्या अग्रजिह्वं जिह्वाया उत्सादमवक्रंदेन तालु वाजं हनुभ्यामप आस्येन वृषणमांडाभ्याम् ॥१॥ आदित्याँ श्मश्रुभिः पंथानं भ्रूभ्यां द्यावापृथिवी वर्त्तोभ्यां विद्युतं कनीनकाभ्यां शु क्लाय स्वाहा कृष्णाय स्वाहा पार्याणि पक्ष्माण्यवार्या इक्षवो वार्याणि पक्ष्माणि पार्या इक्षवः ॥१॥ वातं प्राणेनापानेन नासिके उपयाममधरेणौष्ठेन सदुत्तरेण ॥ प्रकाशेनांतरमनूकाशेन बाह्यं निवेष्यं मूर्ध्ना स्तनयित्नुं निर्बाधेनाशनिं मस्तिष्केण विद्युतं कनीनकाभ्यां ॥ कर्णाभ्यां श्रोत्रं श्रोत्राभ्यां कर्णौ तेदनीमधरकंठेना

॥१८०॥

॥१८२॥

पः शुष्ककंठेन चित्तं मन्याभिः ॥ अदितिं शीर्ष्णा निर्ऋतिं
निर्जर्जल्पेन शीर्ष्णा संक्रोशैः प्राणान् रेष्माणं स्तुपेन ॥
॥२॥ मशकान्केशैरिंद्रं स्वपसा वहेन बृहस्पतिं श
कुनिसादेन कूर्मान् ॥ शफैराक्रमणं स्थूराभ्यामृक्षला
भिः कपिंजलान् ॥ ॥४॥ जवं जंघाभ्यामध्वानं बाहुभ्यां जां
बीलेनारण्यमग्निमतिरुग्भ्यां ॥ पूषणं दोर्भ्यामश्विनावं
सा भ्यां रुद्रं रोराभ्याम् ॥ ॥५॥ अग्नेः पक्षतिर्वायोर्नि
पक्षतिरिंद्रस्य तृतीया पां चतुर्थ्य ॥ अदित्यै पंचमींद्राण्यै

॥१८२॥

षष्ठी मरुतां सप्तमी बृहस्पतेरष्टमी ॥ अर्यम्णो नवमी धा
तुर्दशमींद्रस्यैकादशी वरुणस्य द्वादशी यमस्य त्रयोदशी
॥६॥ इंद्राग्न्योः पक्ष[illegible]तिः । सरस्वत्यै निपक्षतिर्मित्रस्य तृ
तीया सोमस्य चतुर्थी ॥ निर्ऋत्यै पंचम्यग्नीषोमयोः षष्ठी स
र्पाणां सप्तमी विष्णोरष्टमी ॥ पूष्णो नवमी त्वष्टुर्दशमीं
द्रस्यैकादशी वरुणस्य द्वादशी य[illegible]म्यै त्रयोदशी ॥ द्यावा
पृथिव्योर्दक्षिणं पार्श्वं विश्वेषां देवानामुत्तरम् ॥ ॥८॥ म
रुतां स्कंधा विश्वेषां देवानां प्रथमा कीकसा रुद्राणां द्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible]

तीयादित्यानां तृतीयावायोः पुछमानीषोमयोर्भासदो॥
कुंचो श्रोणिभ्यामिंद्राबृहस्पतीऊरुभ्यां मित्रावरुणावलगा
भ्यामाक्रमणं स्थूराभ्यां बलं कुष्ठाभ्याम्॥१०॥पूषणं व
निष्ठुनांधाहीन्स्थूलगुदयासर्पान्गुदाभिर्विहुतमांत्रैर
पोवस्तिनावृषणमांडाभ्याम्॥वाजिनं शेपेन प्रजां
रेतसा चाषान्पित्तेन प्रदरान्पायुनाकूश्मां छकपिंडैः॥१०॥
इंद्रस्य क्रोडो दित्यै पाजस्यं दिशां जत्रवो दित्यै भसत्॥
जीमूतान्हृदयौपशेनांतरिक्षं पुरीतता॥११॥नभउदर

[illegible]

र्येण चक्रवाकौ मतस्नाभ्यां दिवं वृक्काभ्यां गिरीन्प्लाशि
भिः॥उपलान्प्लीह्ना वल्मीकान्क्लोमभिर्ग्लौभिर्गुल्मा
न्हिराभिस्रवंतीः॥हृदान्कुक्षिभ्यां समुद्रमुदरेण
वैश्वानरं भस्मना॥१२॥विधृतिं नाभ्या घृतं रसे
नापो यूष्णा मरीचीर्विप्रुड्भिर्नीहारमूष्मणा शीनं वस
या प्रुष्वा अश्रुभिः॥ह्रादुनीर्दूषीकाभिरस्नारः
क्षांसि चित्राण्यंगैर्नक्षत्राणि रूपेण पृथिवीं त्व
चा जुंबकाय स्वाहा॥१३॥हिरण्यगर्भः सम्वर्त्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१८४॥

ताग्रे भूतस्य जातः पतिरेकआसीत॥ सदाधार पृथिवीं
द्यामुतेमांकस्मै देवाय हविषाविधेम॥१०॥ यः प्राणतो
निमिषतोमहि[illegible]त्वैक इद्राजाजगतो बभूव॥ यईशेअ
स्यद्विपदश्चतुष्पदः कस्मै देवाय हविषाविधेम॥१५॥
यस्येमे हिमवंतोमहित्वायस्य समुद्रंरसयासहाहुः॥
यस्येमाः प्रदिशोयस्य बाहू कस्मै देवाय हविषाविधे
म॥१६॥ यआत्मदाबलदा यस्य विश्वउपासते प्रशिषंय
स्यदेवाः॥ यस्य छायामृतं यस्यमृत्युः कस्मै देवायह

विषाविधेम॥१७॥ आनोभद्राः क्रतवोयंतु विश्वतोदब्धा
सोअपरीतासउद्भिदः॥ देवानोयथासदमिद्वृधेअसन्न
प्रायुवोरक्षितारोदिवेदिवे॥१८॥ देवानां भद्रासुम
तिर्ऋजूयतांदेवानां रातिरभिनो निवर्त्तताम॥ दे
वानां सख्यमुपसेदिमावयंदेवानआयुः प्रतिरंतु
जीवसे॥१९॥ तान्पूर्व्वयानिविदाहू[illegible]महे वयंभगंमि
त्रमदितिं दक्षमस्रिधम॥ अर्यमणंवरुणं सोम
मश्विनासरस्वतीनः सुभगा[illegible]मयस्करत॥२०॥ त

॥१८४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।।१८५।।

न्नो। वातो मयोभुवातु भेषजं तन्माता पृथिवी तत्पिता द्यौः।। तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवं।।२०।। तमीशानं। जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे वयं।। पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये।।२१।। स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।।२२।। पृषदश्वा मरुतः। पृश्निमातरः शुभं

।।१८५।।

यावानो विदथेषु जग्मयः।। अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह।।२३।। भद्रं कर्णेभिः। शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।। स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः।।२४।। शतमिन्नु। शरदो अंति देवा यत्रा नश्चक्रा जरसं तनूनां।। पुत्रासो यत्र पितरो भवंति मा नो मध्या रीरिषतायुर्गंतोः।।२५।। अदितिर्द्यौ। रदितिरंतरिक्षमदितिर्माता स पिता स पुत्रः।। विश्वे देवा अदितिः पंचजना अदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति र्जातमदिति र्जनित्वं ॥२७॥ मानो मित्रो वरुणो अर्यमा
युरिंद्र ऋभुक्षा मरुतः परि ख्यन् ॥ यद्वाजिनो देवजात
स्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥२८॥ यन्निर्णिजा
रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयंति ॥ सुप्रा
ङजो मेम्यद्विश्वरूप इंद्रापूष्णोः प्रियमप्येति पाथः ॥२९॥ य
एष छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्व
देव्यः ॥ अभिप्रियं यत्पुरोळाशमर्वता त्वष्टेदेनं सौश्रव
साय जिन्वति ॥३०॥ यद्धविष्यमृतुशो देवयानं त्रि

॥१८९॥

र्मानुषाः पर्यश्वं नयंति ॥ अत्रा पूष्णः प्रथमो भाग एति यज्ञं
देवेभ्यः प्रतिवेदयन्नजः ॥३१॥ होताध्वर्युरावया अग्निमिं ध्व
धो ग्रावग्राभ उत शंस्ता सुविप्रः ॥ तेन यज्ञेन स्वरंकृ
तेन स्विष्टेन वक्षणा आ पृणध्वं ॥३२॥ यूपव्रस्का उत ये
यूपवाहाश्चषालं ये अश्वयूपाय तक्षति ॥ ये चार्वते पचनं
संभरंत्युतो तेषामभिगूर्तिर्न इन्वतु ॥३३॥ उप प्रागात् ॥ प
सुमन्मे धायि मन्म देवानामाशा उप वीतपृष्ठः ॥ अन्वेनं
विप्रा ऋषयो मदंति देवानां पुष्टे चकृमा सुबंधुं ॥३४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१८०॥

यद्वाजिनो।दामसंदानमर्वतोयाशीर्षण्यारशनारज्जु
रस्य।।यद्वाघास्यप्र[illegible]भृतमास्ये[illegible]तृणं।।सर्वाताते
अपिदेवेष्वस्तु।।३५।।यदश्वस्याक्रविषोमक्षिकाशयद्वा
स्वरौस्वधितौरिप्तमस्ति।।यद्धस्तयोःशमितुर्यन्नखेषु
सर्वातातेअपिदेवेष्वस्तु।।३६।।यदूवध्यमुदरस्यापवा
तियआमस्यक्रविषोगंधोअस्ति।।सुकृतातच्छमितारः
कृण्वंतूतमेधंशृतपाकंपचंतु।।३७।।यत्तेगात्रादग्नि
नापच्यमानादभिशूलंनिहतस्यावधावति।।मातद्भूम्या

॥१८७॥

५

माश्रिषन्मात्लैर्देवेभ्यस्तदुशद्भ्योरातमस्तु।।३८।।येवाजि
नंपरिपश्यंतिपक्वंयईमाहुःसुरभिर्निर्हरेति।।ये[illegible]चा
र्वतोमांसभिक्षामुपासततेतोतेषामभिगूर्तिर्नइन्वतु
।।३९।।यन्नीक्षणंमांस्पचन्याउखायायापात्राणियू
[illegible]ष्णआसेचनानि।।ऊष्मण्यापिधानाचरूणामंकाः
सूनाःपरिभूषंत्यश्वम्।।४०।।मात्वाग्निर्ध्वनयीद्धूमगं[illegible]
धिर्मोखाभ्राजंत्यभिविक्तजघ्रिः।।इष्टंवीतमभिगूर्तंव
षट्कृतंतंदेवासःप्रतिगृभ्णंत्यश्वं।।४१।।निक्रमणंनिष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दनं। विचर्षणिं यच्च पड्बीशमर्वतः॥ यच्च पपौ यच्च घासिं जघा
स सर्वा ता ते अपि देवेष्वस्तु॥४२॥ यदश्वाय वास उपस्तृणं
त्यधीवासं या हिरण्यान्यस्मै॥ संदानमर्वन्तं पड्बीशं प्रिया
देवेष्वा यामयंति॥४३॥ इमानुकं भुवना सीषधामेंद्रश्च
विश्वेच देवाः॥ आदित्यैरिंद्रः सगणो मरुद्भिरस्मभ्यं भे
षजा करत्॥ यज्ञं च नस्तन्वं च प्रजां चादित्यैरिंद्रः सह सी
षधाति॥४४॥ अग्ने त्वन्नो अंतम उत त्राता शिवो भवा वरू
थ्यः॥ वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः॥

॥१८४॥

तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः॥४७॥
॥६॥६॥ षो उशानुवाके षु षट्चत्वारिंशतः॥६॥ इति शुक्लय
जुर्वेद संहितायां सप्तविंशतितमोध्यायः॥६ ॥ हरिः ॐ ॥
अग्निश्च पृथिवी च सन्नते ते मे सन्न मतामदो वा
युश्चांतरिक्षं च सन्नते ते मे सन्नमतामद आदित्यश्च द्यौ
श्च सन्नते ते मे सन्नमतामद आपश्च वरुणश्च सन्नते
ते मे सन्नमतामदः॥ सप्त संसदो अष्टमी भूतसाधनी
॥१॥ सकामं अध्वनः स्कुरु संज्ञानमस्तु मे मुना॥ यथे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मां वाचं कल्याणीमावदानि जनेभ्यः ॥२॥ ब्रह्मराजन्या
भ्यां शूद्राय चार्याय च स्वाय चारणाय च ॥ प्रियो देवानां
दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यतामुप
मादो नमतु ॥३॥ बृहस्पते अति यदर्यो अर्हाद्युमद्विभाति
क्रतुमज्जनेषु ॥ यद्दीदयच्छवस ऋतप्रजात तदस्मासु
द्रविणं धेहि चित्रम् ॥ उपयामगृहीतोसि बृहस्पतये
त्वैष ते योनिर्बृहस्पतये त्वा ॥४॥ इंद्र गोमन्निहा याहि
पिबा सोमं शतक्रतो ॥ विद्यद्भिर्ग्रावभिः सुतम् ॥ उपया

॥१८९॥

श्री

मगृहीतोसींद्राय त्वा गोमत एष ते योनिरिंद्राय त्वा गोम
ते ॥५॥ ऋतावानं वैश्वानरं ऋतस्य ज्योतिषस्पतिम् ॥
अजस्रं घर्ममीमहे ॥ उपयामगृहीतोसि वैश्वानराय त्वैष
ते योनिर्वैश्वानराय त्वा ॥६॥ वैश्वानरं हवामह ऋतस्य
ज्योतिषस्पतिं ॥ अजस्रं घर्ममीमहे ॥ उप[illegible] मगृहीतोसि
वैश्वानराय त्वैष ते योनिर्वैश्वानराय [illegible] ॥ वैश्वानरो
न ऊतय आ प्रयातु परावतः ॥ अग्नि[illegible]न वाहसा ॥ उ
पयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय

त्वा॥८॥ वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनाना
मभिश्रीः॥ इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते
सूर्येण॥ उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वै
श्वानराय त्वा॥९॥ मरु[illegible]त्वं रिंद्र वृषभो रणाय पि
बा सोममनुष्वधं मदाय॥ आसिंचस्व जठरे मध्व ऊर्मिं
त्वं राजासि प्रतिपत्सुतानां॥ उपयामगृहीतोसींद्राय
त्वा मरु[illegible]त्वत एष ते योनिरिंद्राय त्वा मरुत्वते॥१०॥ महं
इंद्रो वज्रहस्तः षोडशी शर्म यच्छतु॥ हंतु पा[illegible]प्मानं यो

॥१९०॥

स्मान्द्वेष्टि॥ उपयामगृहीतोसि महेंद्राय त्वा षोडशिन एष ते योनि
रिंद्राय त्वा षोडशिने॥११॥ अग्निर्ऋषिः पवमानः पांच
जन्यः पुरोहितः॥ तमीमहे महागयम्॥१२॥ अनु वीरैरनु
पुष्यास्म गोभिरन्वश्वैरनु सर्वेण पुष्टैः॥ [illegible] अनु द्विपदा
नु चतुष्पदा वयं देवा नो यज्ञमृतुथा नयंतु॥१३॥ आ नो
मित्राददहि गोपते मास्स मस्मभ्यं सनयो यंतु वाजाः॥
दिवक्षा असि वृषभ सत्यशुष्मोस्मभ्यं सुमघवन्[illegible] बो
धि गोदाः॥१४॥ छ॥ छ॥ एकादशानुवाके षुदशाचत्वारिः॥५४॥

॥१२७॥

इति शुक्लयजुर्वेद संहितायां अष्टाविंशतिमोध्यायः ॥२८॥ हरिः
ॐ समास्त्वाग्न ऋतवो वर्द्धयंतु संवत्सरा ऋषयो या
नि सत्या ॥ सं दिव्येन दीदिहि रोचनेन विश्वा आभाहि प्र
दिशश्चतस्रः ॥१॥ सं चेध्यस्वाग्ने प्र च बोधयैनमुच्चतिष्ठ
महते सौभगाय ॥ मा च रिषदुपसत्ता ते अग्ने ब्रह्माण
स्ते यशसः संतु मान्ये ॥२॥ त्वामग्ने वृणते ब्राह्मणा इ
मे शिवो अग्ने संवरणे भवा नः ॥ सपत्नहा नो अभिमा
तिजि च स्वे गये जागृह्यप्रयुछन् ॥३॥ इहैवाग्ने अ

॥१२७॥

धिधारया रयिं मा त्वा निक्रन्पूर्वचित्तो निकारिणः ॥
क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्द्धतां ते अनिष्टृ
तः ॥४॥ क्षत्रेणाग्ने स्वायुः सꣳरभस्व मित्रेणाग्ने मि
त्रधेये यतस्व ॥ सजातानां मध्यमस्था एधि राज्ञामग्ने
विहव्यो दीदिहीह ॥५॥ अति निहो अति स्रिधोत्यचि
त्तिमत्यरातिमग्ने ॥ विश्वा ह्यग्ने दुरिता सहस्वाथा
स्मभ्यꣳ सहवीरꣳ रयिं दाः ॥६॥ अनाधृष्यो जातवे
दा अनिष्टृतो विराडग्ने क्षत्रभृद्दीदिहीह ॥ विश्वा आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥११२॥

ष्टाः प्रमुंचन्मानुषीर्भियः शिवाभिरद्य परि पाहि नो वृधे ॥७॥ बृहस्पते सविता बोधयैनं संशितं चित्संतरां संशिशाधि । वर्द्धयैनं महते सौभगाय विश्वएनमनु मदंतु देवाः ॥८॥ अमुत्र भूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुंचः । प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः ॥९॥ उद्वयं तमसस्परि स्वः पश्यंत उत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ ॥१०॥ ऊर्ध्वा अस्य समिधो भवंत्यूर्ध्वा शुक्रा शोचींष्य

॥११२॥

ग्नेः । द्युमत्तमा सुप्रतीकस्य सूनोः ॥११॥ तनूनपादसुरो विश्ववेदा देवो देवेषु देवः । पथो अनक्तु मध्वा घृतेन ॥१२॥ मध्वा यज्ञं नक्षसे प्रीणानो नराशंसो अग्ने । सुकृद्देवः सविता विश्ववारः ॥१३॥ अच्छायमेति शवसा घृतेनेडानो वह्निर्नमसा । अग्निं स्रुचो अध्वरेषु प्रयत्सु ॥१४॥ स यक्षदस्य महिमानमग्नेः स ईं मंद्रा सुप्रयसः । वसुश्चेतिष्ठो वसुधातमश्च ॥१५॥ द्वारो देवीरन्वस्य विश्वे व्रतादंते अग्नेः । उरुव्यचसो धाम्ना पत्यमानाः ॥१६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१९३॥

तेअ्रस्य।योषणेदिव्येनयोनाउषासानक्ता॥इमंयज्ञमव
तामध्वरन्नः॥१७॥दैव्याहोतारा॥ऊर्ध्वमध्वरन्नोऽग्ने
र्जिह्वामभिगृणीतम्॥कृणुतन्नःस्विष्टिम्॥१८॥ति
स्रोदेवीर्बर्हिरेदᳫंसदन्त्विडासरस्वतीभारती॥मही
गृणाना॥१९॥तन्नस्तुरीपमद्भुतंपुरुक्षुत्वष्टासुवी
रम्॥रायस्पोषंविष्यतुनाभिमस्मे॥२०॥वनस्पतेव
सृजारराणस्त्मनादेवेषु॥अग्निर्हव्यᳫंशमितासू
दयाति॥२१॥अग्नेस्वाहाकृणुहिजातवेदइन्द्रायह

॥१९३॥

व्यम्॥विश्वेदेवाहविरिदंजुषन्ताम्॥२२॥छ॥पीवोअ्र
न्नारयिवृधःसुमेधाश्वेतःसिषक्तिनियुतामभिश्रीः॥
तेवायवेसमनसोवितस्थुर्विश्वेन्नरःस्वपत्यानिचक्रुः॥
॥२३॥रायेनुयंजज्ञतूरोदसीमेरायेदेवीधिषणाधाति
देवम्॥अधवायुंनियुतःसश्चतस्वाउतश्वेतंवसुधि
तिंनिरेके॥२४॥वायुरग्रेगा॥यज्ञप्रीःसाकंगन्मन
सायज्ञम्॥शिवोनियुद्भिःशिवाभिः॥२५॥प्रयाभि
र्यासिदाश्वाᳫंसमच्छानियुद्भिर्वायविष्टयेदुरोणे॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रि नो रयिꣳ सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः
॥२६॥ वायो ये ते सहस्रिणो रथासस्तेभिरा गहि । नि
युत्वान्त्सोमपीतये ॥२७॥ एकया च दशभिश्च स्वभूते द्वा
भ्यामिष्टये विꣳशती च । तिसृभिश्च वहसे त्रिꣳशता च
नियुद्भिर्वायविह ता वि मुञ्च ॥२८॥ नियुत्वान्वायवा गह्य
यꣳ शुक्रो अयामि ते । गन्तासि सुन्वतो गृहम् ॥२९॥ वा
यो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु । आ याहि सो
मपीतये स्पार्हो देव नियुत्वता ॥३०॥ आ नो नियुद्भिः श

तिनीभिरध्वरꣳ सहस्रिणीभिरुप याहि यज्ञम् । वायो
अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥३१॥
तव वायवृतस्पते त्वष्टुर्जामातरद्भुत । अवाꣳस्या वृणी
महे ॥३२॥ हिरण्यगर्भ इत्येषः । येन द्यौरुग्रा पृथिवी च दृ
ढा येन स्वः स्तभितं येन नाकः । यो अन्तरिक्षे रजसो विमा
नः कस्मै देवाय हविषा विधेम ॥३३॥ यं क्रन्दसी अवसा त
स्तभाने अभ्यैक्षेतां मनसा रेजमाने । यत्राधि सूर उदि
तो विभाति कस्मै देवाय हविषा विधेम ॥३४॥ आपो ह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१९५॥

यद्बृहतीर्विश्वमायं न्गार्भं दधाना ॰ जनयंतीरग्निं॥ ततो
देवानां समवर्ततासुरेकः॥ कस्मै देवाय हविषा विधेम
॥१५॥ यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयं
तीर्यज्ञम॥ यो देवेष्वधि देव एक आसीत् कस्मै देवाय हवि
षा विधेम॥ मा नो हिंसीज्जनिता यः पृथिव्या यो वा दि
वं सत्यधर्मा जजाना॥ यश्चापश्चंद्रा बृहतीर्जजान
कस्मै देवाय हविषा विधेम॥ प्रजापते न त्वदेतान्यन्यो
विश्वा जातानि परि ता बभूव॥ यत्कामास्ते जुहुमस्तन्नो अ

॥१९५॥

स्तु वयं स्याम पतयो रयीणाम्॥१६॥ अग्न आयूंषि
पवस आ सुवोर्जमिषं च नः॥ आरे बाधस्व दुच्छुनां॥१७॥ अ
ग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम्॥ दधद्रयिं मयि पोष
म्॥१८॥ अग्निर्ऋषिः पवमानः पांचजन्यः पुरोहितः॥ तमी
महे महागयम्॥१९॥ अ॰भि त्वा शूर नोनुमो दुग्धा इव धे
नवः॥ ईशानमस्य जगतः स्वर्दृशमीशानमिंद्र तस्थुषः॥
॥२०॥ न त्वावं अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते॥
अश्वायंतो मघवन्निंद्र वाजिनो गव्यंतस्त्वा हवामहे॥२१॥ त्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मि॥द्धि हवामहे सातौ वाजस्य कारवः॥ त्वां वृत्रेष्विंद्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः॥३७॥ सत्वंनश्चित्रवज्रह स्तधृष्णुया महस्तवानो अद्रिवः॥ गामश्वꣳ रथ्यमिंद्रसं किरसत्रा वाजं नजिग्युषे॥३८॥ कयानश्चित्र आभुव दूती सदावृधः सखा॥ कयाशचिष्ठयावृता॥३९॥ क स्त्वासत्यो मदानां मꣳहिष्ठो मत्सदंधसः॥ दृढ्हा चिदारु जे वसु॥४०॥ अभीषुणः सखीनामविताजरितॄणां॥ शतं भवास्यूतये॥४१॥ यज्ञायज्ञावो अग्नये गिरागिरा

॥१९६॥

च दक्षसे॥ प्रप्रवयममृतं जातवेदसं प्रियं मित्रं न शꣳसि षम॥४२॥ ऊर्जो नपातꣳ सहिनायमस्मयुर्दाशेम हव्यदा तये॥ भुवद्वाजेष्ववितांभुवद्वृध उत त्रातातनूनाम्॥४३॥ संवत्सरोसि॥ परिवत्सरोसीदावत्सरोसीद्वत्सरोसि वत्स रोसि॥ उषसस्ते कल्पंतामहोरात्रास्ते कल्पंतामर्द्धमासा स्ते कल्पंतां मासास्ते कल्पंतामृतवस्ते कल्पंताꣳ संव त्सरस्ते कल्पताम्॥४४॥ प्रेत्याएत्यै संचांच प्रच सारय॥ सुपर्णचिदसि तया देवतयांगिरस्वद्ध्रुवः सीद॥४५॥ध्रु॥

॥१९७॥

एवं षष्ठानुवाकेषु पंचाशत्॥५०॥६॥ इति शुक्ल यजुर्वेद संहितायां मेकोनत्रिंशतितमोध्यायः॥६॥६॥ हरिः ॐ॥ होता यक्षत्समिधेंद्रमिडस्पदे नाभा पृथिव्या अधि॥ दिवो वर्ष्मन्त्समिध्यत ओजिष्ठश्चर्षणीसहां वेत्वाज्यस्य होतर्यज॥१॥ होता यक्षत्तनूनपातमूतिभिर्जेतारमपराजितम्॥ इंद्रं देवꣳ स्वर्विदं पथिभिर्मधुमत्तमैर्नराꣳशꣳसेन तेजसा वेत्वाज्यस्य होतर्यज॥२॥ होता यक्षदिडाभिरिंद्रमीडितमाजुह्वानममर्त्यं॥ देवो देवैः सवीर्यो वज्र

रा

हस्तः पुरंदरो वेत्वाज्यस्य होतर्यज॥३॥ होता यक्षद्बर्हिषींद्रं निषद्वरं वृषभं नर्यापसम्॥ वसुभी रुद्रैरादित्यैः सयुग्भिर्बर्हिरासदद्वेत्वाज्यस्य होतर्यज॥४॥ होता यक्षदोजो नवीर्यꣳ सहो द्वार इंद्रमवर्द्धयन्॥ सुप्रायणा अस्मिन्यज्ञे विश्रयंतामृतावृधो द्वार इंद्राय मीढुषे व्यंत्वाज्यस्य होतर्यज॥५॥ होता यक्षदुषे इंद्रस्य धेनू सुदुघे मातरा मही॥ सवातरौ न ते... वत्समिंद्रमवर्द्धतां वीतामाज्यस्य होतर्यज॥६॥ होता यक्षद्दैव्या होतारा भिषजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१८॥

स्त्स्वा याहविषेंद्र भिषज्यतः॥कूवीदे वौ प्रचेतसाइंद्राय धत्त इंद्रियं वीतामाज्यस्य होतर्यज॥७॥होतायक्षन्निस्त्रो देवी र्नभेषजं त्रयस्त्रिधातवोपसद ळासरस्वती भारतीम हीः॥इंद्रपत्नीर्हविष्मतीर्व्यंत्वाज्यस्य होतर्यज॥८॥होता यक्षत्त्वष्टारमिंद्रं देवं भिषजꣳ सुयजं घृतश्रियम॥पुरुरूपꣳ सुरेतसं मघोनमिंद्राय त्वष्टा दधदिंद्रियाणि वेत्वाज्य स्य होतर्यज॥९॥होतायक्षद्वनस्पतिꣳ शमितारꣳ शत क्रतुं धियो जोष्टारमिंद्रियं॥मध्वा समंजन्पथिभिः सुगे

॥१८॥०

भिः स्वदाति यज्ञं मधुना घृतेन वेत्वाज्यस्य होतर्यज॥१०॥होतायक्षदिंद्रꣳ स्वाहाज्यस्य स्वाहा मेदसः स्वाहा स्तोकानाꣳ स्वाहा स्वाहाकृतीनाꣳ स्वाहा हव्यसूक्तीनाम॥स्वाहा देवा आज्यपा जुषाणा इंद्र आज्यस्य व्यंतु होतर्यज॥११॥प्रथमोनुवाकः॥ देवं बर्हि।रिंद्रꣳ सुदेवं देवैर्वीरवत्स्तीर्णं वेद्यामवर्द्धयत्॥ वस्तोर्वृतं प्राक्तोर्भृतꣳ राया बर्हिष्मतोत्यगाद्वसुवने वसु धेयस्य वेतु यज॥१२॥देवीर्द्वार इंद्रꣳ संघाते वीड्वीर्यामन्न वर्द्धयन्॥आवत्से नतरुणेन कुमारेण च मीवतापार्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥११९॥

णंरेणुककाटंनुदंतांवसुवनेवसुधेयस्यव्यंतुयज॥१३॥
देवीउषासानक्तेंद्रंयज्ञेप्रयत्यह्वेताम्॥दैवीर्विशःप्रायासि
ष्ठांसुप्रीतेसुधितेवसुवनेवसुधेयस्यवीतांयज॥१४॥
देवीजोष्ट्रीवसुधितीदेवमिंद्रमव[illegible]र्द्धताम्॥अयाव्यंन्या
घाद्वेषांस्यान्यावक्षद्वसुवार्या[illegible]णियजमानायशिक्षि
तेवसुवनेवसुधेयस्यवीतांयज॥१५॥देवीऊर्जाहुतीदुघे
सुदुघेपयसेंद्रमवर्द्धताम्॥इषमूर्जमन्यावक्षत्सग्धिं
सपीतिमन्यानवेनपूर्वंदयमानेपुराणेननवमधाता

॥११९॥

मू[illegible]र्जमूर्जाहुतीऊर्जयमानेवसुवार्याणियजमायशि
क्षितेवसुवनेवसुधेयस्यवीतांयज॥१६॥देवादैव्याहोता
रादेवमिंद्रमवर्द्धताम्॥हताघशंसाआभार्ष्टांवसुवा
र्या[illegible]णियजमानायशिक्षितौवसुवनेवसुधेयस्यवी
तांयज॥१७॥देवीस्तिस्रस्तिस्रोदेवीःपतिमिंद्रमवर्द्धय
न्॥अस्पृक्षद्भारतीदिवंरुद्रैर्यज्ञंसरस्वतीडावसु
मतीगृहान्वसुवनेवसुधेयस्यव्यंतुयज॥१८॥देवइंद्रो
नराशंसस्त्रिवरूथस्त्रिवंधुरोदेवमिंद्रमवर्द्धयत॥शते

ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२०॥

नश्शांसि पूष्णा नामाहितस्सहस्वेण प्रवर्त्तते मित्रावरुणो द
स्य होत्रमर्हतो बृहस्पतिस्तोत्रमश्विनाध्वर्यवं वसुवने वसु
धेयस्य वेतु यज ॥१९॥ देवो देवैर्वनस्पतिर्हिरण्यपर्णो म
धुशाखः सुपिप्पलो देवमिंद्रमवर्द्धयत् । दिवमग्रेणास्पृ
क्षदांतरिक्षं पृथिवीमदृंहीद्वसुवने वसुधेयस्य वेतु यज
॥२०॥ देवं बर्हिर्वारितीनां देवमिंद्रमवर्द्धयत् । स्वासस्थम
मिंद्रेणासन्नमन्या बर्हᳪष्यभ्यभूद्वसुवने वसुधेयस्य
वेतु यज ॥२१॥ देवो अग्निः स्विष्टकृद्देवमिंद्रमव र्द्धयत् ।

॥२०॥

पं

स्विष्टं कुर्वन्त्स्विष्टकृत्स्विष्टमद्य करोतु नो वसुवने वसुधेय
स्य वेतु यज ॥२२॥ अग्निमद्य होतारमवृणीतायं यजमानः
पचन्पक्तीः पचन्पुरोडाशं बध्नन्निंद्राय छागं । सूपस्था
अद्य देवो वनस्पतिरभवदिंद्राय छागेन । अघत्तं मेदस्तः
प्रतिपचताग्रभीदवीवृधत्पुरोडाशेन । त्वामद्य ऋषे
॥२३॥ ॥ द्वितीयोनुवाकः ॥ ॥ होता यक्षत्समिधानं महद्यशः
सुसमिद्धं वरेण्यमग्निमिंद्रं वयोधसं । गायत्रीं छंद
इंद्रियं त्र्यविं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥२४॥ हो

त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२०१॥

होता यक्षत्तनूनपातमुद्भिदं यं गर्भमदितिर्दधे शुचिमिंद्रं
वयोधसम्॥ उष्णिहं छंद इंद्रियं दित्यवाहं गां वयो दध
द्वेत्वाज्यस्य होतर्यज॥२५॥ होता यक्षदीडेन्यमीडितं वृत्रह
न्तममिळाभिरीड्यं सहः सोममिंद्रं वयोधसम्॥ अनु
ष्टुभं छंद इंद्रियं पंचाविं गां वयो दधद्वेत्वाज्यस्य होतर्यज
॥२६॥ होता यक्षत्सुबर्हिषं पूषण्वंतममर्त्यं सीदंतं बर्हि
षि प्रियेऽमृतेंद्रं वयोधसं॥ बृहतीं छंद इंद्रियं त्रिवत्सं गां व
यो दधद्वेत्वाज्यस्य होतर्यज॥२७॥ होता यक्ष[illegible]द्व्यचस्व

॥२०१॥

तीः सुप्रायणा ऋतावृधो द्वारो देवीर्हिरण्ययीर्ब्रह्माण
मिंद्रं वयोधसम्॥ पंक्तिं छंद इहेंद्रियं तुर्यवाहं गां वयो
दधद्व्यंत्वाज्यस्य होतर्यज॥२८॥ होता यक्षत्सुपेशसा सु
शिल्पे बृहती उभे नक्तोषासा न दर्शते विश्वमिंद्रं वयोध
सम्॥ त्रिष्टुभं छंद इहेंद्रियं पष्ठवाहं गां वयो दधद्वीता
माज्यस्य होतर्यज॥२९॥ होता यक्षत्प्रचेतसा देवानामु
त्तमं यशो होतारा दैव्या कवी सयुजेंद्रं वयोधसम्॥ जगतीं
छंद इंद्रियमनड्वाहं गां वयो दधद्वीतामाज्यस्य होतर्यज
॥३०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२०९२॥

होतायक्षत्तिस्रोदेवीर्हिरण्ययीर्भारतीर्बृहतीर्महीःपतिमिंद्रंवयोधसम्॥विराजंछंदइहेंद्रियंधेनुंगांनवयोदधद्व्यंत्वाज्यस्यहोतर्यज॥३१॥होतायक्षत्सुरेतसंत्वष्टारंपुष्टिवर्द्धनꣳरूपाणिबिभ्रतंपृथक्पुष्टिमिंद्रंवयोधसम्॥द्विपदंछंदइंद्रियमुक्षाणं गांनवयोदधद्वेत्वाज्यस्यहोतर्यज॥३२॥होतायक्षद्वनस्पतिꣳशमितारꣳशतक्रतुꣳहिरण्यपर्णमुक्थिनꣳरशनांबिभ्रतंवशिंभगमिंद्रंवयोधसम्॥ककुभं

छंदइहेंद्रियंवशांवेहतंगांनवयोदधद्वेत्वाज्यस्यहोतर्यज॥३३॥होतायक्षत्स्वाहाकृतीरग्निंगृहपतिंपृथग्वरुणंभेषजंकविंक्षत्रमिंद्रंवयोधसम्॥अतिछंदसंछंदइंद्रियंबृहदृषभंगांनवयोदधद्व्यंत्वाज्यस्यहोतर्यज॥३४॥तृतीयोनुवाकः॥ ॥देवंबर्हिर्वयोधसंदेवमिंद्रमवर्द्धयत्।गायत्र्याछंदसेंद्रियंचक्षुरिंद्रेवयोदधद्वसुवनेवसुधेयस्यवेतुयज॥३५॥देवीर्द्वारोवयोधसꣳशुचिमिंद्रमवर्द्धयन्॥उष्णिहाछंदसेंद्रियंप्राणमिंद्रेवयोदधद्वसु

वसुवने वसुधेयस्य व्यंतु यज ॥३६॥ देवी उषासानक्ता देव
मिंद्रं वयोधसं देवी देवमवर्द्धताम् ॥ अनुष्टुभा छंदसेंद्रि
यं बलमिंद्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥
॥३७॥ देवी जोष्ट्री वसुधिती देवमिंद्रं वयोधसं देवी देव
मवर्द्धताम् ॥ बृहत्या छंदसेंद्रियं श्रोत्रमिंद्रे वयो दधद्व
सुवने वसुधेयस्य वीतां यज ॥३८॥ देवी ऊर्जाहुती दुघे
सुदुघे पयसेंद्रं वयोधसं देवी देवमवर्द्धताम् ॥ पंक्त्या छं
दसेंद्रियं शुक्रमिंद्रे वयो दधद्वसुवने वसुधेयस्य वीतां

यज ॥३९॥ देवा दैव्या होतारा देवमिंद्रं वयोधसं देवौ देव
मवर्द्धताम् ॥ त्रिष्टुभा छंदसेंद्रियं त्विषिमिंद्रे वयो दधद्व
सुवने वसुधेयस्य वीतां यज ॥४०॥ देवीस्तिस्रस्तिस्रो दे
वीर्वयोधसं पतिमिंद्रमवर्द्धयन् ॥ जगत्या छंदसेंद्रियं शू
षमिंद्रे वयो दधद्वसुवने वसुधेयस्य व्यंतु यज ॥४१॥ देवो न
राशंसो देवमिंद्रं वयोधसं देवो देवमवर्द्धयत् ॥ विराजा
छंदसेंद्रियं रूपमिंद्रे वयो दधद्वसुवने वसुधेयस्य वेतु
यज ॥४२॥ देवो वनस्पतिर्देवमिंद्रं वयोधसं देवो देवमव
र्द्धयत् ॥ द्विपदा छंदसेंद्रियं भगमिंद्रे वयो दधद्वसुवने वसु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२४॥

धेयस्यवेतुयज॥३॥देवंबर्हिर्वारितीनांदेवमिंद्रंवयोध
संदेवंदेवमवर्द्धयत्।ककुभाछंदसेंद्रियंयशइंद्रेवयोदध
द्वसुवनेवसुधेयस्यवेतुयज॥४॥देवोअग्निस्विष्टकृद्देव
मिंद्रंवयोधसंदेवोदेवमवर्द्धयत्।अतिछंदसाछंदसेंद्रि
यंक्षत्रमिंद्रेवयोदधद्वसुवनेवसुधेयस्यवेतुयज॥५॥
अग्निमद्यहोतारमवृणीतायंयजमानःपचन्पक्तीःपच
न्पुरोळाशंबध्नन्निंद्राय वयोधसेछागम्।सूपस्थाअ
द्यदेवोवनस्पतिरभवदिंद्रायवयोधसेछागेन।अघ
त्तंमेदस्तःप्रतिपचताग्रभीदवीवृधत्पुरोळाशेन।त्वा

॥२४॥

मद्यऋषे॥६॥शुचिमुह्निहाप्राणमनुष्टुभाबलंबृहत्या
श्रोत्रंपंक्त्याअनुऊंदेवोत्रिष्टुभाविषिमू॥जगत्याअनुष्टुंविरा
जारूपंद्विपदाभ्यगंककुभायशोतिछंदसाक्षत्रमिंद्रा
यवयोधसेछागमिंद्रायवयोधसेछागेन॥७॥७॥७॥
चतुर्थोनुवाकः॥७॥७॥इतिशुक्लयजुर्वेदसंहितायांत्रिंश
तितमोध्यायः॥७॥ ॥हरिःॐम्॥समिद्धोअग्निंजन्त्
द्दरंमतीनांघृतम ग्नेमधुमत्पिन्वमानः॥वाजीवह
न्वाजिनंजातवेदोदेवानांवक्षिप्रियमासधस्थम्॥१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२५॥

घृतेनांजंत्संपथोदेवयानान्प्रजानन्वाज्यप्येतुदेवान्॥अनु
त्वासप्तेप्रदिशः सचंतां स्वधामस्मैयजमानायधेहि॥२॥
ईड्यश्चासिवंद्यश्चवाजिन्नाशुश्चासिमेध्यश्चसप्ते॥अग्नि
ष्ट्वादेवैर्वसुभिःसजोषाःप्रीतंवह्निंवहतुजातवेदाः॥३॥स्
स्तीर्णंबर्हिः।सुष्टरीमाजुषाणोरुपृथुप्रथमानंपृथिव्याम्
देवेभिर्युक्तमदितिःसजोषाःस्योनंकृण्वानासुवितेदधा
तु॥४॥एताउवः।सुभगाविश्वरूपाविपक्षोभिःश्रयमाणा
उदातैः॥ऋष्वाःसतीःकवषःशुंभमानाद्वारोदेवीःसुप्रा

॥२५॥

+ ण

यणाभवंतु॥५॥अंतरामित्रावरुणाचरंतीमुखंयज्ञानामभिसं
विदाने॥उषासावां सुहिरण्येसुशिल्पेऋतस्ययोनाविह
सादयामि॥६॥प्रथमावां सरथिनासुवर्णादेवौपश्यंतौभु
वनानिविश्वा॥अपिप्रयंचोदनावांमिमानाहोताराज्योतिः
प्रदिशादिशंता॥७॥आदित्यैर्नोभारतीवष्टुयज्ञं सरस्व
तीसहरुद्रैर्नआवीत्॥इडोपहूतावसुभिःसजोषायज्ञंनो
देवीरमृतेषुधत्त॥८॥त्वष्टावीरंदेवकामंजजानत्वष्टुरर्वा
जायतआशुरश्वः॥त्वष्टेदंविश्वंभुवनंजजानबहोःकर्तार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिहयक्षि होतः ॥९॥ अश्वो घृतेन त्मन्या समक्त उप देवाँ ऋतुशः पाथ एतु ॥ वनस्पतिर्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत् ॥१०॥ प्रजापते तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने ॥ स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदंतु देवाः ॥११॥६॥ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे ॥ समुषद्भिरजायथाः ॥१२॥ जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ॥ अनाविद्धया तन्वा जय त्वं स त्वा वर्मणो महिमा पिपर्तु ॥१३॥ धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ॥ धनुः शत्रोरपकामं कृ

णोति धन्वना सर्वाः प्रदिशो जयेम ॥१४॥ ते आचरंती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ॥ अप शत्रून्विध्यतां संविदाने आर्त्नी इमे विष्फुरंती अमित्रान् ॥१५॥ वक्ष्यंतीवेदा गनीगंति कर्णं प्रियं सखायं परिषस्वजाना ॥ योषेव शिंक्ते वितताधि धन्वन्ज्या इयं समने पारयंती ॥१६॥ अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ॥ हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांसं परि पातु विश्वतः ॥१७॥ बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इषुधिः संकाः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥
॥१८॥ सुपर्णं वस्ते मृगो अस्या दंतो गोभिः सन्नद्धा पतति प्र
सूता ॥ यत्रा नरः संच विच द्रवंति तत्रास्मभ्यमिषवः शर्म य
ंसन् ॥१९॥ वनस्पते वीड्वंगो हि भूया अस्मत्सखा प्रतरणः
सुवीरः ॥ गोभिः सन्नद्धो असि वीळयस्वास्थाता ते जयतु
जेत्वानि ॥२०॥ रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामय
ते सुषारथिः ॥ अभीशूनां महिमानं पनायत मनः पश्चादनु
यच्छंति रश्मयः ॥२१॥ आजंघंति । सान्वेषां जघनां उप जिघ्न

॥२९७॥

ते ॥ अश्वाजनि प्रचेतसोऽश्वांत्समत्सु चोदय ॥२२॥ उप श्वासय
पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ॥ स दुंदुभे सजू
रिंद्रेण देवैर्दूराद्दवीयो अप सेध शत्रून् ॥२३॥ ॥छ॥ यदक्रं
दः प्रथमं जायमान उद्यंत्समुद्रादुत वा पुरीषात् ॥ श्येनस्य
पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥२४॥ य
मेन दत्तं त्रित एनमायुनगिंद्र एणं प्रथमो अध्यतिष्ठत् ॥
गंधर्वो अस्य रशनामगृभ्णात्सूरादश्वं वसवो निरतष्ट
॥२५॥ असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रते

॥२९॥

ना॥ अग्निः सोमेन समया विपृक्ता आहुस्ते त्रीणि दिवि बंधनानि॥२६॥ त्रीणि त आहुर्दिवि बंधनानि त्रीण्यप्सु त्रीण्यंतः समुद्रे॥ उतेव मे वरुणश्छंत्स्यर्वन्यत्रा त आहुः परमं जनित्रम्॥२७॥ इमा ते वाजिन्नवमार्जनानीमा शफानां सनितुर्निधाना॥ अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षंति गोपाः॥२८॥ आत्मानं ते मनसारादजानामवो दिवा पतयंतं पतंगम्॥ शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि॥२९॥ अत्रा ते रूपमुत्तममप

॥२९॥

श्यं जिगीषमाणमिष आ पदे गोः॥ यदा ते मर्तो अनु भोगमानळादिद्ग्रसिष्ठ ओषधीरजीगः॥३०॥ अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोनु भगः कनीनाम्॥ अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं ते॥३१॥ हिरण्यशृंगो यो अस्य पादा मनोजवा अवर इंद्र आसीत्॥ देवा इदस्य हविरद्यमायन्यो अर्वंतं प्रथमो अध्यतिष्ठत्॥३२॥ ईर्मांतासः सिलिकमध्यमासः सं शूरणासो दिव्यासो अत्याः॥ हंसा इव श्रेणिशो यतंते यदाक्षिषुर्दिव्यमज्ममश्वाः॥३३॥ तव शरीरं पतयिष्ण्वर्वन्तव चित्तं वात इव ध्रजीमान्॥ तव शृंगाणि विष्ठिता पुरुत्रारण्ये

॥२९॥

पुत्रजर्भुराणाचरंति॥११॥उपप्रागाछसनंवाज्यर्वादेवद्रीचामनसादीध्यानः॥अजःपुरोनीयतेनाभिरस्यानुपश्चात्कवयोयंतिरेभाः॥१२॥उपप्रागात्परमंयत्सधस्थमर्वांअछापितरंमातरंच॥अद्यादेवांजुष्टतमोहिगम्याअथाशास्तेदाशुषेवार्याणि॥१३॥छ॥समिद्धोअद्यमनुषोदुरोणेदेवोदेवांन्यजसिजातवेदः॥आचवहमित्रमहश्चिकित्वांत्वंदूतःकविरसिप्रचेताः॥१॥तनूनपात्पथऋतस्ययानान्मध्वासमंजंत्स्वदयासुजिव्हा॥मन्मानिधीभिरुतय

॥२९॥

ज्ञमृंधन्देवत्राचकृणुह्यध्वरन्नः॥२॥नराशंसस्यमहिमानमेषामुपस्तोषामयजतस्ययज्ञैः॥येसुक्रतवःशुचयोधियंधाःस्वदंतिदेवाउभयानिहव्या॥३॥आजुव्हानईड्योवंद्यश्चायाह्यग्नेवसुभिःसजोषाः॥त्वंदेवानामसियव्हहोतासएनान्यक्षीषितोयजीयान्॥४॥प्राचीनंबर्हिःप्रदिशापृथिव्यावस्तोरस्यावृज्यतेअग्रेअन्हाम्॥व्युप्रथतेवितरंवरीयोदेवेभ्योअदितयेस्योनम्॥५॥व्यचस्वतीरुर्वियाविश्रयंतांपतिभ्योनजनयःशुंभमानाः॥देवीर्द्वारोबृहतीर्विश्वमिन्वादेवेभ्योभवतसुप्रायणाः॥६॥आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पा

॥२५॥

सुष्वयंती। यजते उपाके उषासानक्ता सदतां नि योनौ॥ दिव्ये
योषणे बृहती सुरुक्मे अधि श्रियं शुक्रपिशं दधाने॥६॥
दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै।
प्रचोदयंता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशंता
॥७॥ आ नो यज्ञं भारती तूयमेत्विळा मनुष्वदिह चेतयं
ती॥ तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसः स
दंतु॥८॥ य इमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुव
नानि विश्वा॥ तमद्य होतरिषितो यजीयान्देवं त्वष्टारमिह
यक्षि विद्वान्॥९॥ उपावसृज त्मन्या समंजन्देवानां पाथ

॥२५०॥

ऋतुथा हवींषि॥ वनस्पतिः शमिता देवो अग्निः स्वदं
तु हव्यं मधुना घृतेन॥१०॥ सद्यो जातो व्यमिमीत यज्ञ
मग्निर्देवानामभवत्पुरोगाः॥ अस्य होतुः प्रदिश्यृतस्य
वाचि स्वाहाकृतं हविरदंतु देवाः॥११॥ अग्नये गायत्रा
य। त्रिवृते राथंतरायाष्टाकपाल इंद्राय त्रैष्टुभाय पंचद
शाय बार्हताय एकादशकपालो विश्वेभ्यो देवेभ्यो जाग
तेभ्यः सप्तदशेभ्यो वैरूपेभ्यो द्वादशकपालो मित्रावरुणा
भ्यामानुष्टुभाभ्यामेकविंशाभ्यां वैराजाभ्यां॥ पय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्याबृहस्पतयेपांक्तायत्रिणवायशाक्वरायचरुःसवित्र
औष्णिहायत्रयस्त्रिंशायरैवतायद्वादशकपालःप्रा
जापत्यश्चरुरदित्यैविष्णुपत्न्यैचरुरग्नयेवैश्वानराय
द्वादशकपालोनुमत्याअष्टाकपालः॥५९॥आग्नेयःकृ
ष्णग्रीवः।सारस्वतीमेषीबभ्रुःसौम्यःपौष्णःश्यामःशि
तिपृष्ठोबार्हस्पत्यःशिल्पोवैश्वदेवः॥ऐंद्रोरुणोमारुतः
कल्माषऐंद्राग्नःसंहितोधोरामःसावित्रोवारुणः
कृष्णएकशितिपात्पेत्वः॥६०॥अग्नयेनीकवतेरोहि

॥२९॥

तांजिरनड्वानधोरामौसावित्रौपौष्णौरजतनाभीवैश्वदे
वौपिशंगौतूपरौ॥मारुतःकल्माषआग्नेयःकृ
ष्णोजःसारस्वतीमेषीवारुणःपेत्वः॥६१॥६॥६॥सप्ता
नुवाकेषुएकोनपंचाशत्॥४९॥इतिशुक्लयजुर्वेदसंहितायां
एकत्रिंशतिमोध्यायः॥कंडिकासंख्या॥५९॥६॥
हरिः ॐ॥अस्याजरासोदमामरित्राअर्चद्धू
मासोअग्नयःपावकाः॥श्वितीचयःश्वात्रासोभुरण्यवो
वनर्षदोवायवोनसोमाः॥१॥हरयोधूमकेतवोवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२९२॥

तन्नूतानुपद्य वि॥ यतंते व्यथमानय:॥४॥ यज्ञानो मित्रावरु
णा यजा देवं ऋतं बृहत॥ अग्ने यक्षि स्वं दमम्॥३॥ युक्ष्वा
हि देवहूतमां अश्वां अग्ने रथीरिव॥ नि होता पूर्व्यः सदः॥४॥
द्वे विरूपे चरतः स्वर्थे अन्यान्या वत्समुप धापयेते॥ ह
रिरन्यस्यां भवति स्वधावाञ्छुक्रो अन्यस्यां ददृशे सुवर्चाः
॥५॥ अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्व
रेष्वीड्यः॥ यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं
विशेविशे॥६॥ त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च
देवा नव चासपर्यन्॥ औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदि

॥२९२॥

द्धोतारं न्यसादयंत॥७॥ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वान
रमृत आ जातमग्निम्॥ कविं सम्राजमतिथिं जनानामासं
ना पात्रं जनयंत देवाः॥८॥ अग्निर्वृत्राणि जंघनद्द्रविणस्यु
र्विपन्यया॥ समिद्धः शुक्र आहुतः॥९॥ विश्वेभिः सोम्यं मध्व
ग्न इंद्रेण वायुना॥ पिबा मित्रस्य धामभिः॥१०॥ आ यदिषे
नृपतिं तेज आनट् छुचि रेतो निषिक्तं द्यौरभीके॥ अग्निः श
र्द्धमनवद्यं युवानं स्वाध्यं जनयत्सूदयच्च॥११॥ अग्ने शर्द्ध
महते सौभगाय तव द्युम्नान्युत्तमानि संतु॥ सं जास्पत्यं

सुयममाकृणुष्वशत्रूयतामभितिष्ठामहांसि॥१२॥त्वा
ंहिमंद्रतममर्कशोकैर्ववृमहेमहिनःश्रोष्यग्ने॥इंद्रंन
त्वाशवसादेवतावायुंपृणंतिराधसान्तमाः॥१३॥त्वेअग्ने
स्वाहुतप्रियासःसंतुसूरयः॥यंतारोयेमघवानोजनानामू
र्वंदयंतगोनाम्॥१४॥श्रुधिश्रुत्कर्णवन्हिभिर्देवैरग्ने
सयावभिः॥आसीदंतुबर्हिषिमित्रोअर्यमाप्रातर्यावानो
अध्वरम्॥१५॥विश्वेषामदितिर्यज्ञियानांविश्वेषामतिथि
र्मानुषाणाम्॥अग्निर्देवानामवआवृणानःसुमृळीको

भवतुजातवेदाः॥१६॥महोअग्नेःसमिधानस्यशर्मण्यना
गामित्रेवरुणेस्वस्तये॥श्रेष्ठेस्यामसवितुःसवीमनित
देवानामवोअद्यावृणीमहे॥१७॥आपश्चित्पिप्युस्तर्योन
गावोनक्षन्नृतंजरितारस्तइंद्र॥याहिवायुर्ननियुतोनो
अच्छात्वंहिधीभिर्दयसेविवाजान्॥१८॥गावउपावताव
तंमहीयज्ञस्यरप्सुदा॥उभाकर्णाहिरण्यया॥१९॥यदद्या
सूरउदितेनागामित्रोअर्यमा॥सुवातिसविताभगः॥
॥२०॥आसुतेसिंचश्रियंरोदस्योरभिश्रियम्॥रसाद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२९४॥

धीतव्रष [illegible] मम्न॥ तंप्रत्नथायंवेनश्चोदयत्॥२१॥ आति
ष्ठंतंपरिविश्वे अभूषंछ्रियोवसानश्चरतिस्वरोचिः॥ मह
त्तद्वृष्णो असुरस्यनामाविश्वरूपो अमृतानितस्थौ॥२२॥
प्रवोमहेमंदमानायांधसोर्चाविश्वानरायविश्वाभुवे॥ इं
द्रस्ययस्यसुमखंसहोमहिश्रवोनृम्णंचरोदसीस
पर्यतः॥२३॥ बृहन्निदिध्मएषांभूरिशस्तंपृथुस्वरुः॥ ये
षामिंद्रोयुवासखा॥२४॥ इंद्रेहिमत्स्यंधसोविश्वेभिः
सोमपर्वभिः॥ महाँअ[illegible]भिष्टिरोजसा [illegible]॥२५॥ इंद्रोवृ
त्रमवृणोच्छर्धनीतिःप्रमायिनाममिनाद्व[illegible]र्पणीतिः॥

॥२९४॥

अहन्व्यंसमुशधग्वनेष्वाविर्धेनाअकृणोद्राम्याणाम्॥
॥२६॥ कुतस्त्वमिंद्रमाहिनःसन्नेकोयासिसत्पतेकिंतइ
त्था॥ संपृछसेसमराणःशुभानैर्वोचेस्तन्नोहरिवोय
त्तेअस्मे॥ महांइंद्रोयओजसापर्जन्योवृष्टिमाँइव॥ स्तोमैर्वत्स
स्यवावृधे॥२७॥ आतत्तइंद्रायवःपनंताभियऊर्वंगोमंततित
त्सान्॥ सकृत्स्वंयेपुरुपुत्रांमहीं सहस्रधारांबृहतीं
दुदुक्षन्॥२८॥ इमांतेधियंप्रभरेमहोमहीमस्यस्तोत्रेधि
षणायत्तआनजे॥ तमुत्सवेचप्रसवेचसासहिमिंद्रंदेवासः

॥सू०१५॥

त्रावसामदन्ननु॥२१॥ ॥६॥ ॥ विभ्राड्बृहत्पिबतुसोम्यंमध्वा
युर्दधद्यज्ञपतावविह्रुतम्॥ वातजूतोयोअभिरक्षति
त्मनाप्रजाःपुपोषपुरुधाविराजति॥१॥ उदुत्यंजातवे
दसंदेवंवहंतिकेतवः॥ दृशेविश्वायसूर्यम्॥१॥ येनापा
